भारतीय ज्ञानपीठ मूर्तिदेवी जैन ग्रन्थमाला संस्कृत ग्रन्थांक-२६

श्रीराजवल्लभकृत

# भोजचरित्र

[ अँगरेजी प्रस्तावना, नोट्स तथा परिशिष्ट सहित ]

सम्पादक
डॉ० बी० सी-एच. छाबड़ा
एम. ए., एम. ओ. एल., पी-एच. डी. ( लेडेन, हॉलैण्ड ), एफ़. ए. एस.
ज्वाएण्ट डायरेक्टर जनरल ऑव अर्किऑलॉजी इन इण्डिया
तथा
एस. शंकरनारायणन्
एम. ए., शिरोमणि,
असिस्टेण्ट सुपरिण्टेण्डेण्ट फॉर एपिग्राफ़ी

भारतीय ज्ञानपीठ प्रकाशन

वीर निर्वाण सं० २४९०
वि० सं० २०२०, सन् १९६४

प्रथम संस्करण
आठ रुपये

## ग्रन्थमाला सम्पादकीय

यह बात सच है कि भारतीय प्राचीन साहित्यमें पूर्णतः ऐतिहासिक कृतियोंका प्रायः अभाव है। किन्तु इसका यह तात्पर्य नहीं कि इस साहित्यमें ऐतिहासिक तथ्यों और व्यक्तियोंका कोई उल्लेख या परिचय ही न हो। यहाँ ऐतिहासिक घटनाओं और उनसे सम्बन्धित व्यक्तियोंका उतना ही परिचय मिलता है जितना मानवीय जीवनमें आदर्श व उत्कर्ष लाने तथा नीति और सदाचार स्थापित करनेके लिए आवश्यक समझा गया। जैन साहित्यमें प्रायः सर्वत्र ही प्रत्यक्ष व परोक्ष रूपसे इस प्रकारके उल्लेख ओत-प्रोत हैं। जैन अर्धमागधी आगमसे लेकर समस्त प्राकृत, संस्कृत व अपभ्रंश रचनाओंमें तथा आधुनिक भाषात्मक कृतियोंमें सैकड़ों आख्यान व उल्लेख ऐसे पाये जाते हैं जिनसे भारतीय प्राचीन इतिहासकी अस्पष्ट कड़ियोंको जोड़नेमें बड़ी सहायता मिलती है। मध्यकालीन साहित्यमें तो अनेक ऐसे कथानक, प्रबन्ध, चरित्र और रास मिलते हैं जिनके नायक सर्वथा ऐतिहासिक पुरुष हैं। हाँ इतना अवश्य है कि उनमें ऐतिहासिक तत्त्वोंके अतिरिक्त अतिशयोक्ति व अलौकिक बातोंका भी इतना समावेश हो गया है कि उक्त दोनों भागोंको पूर्णतः पृथक् कर यथार्थताका निर्णय करना जरा टेढ़ी खीर है।

इस सन्दर्भमें प्रस्तुत ग्रन्थ अपना एक महत्त्वपूर्ण स्थान रखता है। इसमें ग्यारहवीं शतीके भारतीय सम्राट् भोजका चरित्र वर्णित है। राजा भोजके कथानक भारतीय आख्यान-परम्परामें बहुत प्रसिद्ध और लोकप्रिय हैं। वे ऐसे दानशील और विद्याप्रेमी थे कि बल्लाल कविने अपने भोजप्रबन्धमें भारतके कालिदास व भारवि-जैसे प्राचीन महाकवियोंको उनकी राजसभामें ला बैठाया है और एक-एक सुन्दर पद्यकी रचनापर उन्हें एक-एक लक्ष सुवर्णमुद्राएँ दान करते हुए दिखलाया है। प्रस्तुत ग्रन्थ भोज-सम्बन्धी कथा-शृंखलाकी एक महत्त्वपूर्ण कड़ी है। इसके रचयिता राजवल्लभ जैनधर्मके अनुयायी व पाठक थे, तथा उन्होंने अन्नदानकी महिमा बतलानेके लिए यह रचना की। वे राजा भोजसे प्रायः चार सौ वर्ष पश्चात् पन्द्रहवीं शतीके मध्यभागमें हुए थे। ग्रन्थके देखनेसे स्पष्ट है कि उन्होंने अपने समयमें उपलभ्य भोजराजसम्बन्धी सभी वार्ताओंका संग्रह कर उन्हें अपने ढंगसे रीतिबद्ध शैलीमें रखनेका प्रयत्न किया है।

इस संस्कृत पद्यात्मक रचनाका प्रथम बार सम्पादन श्रीमान् डॉ० बहादुरचन्द्र छाबड़ा तथा श्री एस० शंकरनारायणन् ने आठ प्राचीन प्रतियोंके आधारसे किया है। जिनमें सबसे प्राचीन प्रति संवत् १४९८ ( सन् १४४१ ) की है, और यही उन्होंने कर्ताके कालकी अन्तिम अवधि मानी है। ग्रन्थका सम्पादन बहुत कुशलतासे किया गया है, तथा प्रस्तावनामें ग्रन्थ व उसके कर्ताके सम्बन्धकी समस्त ज्ञातव्य बातोंका विद्वत्तापूर्ण रीतिसे विवेचन किया गया है। इस बहुमूल्य देनके लिए हम प्रथितयश विद्वान् सम्पादकोंके बहुत कृतज्ञ हैं। ऐसी महत्त्वपूर्ण प्राचीन रचनाओंको आधुनिक ढंगसे सुसम्पादित कराकर प्रकाशित करनेके लिए भारतीय ज्ञानपीठ व उसका अधिकारी वर्ग धन्यवादके पात्र हैं।

जबलपुर स्टेशन
२७-१२-१९६३

हीरालाल जैन
आ० ने० उपाध्ये
*ग्रन्थमाला सम्पादक*

# अथ भोजचरित्रप्रारम्भः

[ अथ प्रथमः प्रस्तावः ]

[1]आश्वसेनं[2] जिनं नत्वा गौतमादिगणाधिपान् ।
[3]चरित्रमन्नदानस्य कुर्वे कौतूहलप्रियम् ॥१॥
पूर्वे भवे यथा दानं दत्तं भोजनृपेण तु ।
प्रबन्धं तस्य वक्ष्यामि भव्यानां बोधहेतवे ॥२॥ तथाहि—
भारतक्षेत्रमध्यस्थो देशो मालवसंज्ञकः ।
अनेकनगरग्रामपत्तनैः [4]प्रविराजितः ॥३॥
तत्रास्ति नगरी रम्या धारानाम्नी[5] महापुरी ।
अनेकमन्दिराकीर्णा [6]जैनप्रासादशोभिता ॥४॥
धनाढ्या बहवस्तत्र श्रेष्ठिसार्थाधिपादयः[7] ।
लक्षेश्वरा न दृश्यन्ते कोटिकोटीश्वराग्रतः ॥५॥
यत्र धर्मपरा लोकाः सदाचाराः क्रियान्विताः[8] ।
भूषिता [9]भूषणैर्द्रव्यैर्मन्ये सुरपुरीनिभा[10] ॥६॥
भूपस्तत्रास्ति विख्यातो दानमानगुणान्वितः ।
शूरो वीरवरः प्राज्ञः सिन्धुनामाऽस्ति भूपतिः ॥७॥
अनेकोपाङ्गरचनारचकः साहसान्वितः[11] ।
चतुरश्चारुमूर्तिस्तु[12] पमारान्वयभूषणम्[13] ॥८॥
अनेकान्तःपुरीवर्गपरिवारपरीवृतः ।
विशेषाद्रमणीवर्गमध्येऽप्येका मनोहरा ॥९॥

1. A begins with श्रीवीतरागाय नमः । 2. $P^3$ °नि; $B^1$ °न° । 3. $P^2$ चा° । 4. $P^2$ °शान्तनेन वि°; $B^1$ and $B^3$ °टूणेन वि° । 5. $P^2$ and A °म । 6. A, $B^1$ and $B^3$ जिन° । 7. $P^2$ श्रेष्ठसर्वा° । 8. $P^1$, A and L °रक्ति° । 9. $P^2$ भूषितद्र° । 10. $B^1$ °निभाः । 11. $P^2$, $B^1$ and $B^3$ साहसाग्रणीः । 12. $P^2$ °श्च । 13. $P^2$ and $B^1$ परमा°; $B^3$ पर्मा° ।

पट्टराज्ञीपदे न्यस्ता नाम्ना रत्नावलीत्यहो ।
भुनक्ति तत्समं भोगान्[1] राज्यलीलोचितान्[2] सुखम् ॥१०॥

परं कर्मनियोगेन भूपः सन्तानवर्जितः ।
दम्पती कुर्वतस्तस्मात्तौ द्वौ दुःखं सदा हृदि ॥११॥

धिग्जन्म धिगिदं राज्यं धिग्मे बलपराक्रमौ ।
दध्यौ धिग्मे गुणाधिक्यं यदपुत्रो नृपोऽस्म्यहम्[3] ॥१२॥

शिवादित्याभिधो मन्त्री चतुर्धाबुद्ध्यधिष्ठितः[4] ।
तत्प्रियागुणमञ्जर्यां[5] रुद्रादित्याभिधः सुतः ॥१३॥

भूपश्चित्तविनोदाय सामन्तैर्मन्त्रिभिः पुनः ।
मिलित्वाऽऽगत्य विज्ञप्तो गम्यते मृगयाविधौ[6] ॥१४॥

हयमारुह्य[7] भूपेन्द्रः परिच्छदसमन्वितः ।
जगाम[8] बहिरुद्याने त्रासयन्प्राणिनः परान्[9] ॥१५॥

एकाकी तत्र भूपालो बभ्राम[10] सरितस्तटे[11] ।
शिशुं ददर्श सत्कान्तिं स्थितं मुञ्जतृणोपरि ॥१६॥

सुरूपं बालकं दृष्ट्वा राजा हर्षपरायणः ।
प्रच्छन्नोच्छङ्ग[12]मादाय गतो रोरो[13]निधानवत् ॥१७॥

रत्नावलीं समाहूयैकान्ते बालमदर्शयत् ।
बालं सूर्योपमोद्द्योतं[14] दृष्ट्वा राज्ञी विसिष्मये[15] ॥१८॥

भूपेनाप्यस्य [16]वृत्तान्तं प्रियाया उक्तमग्रतः[17] ।
पुण्ययोगादसौ लब्धः पाल्यो [18]भद्रेऽङ्गजन्मवत् ॥१९॥

राज्या [19]मोदवशात्सद्यः स्तनौ स्तन्येन पूरितौ ।
[20]गूढगर्भवशाज्जातः[21] पुत्रो[22*23]भूपगृहेऽद्भुतः[24] ॥२०॥

---

1. A, $B^1$ and $B^3$ तत्समं भुञ्जयत्स्वैव । 2. $P^2$, A and $B^3$ °चितं; $B^1$ °चितः । 3. $P^2$, A, $B^1$ and $B^3$ धिग्मे गुणगणाधिक्यं यदि पुत्रविवर्जितम् ($B^1$ तः) । 4. $B^1$ and $B^3$ बुद्धिनायकः । 5. $P^1$, $P^3$, and L °र्यां । 6. $B^1$ and $B^3$ मृगयां प्रभो । 7. $P^1$, $P^3$, A, $B^1$ and $B^3$ हयेना° । 8. A and $B^3$ आगत्य; $B^2$ गता ते । 9. $P^2$ जीवानां नाशयन्नपि; $B^1$ and $B^3$ जीवानां त्रासयन्नपि । 10. L जगाम; $B^1$ भ्राम्यते; $B^3$ भ्रमते । 11. $B^1$ and $B^3$ सरितातटे । 12. $P^2$ °त्सङ्ग° । 13. $B^1$ रोरी; $B^3$ रोर° । 14. $P^2$ बालसूर्योपमं कान्त्या; A बालसूर्यसमां कान्तिं । 15. $P^2$ and A सविस्मिता । 16. $P^2$ and A °न मूलवृ° । 17. P, $P^3$ and L °न्तं प्रियाया उक्तमग्रतः; A, $B^1$ and $B^3$ प्रियायै च निरूपितम् । 18. $P^2$, A, $B^1$ and $B^3$ पुण्ययोगादिमं पुत्रं पाल्यं भद्रे । 19. $P^1$ $P^3$, A and L मोह° । 20. $P^2$, A, $B^1$ and $B^3$ °र्भविसा° । 21. $P^2$, A, $B^1$ and $B^3$ °तं । 22. $P^2$ and A °त्रं । 23. $P^2$, $B^1$ and $B^3$ राज; A राज्ञो । 24. A, $B^1$ and $B^3$ °तम् ।

एवं श्रुत्वा प्रजाः सर्वाः[1] संजाता हर्षपूरिताः ।
वर्द्धापनाय सर्वास्ता गता भूपस्य मन्दिरे ॥२१॥
महाद्भुतः कृतो राज्ञा पुत्रजन्ममहोत्सवः[2] ।
दानमानवशाज्जाताः सन्तुष्टा याचकादयः ॥२२॥
षष्ठेऽह्नि षष्ठिकाचारा नखशुद्धिर्दशाह्निके ।
एकादशे दिने भुक्ताः प्रकृष्टाः[3] स्वजनादयः ॥२३॥
विटपे[4] मुञ्जमध्यस्थः[5] संप्राप्तो[6] बालकः[7] पुरा ।
एवं [8]विचिन्त्य भूपेन मुञ्जनामास्य निर्मितम्[9] ॥२४॥
द्वितीयेन्दुकलावत्स ववृधेऽथ दिने दिने ।
लाल्यमानोऽथ धात्रीभिः संजातः पञ्चवार्षिकः ॥२५॥
मुञ्जभाग्याधिकत्वेन राज्ञी रत्नावली तदा ।
गर्भाधानपरा जाता हर्षेण पूरिता हृदि ॥२६॥
वर्धमाने च तद्गर्भे राजा राज्ञीप्रमोदभाक् ।
दोहदैः पूर्यमाणैस्तद्गर्भः पूर्णो दिनैस्ततः ॥२७॥
राज्यास्तनूरुहो[10] जातः शुभे लग्ने च वासरे[11] ।
वर्धापनं पुरे [12]चक्रुर्भूपादेशेन तत्प्रजाः ॥२८॥
सिन्धुलः सिन्धुपुत्रोऽयं चिरं जीयाज्जनोऽवदत्[13] ।
वर्द्धन्तौ लाल्यमानौ स्तः[14] पुत्रौ द्वौ मुञ्जसिन्धुलौ ॥२९॥
ज्ञात्वाऽध्यापनयोग्यौ[15] तौ कलाचार्यस्य चार्पितौ[16] ।
दिनैः स्तोकतरैर्जातौ[17] शस्त्रशास्त्रकलान्वितौ ॥३०॥
यौवनेन च संप्राप्तौ ज्ञात्वा सिन्धुनृपेण तु[18] ।
सुशीले कुलजे कन्ये तौ द्वावपि विवाहितौ ॥३१॥
मुञ्जनामा[19] सुतो [20]जीववल्लभः पितरोस्तयोः ।
पुण्याधिकस्य जीवस्य[21] प्रशंसां न करोति कः ॥३२॥

---

1. $P^2$, A, L and $B^3$ प्रजा सर्वा····रिता । 2. A °च्छ्वः । 3. $P^2$ and L °हृ° । 4. $P^2$, A, $B^1$ and $B^3$ विकटे । 5. $P^2$ and A °स्थ° । 6. $P^2$ and A °प्त° । 7. $P^2$ and A °क° । 8. $P^2$, A, $B^1$ and $B^3$ सं° । 9. $P^2$, $B^1$ and $B^3$ नाम प्रतिष्ठितम् । 10. $P^2$ राज्ञीतनो सुतो; A राज्ञी सुतासुतो । 11. $P^2$ सुलग्ने शुभवासरे । 12. $P^2$ and A कारं । 13. $B^1$ and $B^3$ °नोक्तिभिः । 14. $P^2$ and A तौ । 15. A °त्वाध्ययन° । 16. A °र्ये समर्पितौ; $B^1$ °र्यसमन्वितौ । 17. $B^1$ and $B^3$ °तरैर्मध्ये । 18. $P^2$ and A तौ । 19. A °म । 20. A °तोऽतीव० । 21. $P^2$ and $A^1$ °धिके जनेनापि ।

नान्तरं वेत्ति कोऽपीति[1] [2]तनुजन्माऽथ पालकः ।
एकदा सिन्धुभूनाथो रात्रौ मुञ्जालये गतः ॥३३॥
तेन लज्जावता[3] चिप्ता पर्यङ्काधः प्रिया निजा ।
सत्कृत्यासनकं दत्त्वाऽग्रे पितुः समुपाविशत् ॥३४॥
विलोक्य दक्षिणं वामं[4] भूपेनालापितः सुतः ।
तृतीयो न हि कोऽप्यत्र सन्निधौ वर्तते जनः[5] ॥३५॥
अत्र स्थाने सुतोऽप्याह न कश्चिद्वर्ततेऽपरः[6] ।
एवं श्रुत्वाऽवदद्भूपः शृणु वत्स[7] ! वचो मम ॥३६॥
पालकस्त्वं सुतोऽस्माकमङ्गजन्माऽस्ति सिन्धुलः ।
न कश्चिदन्तरं[8] वेत्ति तवाप्युक्तं मयाऽधुना ॥३७॥
मार्गदर्शक - आचार्य
न हि [9]कान्दिदसौ दार्ढ्यं गुणैस्तुष्यन्ति साधवः ।
परोऽपि गुणवान् पूज्यस्त्यज्यते निर्गुणो[10]ऽङ्गजः ॥३८॥ यदुक्तम्[11]—
परोऽपि हितवान् बन्धुर्बन्धुरप्यहितः[12] परः ।
अहितो देहजो[13] व्याधिर्हितमारण्यमौषधम् ॥३९॥
स्पर्शयन् पाणिना स्पृष्टं[14] सिन्धुभूपोऽवदत्तदा[15] ।
राज्यश्रियं ते ददामि परमेकं[16] वचः शृणु ॥४०॥
सिन्धुलोऽयं तव भ्राता पालनीयोऽत्र[17] सर्वदा ।
विनाशं क्वाऽप्यसौ कुर्वन् रक्षणीयो मदुक्तितः[18] ॥४१॥
यदृच्छया[19] मया भुक्ता राज्यसंपदिहाधिका[20] ।
वृद्धत्वे[21] त्वधुना प्राप्ते साधयामि परं भवम्[22] ॥४२॥
एवं निरूप्य मुञ्जाग्रे भूपतिस्तत उत्थितः[23] ।
सोपानाद्यावदुत्तीर्य गच्छति स्म[24] शनैः शनैः ॥४३॥
षट्कर्णो भिद्यते मन्त्रस्तावद्ध्यात्वेति मुञ्जराट् ।
पर्यङ्काधःस्थभार्यायाः खड्गेन च्छिन्नवान् शिरः[25] ॥४४॥

---

1. $B^1$ न वेत्तीत्यन्तरं कोपि । 2. $P^2$ and A ब(चा)ङ्ग° । 3. $P^2$ and A लज्जातुरे । 4. $P^2$, A and $B^1$ वामदक्षिणमालोक्य । 5. $P^2$, A, and $B^1$ जनो वर्तते सन्निधौ । 6. $P^2$, A, and $B^1$ वर्तते न हि कोऽपरः । 7. A and $B^3$ °वत्स । 8. $P^2$, A and $B^1$ न हि कोऽप्यन्तरं । 9. $P^2$ and A कि । 10. $P^2$ and A °णा° । 11. $P^2$ and A यथा । 12. $P^2$ °न्धुर्न हितवान् । 13. $P^2$ °तो । 14. $P^2$ मोहात्पृष्ठि करे कृत्वा । 15. $P^2$ and A वदते सिन्धुभूपतिः । 16. A °क । 17. $P^2$ and A हि । 18. $P^2$ and A रक्षणीयो हि मद्वचात् । 19. $P^2$ and A इह धात्री । 20. $P^2$ and A य,च्छाराज्यसंपदा । 21. $P^1$ , $P^3$ and L वार्धके । 22. $P^2$, A and $B^1$ परत्रं साधयाम्यहम् । 23. $P^2$, A and $B^1$ उत्थितो भूपतिस्ततः । 24. $P^2$ गच्छमानः । 25. A °रम् ।

खड्गखाट्कारमाकर्ण्य[1] द्रुतं व्याघुटितः स्वयम्[2] ।
दृष्ट्वा च तत्प्रतीकारं सिन्धुश्चिचत्ते[3] व्यचिन्तयत् ॥४५॥

राज्यश्रियं दयाहीनः पालयिष्यत्यसौ ननु[4] ।
विमृश्येत्यलके चक्रे शोणितेनास्य पुण्ड्रकम्[5] ॥४६॥

प्रातस्तु भूप आस्थाने ह्युपविष्टः सभान्वितः ।
आकारितः शिवादित्यो[6] रुद्रादित्यसुतान्वितः[7] ॥४७॥

नृपेणाप्रच्छि सोऽमात्य[8] एकान्तस्थानसंस्थितः[9] ।
मुञ्जाय दीयते राज्यं मन्त्रिमुद्रा सुते तव ॥४८॥

सुमन्त्रं मन्त्रयित्वेमं पृष्ट्वा ज्योतिषिकं नरम्[10] ।
मन्त्रिणां पश्यतां राज्ञा स्थापितो मुञ्जभूपतिः[11] ॥४९॥

रुद्रादित्याय मुञ्जेन मन्त्रिमुद्रा समर्पिता ।
सिन्धुराजेति कृत्वाऽभूत्परलोकार्थसाधकः ॥५०॥

अथ मुञ्जनरेन्द्रस्य राज्ये प्रमुदिताः प्रजाः[12] ।
धर्मकर्मपरा जाता भूपे पुण्याधिके सति ॥५१॥

विद्यया[13] विनयेनापि पाण्डित्येन विवेकतः[14] ।
मुञ्जभूपसमः कोऽपि विद्यते न हि भूपतिः ॥५२॥

पालयामास तद्राज्यं यौवराज्यं च[15] सिन्धुलः ।
सीमापालैर्नृपैः कैश्चिदाज्ञा नैवास्य लङ्घ्यते ॥५३॥

नागाधिपो बलैर्योऽस्ति[16] विवेकविनयैर्गुरुः[17] ।
रिपुतारागणे सूर्यो मुञ्जपादाब्जसेवकः ॥५४॥

ईदृग्गुणसमाश्लिष्टः[18] सिन्धुलः सिन्धुना समः[19] ।
सेवते मुञ्जभूपालं[20] सदाऽप्येकाग्रमानसः ॥५५॥ [युग्मम्]

---

1. $P^2$, A and $B^1$ तस्य खाट्कारकं श्रुत्वा । 2. $P^2$, A and $B^1$ °तो नृपः । 3. $P^2$, A and $B^1$ हृदि भूपो । 4. $P^2$ °ष्यति नान्यथा । 5. $P^2$, A and $B^1$ विमृश्येदं कृतं भाले तिलकं तेन शोणितम् ( $B^1$ शोणितैः ); L मुद्रकम् । 6. $P^1$ and A शिवादित्यः समाकर्ण्य । 7. A °समन्वितः । 8. $P^2$, A and $B^1$ °णामात्यकः पृष्टो । 9. $P^2$, A and $B^1$ मन्त्रमेकान्तसंस्थितः । 10. $B^1$ ज्ञातिमापृच्छ्य भूपतिः । 11. $P^2$, A, $B^1$, and $B^3$ स्थापितो मुञ्जभूनाथो मन्त्रिसामन्तपश्यतः । 12. $P^2$, A, and $B^3$ °ता प्रजा; L °ता नराः । 13. A विद्यायां; L विद्यावा । 14. $P^2$, A and $B^1$ विवेके विदुरेऽपि च । 15. $P^2$, A and $B^3$ युवराजोऽथ; $B^1$ युवराज्येऽथ । 16. $P^2$, $B^1$ and $B^3$ बले नागाधिको यस्तु । 17. $B^1$ and $B^3$ विवेके विनये गुरुः । 18. $P^2$, A, $B^1$ and $B^3$ ईदृग्गुणेन संयुक्तः । 19. $P^2$, A, $B^1$ and $B^3$ सिन्धुसादृशः । 20. $P^2$, A, $B^1$ and $B^3$ °भूपस्य ।

यदा यदा सदस्येति[1] सिन्धुलः शुद्धमानसः ।
लोहमय्यावुभे कुश्यौ[2] पाण्योर्लात्वाऽक्षिपत्क्षितौ[3] ॥५६॥

निष्कास्येते न केनापि सामन्तैः सुभटैरपि[4] ।
उत्थीयमानः सदसो[5] निष्कासयति ते स्वयम् ॥५७॥

मार्गदर्शक – आचार्य

[6]हृदि तन्मुञ्जभूपस्य पाट्करोति[7] दिवानिशम् ।
माता वदति मा[8] भेदं कदाचित्तनुजन्मना ॥५८॥

विनाशयत्यसौ मा मां राज्यं मा लाति[9] मामकम्[10] ।
दध्यौ यथा तथा तस्मान्मारणीयो मयाऽनुजः[11] ॥५९॥

क्रीडायै मुञ्जभूनाथो वने याति स्म चैकदा ।
स्कन्धे लोहकुशीं बिभ्रच्चैलकः सम्मुखोऽमिलत्[12] ॥६०॥

यौवनोन्मत्तलीलेन[13] कौतुकाक्षिप्तचेतसा[14] ।
अक्षेपि सिन्धुलेनास्यैव कण्ठेऽलङ्कृतिः कुशी[15] ॥६१॥

[16]तद्दृष्ट्वा मुञ्जभूनाथो [17]हृदयेऽतिचमत्कृतः ।
मारणीयो मया नूनमुपायेन यथा तथा ॥६२॥

गृहागतं समाहूय पट्टहस्त्यधिरोहकम्[18] ।
एकान्ते गूढमन्त्रेण शिक्षां दत्ते स्म भूपतिः[19] ॥६३॥

स्नानस्यावसरे[20] चेभं[21] ढौकयित्वा समुद्धतम्[22] ।
मारणीयो ममाज्ञातो राज्यद्रोही[23] हि सिन्धुलः ॥६४॥

अन्येद्युः सिन्धुलस्तत्रातिष्ठदास्थानमण्डपे[24] ।
भूपाज्ञया गजो मुक्तः [25]कण्ठेनोच्चैरवादि च[26] ॥६५॥

---

1. $B^1$ and $B^3$ सभां याति । 2. $P^2$ and A कुशलोहमयी ते द्वे । 3. $P^2$ and A कराभ्यां भूमिमाक्षिपत्; L पाण्या लात्वाऽऽक्षिपत् क्षितौ । 4. $P^1$ and $P^3$ °टैश्च ते । 5. A सभामुत्थीयमानः सन् । 6. $P^2$, A, $B^1$ and $B^3$ हृदये मुञ्ज° । 7. L पट्करोति । 8. $P^2$ and A यद् । 9. $P^2$ and A गृह्णाति । 10. $B^1$ and $B^3$ विनाशयति चास्माकं राज्यं गृह्णाति निश्चितम् । 11. $P^2$, A, $B^1$ and $B^3$ एवं ज्ञात्वा लघुभ्राता मारणीयो मयाऽधुना । 12. $P^2$, A, $B^1$ and $B^3$ °त्वागतः । 13. $P^2$, $B^1$ and $B^3$ लीलायां । 14. $P^2$, A, $B^1$ and $B^3$ मानसः । 15. $P^2$, A, $B^1$ and $B^3$ सिन्धुले ( $B^1$ and $B^3$ ) पतितस्यैव कण्ठाभरणवत् कुशिम् । 16. L तं । 17. $P^2$, A, $B^1$ and $B^3$ हृदयेन । 18. $B^1$ and $B^3$ गृहागते समाहूतः पट्टहस्त्यधिरोहकः । 19. $P^2$, A, $B^1$ and $B^3$ दापयते नृपः । 20. A, $B^1$ and $B^3$ स्नानावसके । 21. L वैनं । 22. $P^2$ and A समुद्धतः । 23. $P^2$, A and $B^3$ °ग्राही । 24. $P^2$, A, $B^1$ and $B^3$ तत्रोपविष्टः स्थान° । 25. $P^1$ and $P^3$ कण्ठे° । 26. $P^2$, A, $B^1$ and $B^3$ कण्ठोच्चस्वरकेऽवदत् ।

उन्मत्तः [1]सिन्धुरो याति न हि वश्यो ममापि च ।<br>
एवं वदति चायातः[2] सिन्धुलस्यैव[3] सन्निधौ ॥६६॥<br>
आयुधो नास्ति[4] किं कुर्मो दृष्ट्वा स्वामीं पुरः स्थिताम् ।<br>
गृहीत्वा पश्चिमौ पादौ हतः कुम्भस्थले गजः ॥६७॥<br>
मुनीदशनसंदष्टो गजोऽगच्छत्पराङ्मुखः[5] ।<br>
पुच्छं कृष्ट्वा कटी भग्ना सिन्धुलेन गजस्य हि[6] ॥६८॥<br>
भूपतिश्चिन्तयामासाधुना वैरं पटूकृतम्[7] ।<br>
पुच्छच्छेदो भुजङ्गस्येवात्र ज्ञेयोऽतिदुष्करः[8] ॥६९॥<br>
मुञ्जभूपत्यभिप्रायं नैव जानाति[9] सिन्धुलः ।<br>
शुद्धचित्तं यथाऽऽत्मानं तथा विश्वं स पश्यति ॥७०॥<br>
ज्येष्ठकौ[10] द्वौ समायातौ मर्दने कुशलौ कलौ ।<br>
सन्धिप्रोत्तारणे दक्षौ मल्लविद्याविशारदौ ॥७१॥<br>
सामन्तश्रेष्ठिसार्थेश[11]राजव्यापारकोक्तितः ।<br>
[12]कलाकौशल्यविख्यातौ श्रुतौ भूपेन तावपि ॥७२॥<br>
एकान्ते तौ[13] समाहूय ज्ञात्वा [14]मर्दनलाघवम् ।<br>
दानमानेन सम्मान्य राज्ञा वाचाऽभियाचितौ ॥७३॥<br>
भ्रातुः[15] सिन्धुलनाम्नो[16] मे मर्दनावसरे सति ।<br>
कलं पृष्ठौ समारोप्य विह्वलीकृत्य पूर्वतः[17] ॥७४॥<br>
निष्कास्य तस्य[18] नेत्रे द्वे दर्शनीये ममाग्रतः ।<br>
सेवकाः स्वामिभक्ताः स्युर्दोषो न हि कथञ्चन ॥७५॥<br>
मुञ्जराज्ञा यदादिष्टं ताभ्यां तन्मर्दने कृतम् ।<br>
अन्धः[19] सिन्धुलको जातः[20] को जाने कर्मणो गतिम् ॥७६॥<br>
शूरत्वं विक्रमत्वं च[21] पौरुषं च पराक्रमम् ।<br>
संग्रामे [22]वैरिघातत्वं गतं सर्वं विचक्षुषः[23] ॥७७॥

---

1. A °तसि° । 2. A, B[1] and B[3] वदन् समायातः । 3. P[2] and A °स्य च । 4. P[2], A, B[1] and B[3] न हि । 5. B[1] °खम् । 6. B[1] सिन्धुरे सिन्धुरस्य च । 7. P[2] वैरं प्रकटितं मुना । 8. P[2] and A दृष्टान्तोऽत्र तथाकृतम् । 9. P[2] नो जानातीह; B[1] and B[3] नो जानाति । हि । 10. P[2], A, B[1] and B[3] येष्ठिकौ । 11. P[3] °शाद् । 12. P[2] and A कौशल०; B[1] कुशल° 13. A and B[3] °न्तेन । 14. P[2] कर्म न । 15. P[2] भ्रातः ! । 16. P[2], A, B[1] and B[3] नामानं । 17. P[2], A, B[1] and B[3] कृतपूर्वकम् । 18. P[2], B[1] and B[3] पश्चान्निष्कास्य । 19. P[2] अथ । 20. P[2] and A यातः । 21. B[2] विक्रमं चित्तं; B[1] and B[3] विक्रमं वित्तं । 22. P[2], P[3], B[3] वैर० । 23. P[2], A, B[1] and B[3] गता सर्वे विचक्षुषः ।

निःशल्यत्वा[1]न्नृपस्तस्मै ग्रासग्रामादिकं बहु[2] ।
दत्त्वा निर्वाहयामास[3] पितुर्वाचं[4] विचिन्तयन् ॥७८॥
भार्याऽस्ति[5] सिन्धुलस्यापि[6] नाम्ना रत्नावलीति[7] या ।
साऽथ गर्भवती[8] जाता श्रुत्वा मुञ्जोऽपि[9] हर्षितः ॥७९॥
नवमासैरतिक्रान्तैः[10] [11]सार्धाष्टदिवसैः[12] पुनः ।
प्रसूतिसमये भूपाज्ञया ज्योतिषिकः स्थितः ॥८०॥
नरोऽन्येऽपि बहिर्द्वारे ज्योतिःशास्त्रविचक्षणाः ।
ज्योतिर्मण्डलमीक्षन्ते केचिच्चूडामणीधराः[13] ॥८१॥
धृत्वा वररुचिर्नारीवेषं तस्थौ गृहान्तरे[14] ।
प्रच्छन्नत्वेन लोकेन न ज्ञातः केनचित्पुनः[15] ॥८२॥
[16]अतीवशुभवेलायां शुभग्रहनिरीक्षिता ।
प्रसूतिर्बालकस्यासीज्झल्लर्या नाद उत्थितः ॥८३॥
बाह्यद्वारस्थितो[17] ज्योतिषिकः पृष्टो नृपेण च[18] ।
जातो दुष्टग्रहैर्बालो वने छुरलगतः शिरम् ॥८४॥
सूतिकागृहमध्यस्थो लिखित्वाऽक्षरचीरिकाम् ।
विमुच्य च[19] गृहद्वारे ययौ वररुचिर्बहिः ॥८५॥
मोचनाय वने तेन[20] राजादेशेन[21] ते नराः ।
मातुरुत्सङ्गस्थितं बालं लात्वा गच्छन्ति यावता ॥८६॥
तावद्द्वारस्थिता पत्री दत्ता मुञ्जस्य तैर्नरैः ।
वाच्यते स्म तु[22] [23]सामन्तैस्तन्मध्यस्थमिदं[24] यथा ॥८७॥
[25]पञ्चाशत्पञ्चवर्षाणि सप्त मासा[26] दिनत्रयम् ।
भोजराजेन भोक्तव्यः सगौडो दक्षिणापथः[27] ॥८८॥

---

1. $P^2$, A, $B^1$ and $B^3$° त्वे नृ° । 2. $P^2$, A, $B^1$ and $B^2$ °दिकान् बहून् । 3. $P^2$ and A निर्वाहयत्तस्मै । 4. $P^2$ वाचं; A and $B^1$ वाचां । 5. $P^2$ बालास्ति । 6. A, $B^1$ and $B^3$ पत्नी सिन्धुलक० । 7. L शोभावतीति । 8. $P^2$, A, $B^1$ and $B^3$ °वरा । 9. $P^2$, A, $B^1$ and $B^3$ °ति° । 10. $P^2$ °मासे क्ष°; $B^1$ °मासेऽप्य° । 11. $P^2$ °न्ते; $B^1$ °न्तैः (न्ते) । 12. $P^2$ °से । 13. $P^2$, $B^1$ and $B^3$ केपि चूडामणि धृत्वा पश्यन्ति ज्योतिमण्डलम् । 14. $B^1$ and $B^3$ वररुचिर्वनिताबेषधरो भूत्वा गृहान्तरे । 15. $P^2$, A, $B^1$ and $B^3$ प्रच्छन्नः सर्वलोकस्य न ज्ञातः केन कस्यचित् । 16. $P^2$, A, $B^1$ and $B^3$ अतश्च । 17. $P^2$, A and $B^3$ °द्वारे । 18. $B^1$ and $B^1$ ज्योतिः स्वयं भूपेन पृच्छितः । 19. $B^2$ मोचयित्वा । 20. $P^2$, A, $B^1$ and $B^3$ तस्मिन् । 21. $P^2$, $P^3$, L, $B^1$ and $B^3$ राज्ञाऽदे० । 22. $P^1$, A, $B^1$ and $B^2$ वाच्यमाना । 23. $P^2$ सा पत्री । 24. $P^2$, A, $B^1$ and $B^3$ मन्त्यादि(थैः) श्रूयते । 25. $P^2$, A, and $B^3$ उक्तं च-पंचा°; $B^1$ यथा-पंचा° । 26. L and $B^3$ °मास° । 27. $P^1$, $P^3$, A, L, $B^1$ and $B^3$ °क्षं····क्षे····थम् ।

मार्गदर्शक - आचार्य श्री सुविधिसागर जी महाराज



एवं ज्ञात्वा नृपाद्यास्ते[1] सर्वे हर्षवशंवदाः[2] ।
तं बालं स्थापयामासुः कृत्वा[3] वर्धापनं पुरे ॥८९॥
जन्मकुण्डलिका दृष्टा मुञ्जेन मुदितात्मना ।
परमोच्चपदप्राप्तास्त्रयस्तत्र ग्रहाः स्थिताः ॥९०॥
उच्चः केन्द्रस्थितो लग्नाधिपो[4]रिष्टनिवारकः ।
नवग्रहबलोपेता दृष्टा सा जन्मकुण्डली ॥९१॥
एवं हर्षवशाद्भूपो गृहे वर्धापनं घनम् ।
करोति स्म शुभोत्साहं[5] दानमानपुरःसरम् ॥९२॥
नामस्थापनमेतस्य[6] भोजराज इतीरितम् ।
कलाभिर्वा द्वितीयेन्दुर्ववृधेथ दिने दिने ॥९३॥
संजातः पञ्चवर्षीयो[7] लाल्यमानः स[8] सर्वदा ।
वल्लभो मुञ्जभूपस्य प्राणतोपि हि सर्वथा[9] ॥९४॥
[10]क्षिप्तो हर्षेण शालायां[11] पाठकाग्रे पठन् बहु ।
जिह्वायाः [12]प्रकटोच्चारोक्षरलेखेपि पण्डितः ॥९५॥
[13]क्रमाज्जज्ञेष्टवर्षीयः[14] कुमारोयं[15] गुणाधिकः ।
पट्टिकाक्षरसंयुक्ता दर्शिता मुञ्जभूपतेः ॥९६॥
प्रशस्तावयवै रम्यां समीचीनाक्षरावलीम् ।
[16]दृष्ट्वास्य सुगुणावासां मुञ्जो[17] विस्मयमाप्तवान्[18] ॥९७॥
विषवल्लीसमोस्त्येष[19] पोषितोनर्थकारकः ।
स्मरिष्यति वराकोयं वैरं[20] राज्यस्य [21]चात्मनः ॥९८॥
तन्मया बाल्यसंस्थोयं[22] मारणीयो हि नान्यथा ॥
अन्यथा यौवने प्राप्ते बालोयं मां हनिष्यति ॥९९॥

---

1. P², A, B¹ and B³ नृपादीनां । 2, P² and L गताः । 3. P², B¹ and B³ स्थापयित्वाथ ( P²तु ) तं बालं कृतं । 4. P², A, B¹ and B³ लग्नाधिपोथ (B¹ and B³ स्थ) केन्द्रस्थः सर्वा० । 5. P², A, B¹ and B³ महद्रुत्सा ( A च्छा ) हं । 6. P¹ °वास्य । 7. P², A, B¹ and B³ पञ्चवार्षिकको जातः । 8. P¹, A, B¹ and B³ °नो हि । 9. P², A, B¹ and B³ प्राणादपि हि सर्वदा । 10, A adds, before this verse, प्रशस्तावयवै रम्या मनोज्ञा पाक्षरावली । दृष्ट्वा रूपगुणावासं पुनर्विस्मयतां गतः ॥ 11. P², A, B¹ and B³ शालायां क्षिप्रहर्षेण । 12. P² and B¹ °यां सदृशो° । 13. P², A, B¹ and B³ क्रमेण ना° । 14. P² and A °वार्षिकः । 15. P², A, B¹ and B³ °रोभूद् । 16. P², A, B¹ and B³ दृष्ट्वा रूप° । 17. P², A, B¹ and B³ पुनर् । 18. P², A, B¹ and B³ °यतां गतः । 19. B¹ °ष्येष । 20. A चिरं । 21. P², A, B¹ and B³ राज्यं तथा° । 22. P², A, B¹ and B³ तदा मे बालकस्थोयं ।

एवं निश्चित्य भूपेन वधकाय निवेदितम् ।
संध्यायां भोजराजोयमागमिष्यति ते गृहे ॥१००॥
छित्वास्य शीर्षमस्माकं[1] दर्शनीयं त्वया ध्रुवम् ।
अनर्थो ह्यन्यथा युष्मत्कुटुम्बे हि भविष्यति ॥१०१॥

दत्त्वा शिक्षामिमां तेषां वधकाः प्रेषिता गृहे ।
संध्यायाः[2] समये प्राप्ते भोजस्यावाचि भूभुजा ॥१०२॥
गच्छ [3]चाण्डालमाहूय समानय ममान्तिके ।
नान्यः संप्रेष्यते कोपि कार्येस्मिन्वाम्यते स्वयम् ॥१०३॥
भूपाज्ञया गतो बालस्तच्चाण्डालकवेश्मनि ।
वधकैर्मध्यमाहूतो वधनस्य[4] मनोरथैः ॥१०४॥
भोजभूपं समालोक्य प्रदीपाग्रे विशेषतः ।
हस्तौ न वहतस्तेषामायुः[5]प्रबलतावशात्[6] ॥१०५॥ यथा[7]–
सरसांधीयै म बीहि बीहि म पांडेकाटीयै ।
लिहीयो पहिले दीहि घूटा विणपींषे नही ॥१०६॥

बालोप्यूचे कथं यूयमन्यथाकृतचेतसः ।
कृपापरा वदन्ति स्म शृणु बाल ! नृपोदितम् ॥१०७॥
तस्योक्तः सर्ववृत्तान्तः[8] श्रुत्वा बालोपि सोवदत्[9] ।
मां मारयन्तु भो भद्रा ! विलम्बो न विधीयताम्[10] ॥१०८॥
अन्यथा [11]मुञ्जराड् युष्मत्कुटुम्बस्यापि घातकः ।
जानीत मद्वधं प्रायो युष्माकं[12] शुभकारकम् ॥१०९॥
एतद्वचनमाकर्ण्य चाण्डालास्ते कृपापराः ।
मारणीयो न बालोयं यद्भाव्यं तद्भविष्यति ॥११०॥
तथाप्युपायः कर्तव्यः कृते कार्ये सुखं भवेत्[13] ।
बालशीर्षसदृक्शीर्षं कारितं चित्रकारकात् ॥१११॥
तावद्भोजकुमारेण जङ्घायाः शोणिताक्षरैः ।
क्षीरोदकपटे श्लोको लिखित्वैष समर्पितः[14] ॥११२॥

1. P², A, B¹ and B³ शीर्षं संक्षेपम॰ । 2. P², A, L and B³॰यां । 3. A च॰ । 4. P², A, and B³ वध्य(B³ च )काय । 5. A, B¹ and B³ ॰स्तस्य चायुः॰ । 6. P², A, B¹ and B³ ॰हेतुना । 7. B³ उक्तं च instead of यथा । 8. P², A, B¹ and B³ तस्योदितं च वृत्तान्तं । 9. A and B¹ भाषते । 10. P², A, B¹ and B³ ॰यतें । 11. P², A, B¹ and B³ मुञ्जभूपोसौ कु॰ । 12. P², A, B¹ and B³ मद्वधं तव जानीहि सर्वथा । 13. P², A, B¹ and B³ सुखाय यत् । 14. B¹ and B³ क्षीरोदकस्य पट्टेन लिखित्वा श्लोकमर्पितम् ।

अलक्तकेन[1] संलिप्य चलिता वधकास्ततः ।
मार्गं पश्यति यावद्राट्[2] तावत्तैर्दर्शितं[3] शिरः ॥११३॥

दृष्ट्वा[4] तद् भूपतेस्तस्मिन् प्रेममुल्लसितं महत् ।
वाण्या सगद्गदं राजा वधकान् पृच्छति स्म तान्[5] ॥११४॥

कण्ठच्छेदनवेलायां किंचित्तेनोक्तमस्ति वः[6] ।
पट्टान्तराक्षराण्यस्माकं दत्तानि गृहाण भोः ! ॥११५॥

सगद्गदगिरा भूपो वाचयत्यक्षरावलीम् ।
मुमोच नेत्रवारीणि दीर्घनिःश्वसितानि च[7] ॥११६॥ यथा[8]–

मान्धाता स[9] महीपतिः कृतयुगेलङ्कार[10]भूतो गतः
सेतुर्येन महोदधौ विरचितः क्वासौ दशास्यान्तकः[11] ।
अन्ये चापि युधिष्ठिरप्रभृतयो यावद्भवान् भूपते !
नैकेनापि समं गता वसुमती मन्ये त्वया यास्यति[12] ॥११७॥

श्लोकार्थं हृदये न्यस्य पुनः पृच्छति तान् नरान् ।
सत्यं वदत[13] मे बालो भवद्भिः किं हतो न वा ॥११८॥

बभाषिरे भयाक्रान्ता भूपाज्ञा केन लुप्यते ।
नृप ऊचेथ किं कुर्मः स्वजिह्वाया[14] विनाशितम् ॥११९॥ यथा-

आपण ही घंघे रीयो उरसा मुहां अंगार ।
दाझण लागो रे हिया तब तैं जांणी सार ॥१२०॥

दुःसहं[15] भोजदुःखं मे विस्मरेन्न[16] मृतिं[17] विना ।
एवं ज्ञात्वा स्वशीर्षस्य[18] च्छेदनायोद्यतोऽभवत्[19] ॥१२१॥

वारितो वधकैर्भूपस्तिष्ठ तिष्ठेति भाषणात् ।[20]
कुमारो विद्यमानोस्ति त्वत्परीक्षार्थमागताः ॥१२२॥

---

1. P² बालकूनेन । 2. P², A, and B¹ भूपस्तैस्° । 3. P², A, B¹ and B³ तावद्दर्शापितः( तं ) । 4. P¹ and P³ दृष्ट्वा (ष्टं?) । 5. P², A, B¹ and B³ पृच्छते वधकान् प्रति । 6. P², A, B¹ and B³ किंचिदुक्तं वचस्तव । 7. P², A, B¹ and B³ नेत्रवारिप्रवाहेन दीर्घनिःश्वसितेन च । 8. P² omits यथा । 9. A, B¹ and B³ मु° । 10. P², A, and B³ °रि° । 11. P² A, B¹ and B³ °कृत् । 12. L adds, after this verse, the following:—न धरणी धरणीधरसुंगई अभिलभूपति भूसुरसुंगई । गया पाण्डव कौरव ते धनी वसुमती किमहियइ आपणिम् । 13. P¹ and P³ वद त । 14. P¹ and P³ °जिह्वया । 15. L °हं° । 16. P², A, B¹ and B³ न विस्मार्यं । 17. A मृतं । 18. P², A, and B³ स्वयं शीर्षे । 19. P², A, B¹ and B³ °नाय सुसंवृतः । 20. P², A, B¹ and B³ भाषितम् ।

निजाङ्गभूषणै[1] राज्ञा वधका अपि सत्कृताः[2] ।
प्रमोदात्प्रेमपूरेणा[3]नीतो बालो[4] निजान्तिके ॥१२३॥
उत्सङ्गे स्थापितो बालः समाश्लिष्टः[5] पुनः पुनः ।
रुद्रादित्यादयोऽप्यन्ये समाहूताः स्वमन्त्रिणः ॥१२४॥
आत्मानं प्रकटीकृत्य रुद्रादित्याय भाषितम्[6] ।
राज्यं दास्यामि[7] भोजस्य न्यायमार्गो यदीदृशः ॥१२५॥
गणकैर्दत्तवेलायां भोजो राज्ये निवेशितः ।
गजवाजिरथाद्यतद[8]र्धाधिकृतमात्मनः ॥१२६॥
गोलाभिधनदीतीरं भोजराज्ञः समर्पितम् ।
परतीरसाधनार्थं स्वयं सैन्येन सोऽव्रजत्[9] ॥१२७॥
रुद्रादित्योऽवदत्तावत् स्वामिन् ! मे वचनं शृणु ।
मालवेन्द्र ! न गन्तव्यं[10] गोलापारे[11] जयो न हि ॥१२८॥
मुञ्जोऽवग्भोजसीमायां स्थातव्यं च मया न हि ।
गोलानदीं समुत्तीर्य साधनीयो हि तैलपः ॥१२९॥
प्रधाने दोषशङ्कायां[12] रुद्रादित्योऽवदन्नृपम्[13] ।
काष्ठं दत्त्वा हि पूर्वं मां पश्चात्कुरु यथोचितम् ॥१३०॥
मन्त्र्युक्तमपमान्याथ राज्ञो[14]त्तीर्णा तु सा नदी ।
नृपा[15] मूर्खाः स्त्रियो बाला न मुञ्चन्ति कदाग्रहम् ॥१३१॥
षट्सप्ततियुजेभानां चतुर्दशशतेन सः ।
तुरङ्गमै रथैर्युक्तः पदातिपरिवारितः ॥१३२॥
चतुरङ्गचमूयुक्तः संचचार यदा चितौ[16] ।
कम्पते स्म तदा पृथ्वी[17] कूर्मपृष्ठधृतापि सा ॥१३३॥ यथा—
दिक्चक्रं चलितं तथा जलनिधिर्जातो महाव्याकुलः
पाताले चकितो भुजङ्गमपतिः क्षोणीधराः कम्पिताः ।

1. $P^2$ and A °षणा रा° । 2. $P^2$ वधके सुसमर्पिताः; $B^1$ and $B^3$ निजाङ्गभूषणा भूपे वधकेस्तु समर्पिताः । 3. $P^2$, $P^3$, A, $B^1$ and $B^3$ °ण; L °क्षेण । 4. $P^2$, A, $B^1$ and $B^3$ समानीतो । 5. A, $B^1$ and $B^3$ उच्छंगे स्थापितं बालं समालिङ्गय । 6. $P^2$ °ता । 7. $P^2$ ददामि । 8. $P^2$ °वादीनाम° । 9. $P^2$, A, $B^1$ and $B^3$ स्वसैन्येन समं तावत् परतीराय गच्छति । 10. $P^2$, $B^1$ and $B^3$ °न्द्रावमा( चा )रम्य । 11. $P^2$ तीरे; $B^1$ and $B^3$ गोलोत्तीर्णे । 12. $P^2$, A and $B^3$ सं( सां )कर्यं । 13. $P^2$, A, and $B^1$ °नृपे । 14. $B^1$ and $B^3$ भूपेनापि तथा कृत्वा सैन्यो° । 15. $P^2$, A, $B^1$ and $B^3$ राजा । 16. $P^2$ महीम्; $B^1$ and $B^3$ मही । 17. $B^1$ and $B^3$ बाढं ।

श्रान्तं तत्पृ[1]थिवीतलं [2]विषधराः क्ष्वेडं वमन्त्युत्कटं
सर्वं वृत्तमनेकधा दलभरैरेवं चमूनिर्गमे ॥१३४॥

एवं मुञ्जनृपो यावत्सैन्येन परिवारितः ।
श्रुतस्तैल[3]पदेनापि देशसंधौ स [4]आगतः ॥१३५॥

क्रोधाध्मातमना दापयति स्मैषोपि डिण्डिमम् ।
उपद्रोति हि कः सीमां मम जीवति मय्यहो[5] ॥१३६॥

संमुखं स समायातः पत्तिसेवकसंवृतः[6] ।
दूतेन मालवेन्द्रस्य[7] भेदं विज्ञातवान् स तु[8] ॥१३७॥

उपायश्चिन्तितस्तावद्भूपतैलपदेन च ।
दूतं संप्रेषयामास मालवेन्द्रस्य संनिधौ ॥१३८॥

मम देशग्रहायास्ति यदि वाञ्छा तवाधिका ।
युद्धाय तर्हि चागच्छ[9] क्षेत्रेणैव मया सह ॥१३९॥

रे रे दूत ! निजस्वामी कथनीयो हि मद्वचः ।
भुज्यते कण्ठपादेस्थस्तस्य सामन्त्रणं कथम्[10] ॥१४०॥

दक्षिणाधिपति[11]र्वाचं[12] श्रुत्वा [13]दूतमुखात्ततः ।
विस्तारिता रणक्षेत्रे गोचरूपा अयोमयाः[14] ॥१४१॥

द्वयोः संनद्धयोः प्रातः सैन्ययोर्मुक्तदैन्ययोः ।
परस्परं हि[15] संजातः संग्रामः शूरसैनिकैः ॥१४२॥

बाणपूरेण सञ्छन्नं सकलं गगनाङ्गणम् ।
खड्गघा[16]ट्कारझात्का[17]रैर्विद्युद्द्योत इवाभवत् ॥१४३॥

शोणितानां नदी[18] जाता कबन्धानां च नाटकम्[19] ।
रणे शीर्षाणि हुङ्कारान् मुञ्चन्ति स्म धडं विना ॥१४४॥

भ्राम्यन्ते शून्यकेकाणाः सुभटाश्चायुधान् विना[20] ।
युध्यन्ति स्वामिनोर्थेन लम्बमानान्त्रजालकैः ॥१४५॥ यथा–

---

1. B[1] and B[3] भ्रान्तासुः पृ० । 2. P[2], A, B[1] and B[3] महाविष° । 3. P[2] A and B[3] °तं तैल° । 4. P[2], A, B[1] and B[3] °सन्धिं समा । 5. P[2] and A कि भूपे जीविते सति । 6. P[2], B[1] and B[3] पदातिः ( B[1] and B[3] पादात्य ) सेवकैर्वृतः । 7. A, B[1] and B[3] ज्ञातवन्द्रेदं (दो?) । 8. P[2], A, B[1] and B[2] मालवेन्द्रो नृपाधिपः । 9. P[2], A, B[1] and B[3] तदा युद्धाय मागच्छ । 10. P[1], P[3] and L omit this whole stanza । 11. P[1] and P[3] °तै° । 12. P[2] and A °चा । 13. P[2] °ङ्गु° । 14. P[2] and B[1] गोधकाकाप्ययोमया । 15. P[2], A, B[1] and B[3] च । 16. P[2] धात्का° । 17. A झंका° । 18. B[1] शोणितस्रोतसी । 19. A and B[1] कबन्धनृत्यमद्भुतम् । 20. P[2], B[1] and B[3] °धान्विताः ।

कृपाणः कम्पितप्राणः[1] कुन्तर्दन्तैरिवान्तकैः ।
बाणैर्भिन्नतनुत्रा[2]णैस्तस्याभूद्दारुणो रणः ॥१४६॥
सारसदीयैं पुडप्पडी समली चंपैं सीस ।
का गा रोलैं पिउ सुवैं धन्न हमारा दीस ॥१४७॥ पुनः[3]–
जिते च लभ्यते लक्ष्मीर्मृते चापि [4]सुराङ्गनाः[5] ।
क्षणविध्वंसिनी काया का चिन्ता मरणे रणे ॥१४८॥
एवंविधेपि[6] संग्रामे दाक्षिणो न निवर्तते ।
तावन्मुञ्जनृपेणापि प्रेरिताः सकला गजाः[7] ॥१४९॥
गजा यस्य बलं तस्य दुर्गं यस्य स निर्भयः ।
प्रजा यस्य धनं तस्य यस्याश्वास्तस्य मेदिनी ॥१५०॥
दुर्वारा दुःसहा दुष्टाः सिन्धुवेला इव द्विपाः[8] ।
समकालं समायाता रणभूमिं[9] मदोद्धताः ॥१५१॥
गोक्षुरैर्भिद्यमानास्ते चित्रन्यस्ता इव स्थिताः ।
भूपतैलपदेनापि प्रारब्धं दारुणं मृधम्[10] ॥१५२॥
हता मुञ्जगजाः[11] सर्वे गृहीता श्चाद्ध्योखिलाः ।
सामन्ता मन्त्रिणो भग्ना न ज्ञायन्ते क्वचिद्गताः ॥१५३॥ यथा–
जे जीमता अगलि घाट कूर पसाइ बीडेल हता कपूर ।
सुणी दमामारणढोलतूर भाजी[12] गया भांगड ते ज भूर ॥१५४॥ पुनः–
जे गर्व बोलैं बलि मुंछ मोडी घुंटी समीजे पहिरैं पछेडी ।
जे बांधता बारहथा जिफाडा ते नासता कोडि करैं पवाडा ॥१५५॥
एकाकी मुञ्जभूनाथः पादचारी विधेर्वशात् ।
स्थितः क्वापि प्रदेशे हि[13] जीविताशा हि दुस्त्यजा ॥१५६॥ यथा–
गय गय रह गय तुरिय गय गय पायक गय भिच ।
सग्गट्ठिय कारि मंतणउं महंता रुद्दाइच ॥१५७॥
अतिवाह्य दिनं तत्र क्षुधार्तो नृपतिस्ततः[14] ।
गोकुलेश[15] समासन्ने[16] गोकुलिन्या गृहे गतः ॥१५८॥

---

1. $P^1$, $P^3$ and L कृपाण्या तीक्ष्णया चापि । 2. L °प्रा° । 3. $B^1$ omits पुनः । 4. L व° । 5. P, A, $B^1$ and $B^2$ and L °ना । 6. L °विधि° । 7. $P^2$, A, $B^1$, $B^2$ and $B^3$ गजाः सर्वे प्रप्रेरिताः । 8. $B^1$, $B^2$ and $B^3$ सिन्धुवेलेव सिन्धुराः । 9. $P^2$ and A °मि° । 10. A, $B^1$, $B^2$ and $B^3$ युद्धदारुणम् । 11. A, $B^1$, $B^2$ and $B^3$ हतशक्तिगजाः । 12. $B^1$, $B^2$ and $B^3$ नासी । 13. $B^2$ and $B^3$ प्रदेशेन । 14. A, $B^1$, $B^2$ and $B^3$ °निर्गतः । 15. A, $B^1$, $B^2$ and $B^3$ क्षोभित । 16. $B^1$, $B^2$ and $B^3$ तदासन्नो ।

गोपाली मञ्चिकारूढा दध्यालोडयते वधूः ।
काचित्तापयति स्माज्यं विक्रीणाति च काप्यहो[1] ॥१५९॥
वध्वः सप्त सुताः सप्त महिष्योजाश्च धेनवः ।
गोपाल्यस्ति[2] सगर्वा सा नृपं द्वारस्थमैक्षत[3] ॥१६०॥
याञ्चा नैव कृता पूर्वं तेन नायाति याचितुम् ।
गोपालीं वीक्ष्य सद्गर्वां[4] भूपश्चेत्थं प्रजल्पति ॥१६१॥ यथा[5]–
गोआलिणि म गव्वु कारि पिक्खवि पडुरुआइं ।
छउदहसौ छहुत्तरा मुञ्जगयंद[6] गयाइं ॥ १६२ ॥
एतद्वचनमाकर्ण्य गोपाली स्वसुतानवक्[7] ।
रे रे गृह्णन्तु गृह्णन्तु मालवेन्द्रो हि मुञ्जराट् ॥ १६३ ॥
दत्त्वा मलीश्च गोपाल्या [8]बद्धो मालवभूपतिः ।
दत्तस्तैलपदेवस्य पश्यन्नपि दिशो दिशम् ॥ १६४ ॥
बन्धनान्मोचयित्वा च तैलपेनापि भाषितम् ।
गरिष्ठोसि[9] नृपास्मासु वाचां देहि ममाधुना ॥ १६५ ॥
यावद्वदाम्यहं नैव तावद्गम्यं न हि त्वया ।
प्रतिपद्य वचस्तस्य स्थितस्तत्रैव मुञ्जराट्[10] ॥ १६६ ॥
भोजनाच्छादने वस्त्रं ताम्बूलं स्वर्णभूषणम् ।
नित्यं चादापयद्भूपो दक्षिणाधिपतिः स्वयम् ॥ १६७ ॥
दासी मृणालिका [11]नाम मुञ्जशुश्रूषणाकृते ।
स्थापितास्ति दिवारात्रौ पर्युपास्ते च सा भृशम् ॥१६८॥
तदा[12]सक्तो हि भूनाथो विस्मृतं राज्यजं सुखम् ।
सन्तोषयति चात्मानं वेलां ज्ञात्वा यदीदृशीम्[13] ॥१६९॥
एकदावसरे स्नातोत्थितां दासीं मृणालिकाम् ।
जलबिन्दुस्रवां केशेष्वीक्ष्य[14] प्रश्नोत्तरं जगौ ॥१७०॥ यथा[15]–

---

1. B¹, B² and B³ तापयन्ते घृतं केपि विक्रीयन्ते च केचन । 2. A¹, B² and B³ गोकुलाग्या । 3. B¹, B² and B³ °स्वक्षित । 4. A and B² सगर्वा° गोकुली दृष्ट्वा । 5. B¹ adds : लज्जावारे इमहं असंपया भणइमधि रे मग्नि । दिण्हं , मा णकि वाडं देहित्तेन निम्नया वाणी । पुनः- । 6. P¹ and P³ कल्ले मुञ्ज । 7. A, B¹, B²and B³ वदते सुतान् । 8. A, B¹ and B² दुग्धमल्लैश्च गोपालैर्ब° । 9. A °ष्ठोस्मि । 10. A, B¹, B² and B³ भूपतिः । 11. A नाम्ना । 12. A, B¹, B² and B³ °या° । 13. A °शाम् । 14. A केशे दृष्ट्वा । 15. A and B³ omit thisword ।

मुञ्ज कि भणै मृणालीयै केसा काइं चुवंति ।
मृणाल्योक्तम्—
लाधो साउ पयोहरां बंधण भय रोहंति ॥१७१॥
तया प्रोक्तो[1] मुञ्जः पुनः पपाठ—
मुञ्ज कि भणै मिणालियै जुब्बण गयो म झूरि ।
जइ सकर समयखण्ड किय तो इति मिट्ठी चूरि ॥१७२॥
तयोः[2] प्रीतिवशादेवं[3] गते काले कियत्यपि ।
रुद्रादित्यवचः स्मृत्वा मुञ्जो वचनमब्रवीत् ॥१७३॥ यथा—
जे रहिया गोलातडिहिं हुँ बलिहारि तांह ।
मुञ्ज न दिट्ठो विहलियो रुद्धि न दिट्ठ खलांह ॥१७४॥
अतो भोजस्तु धारायां मुञ्जदुःखेन दुःखितः ।
सुरङ्गां दापयामास यावद् द्वादशयोजनीम्[4] ॥१७५॥
योजने योजने मुक्ता अतिवेगात्सुरङ्गमः ।
प्रचक्रमे च बुद्ध्यैवं मुञ्जानयनहेतवे[5] ॥ १७६ ॥
भोजनायोपविष्टोऽस्ति मुञ्जभूपतिरेकदा ।
तावद्भोज[6]नरेन्द्रस्य पत्री केनचिद्[7]र्पिता ॥ १७७ ॥
वाचयित्वा च वृत्तान्तं स्थापयित्वा च तं हृदि[8] ।
लग्नो भोक्तुं महीनाथो यत्किञ्चित्परिवेषितम् ॥ १७८ ॥
विदग्धचित्तया दास्या[9] चिन्तितं कारणं किमु ।
नोदितं मधुरं क्षारं नोक्ता[10] रसवतीगुणाः ॥ १७९ ॥
सकारणास्त्यसौ पत्री[11] वक्तुं योग्याथवा न हि ।
मूढं नृपं प्रति स्नेहादेवं दास्यवदत्क्षणात्[12] ॥ १८० ॥
मन्दस्वरेण स प्रोचे मुञ्जभूपोऽति[13]मन्दधीः ।
कथनीया न कस्यापि राजवार्ता त्वया[14] प्रिये ॥ १८१ ॥
सुरङ्गा भोजभूपेन[15] दापिता गुप्तवृत्तितः[16] ।
पर्यङ्काधः स्थिता सास्ति[17] वामपादेन तिष्ठति ॥ १८२ ॥

---

1. P¹ and P³ तदासक्तो । 2. A, B¹, B² and B³ एवं । 3. A, B¹, B² and B³ °स्तेषां° । 4. L योजनम् । 5. B¹, B² and B³ मुञ्जमा( स्या )नयनार्थं च बुद्धिमेवं प्रचक्रमे । 6. A, B¹, B² and B³ पत्री भोज° । 7. A, B¹, B² and B³ केनापि हि सम° । 8. A, B¹, B² and B³ स्थापित° हृदयेन तत् (B³ च) । 9. A, B¹, B² and B³ दासी विदग्धचित्ता सा । 10. B¹, B² and B³ क्षारमम्ला । 11. A, B¹, B² and B³ सकारणामिमां पत्रीं । 12. A, B¹, B² and B³ स्नेह ( B¹, B² and B³ ह्रान ) मूढमतिर्भूपो वचोऽप्येवं प्रचक्रमे । 13. A हि । 14. A तव । 15. L भूपभोजेन । 16. B³ सिद्धा दापापितापि हि । 17. A, B¹, B², and B³ नूनं ।

तव स्नेहवशाद्भद्रे ! न गन्तुं शक्यते मया ।
यदि सार्थे ! समायासि ह्यावाभ्यां गम्यते तदा ॥१८३॥
मृणाल्यूचे ततः स्वामिन् ! भव्यं किं स्यादतः परम् ।
यावत्पेटामानयामि तावत्स्वामिन् ! विलम्ब्यताम् ॥१८४॥
कृत्रिमस्नेहया दास्या बहिरागत्य चिन्तितम् ।
तावत्प्रेमास्ति मय्यस्य[1] यावदत्रैव तिष्ठति ॥१८५॥
गृहे गतो ह्यसौ कन्याः[2] परिणेष्यति भूरिशः[3] ।
गुरुस्वरेण फूत्चक्रे पापिष्ठैवं विचिन्त्य सा[4] ॥१८६॥
याति याति नृपो मुञ्जः सुरङ्गाध्वनि सांप्रतम्[5] ।
तावदाकृष्य पर्यङ्के लत्तां दत्त्वा[6] नृपः क्षणात् ॥१८७॥
कण्ठं यावद्गतो भूम्यां वेण्यां तावद्धृतो नरैः ।
समाकृष्य बहिर्नीतो दाक्षिणात्यनृपाग्रतः ॥१८८॥
गतवाचोसि रे धृष्ट ! मुखं मा दर्शयात्मनः[7] ।
पापं तवाधुना दुष्ट ! पतिष्यति शिरस्यरे ! ॥१८९॥
दुष्टसंज्ञाभिभूतस्य मुञ्जस्याभूत्पराभवः ।
न विच्छायं मुखं तस्य[8] न दीनं[9] वचनं क्वचित् ॥१९०॥
भूपाज्ञया मुञ्जभूपो भिक्षायै भ्राम्यते पुनः ।
मर्कटेन[10] यथा योगी भ्राम्यतेथ[11] गृहे गृहे ॥१९१॥ मुञ्ज ऊचे—
झोली तुट्टवि किं न मुअ हुओ न छारह पुंज ।
घरि घरि भिक्ख भमाडीयै जिम मकड तिम मुंज ॥१९२॥
कस्यचिच्छ्रेष्ठिनो गेहे[12] मण्डकं खण्डितं वधूः ।
घृतबिन्दुस्रवं दत्ते[13] मुञ्जोपि[14] श्लोकमब्रवीत् ॥१९३॥
रे रे मण्डक ! मा रोदीर्यदहं[15] खण्डितोनया ।
रामरावणभीमाद्याः स्त्रीभिः के के[16] न खण्डिताः[17] ॥१९४॥

---

1. $B^2$ मुञ्जप्रेम मयि तावद् । 2. A, $B^1$, and $B^2$, $B^3$ गते गृहे नवनवीं । 3. A, $B^1$ and $B^3$ कन्यकाम् । 4. A, $B^1$ and $B^2$ एवं संचिन्त्य पापिष्ठया पूत्कृतं च गुरुस्वरैः । 5. A, $B^1$, $B^2$ and $B^3$ मार्गगे पुनः । 6. A लात्वा दत्तां । 7. A°नम् । 8. A किंचित् । 9. A, $B^1$, $B^2$ and $B^3$ °न° । 10. A, $B^1$, $B^2$ and $B^3$ °टस्य । 11. A, $B^1$, $B^2$ and $^3$ स । 12. A, $B^1$, $B^2$ and $B^3$ कस्मिन् श्रेष्ठिगृहे नीतो । 13. $B^1$, $B^2$ and $B^3$ पश्यन् । 14. A, $B^1$, $B^2$ and $B^3$ °ञ्ज° । 15. A, $B^1$, $B^2$ and $B^3$ यथा—मण्डक ! मा कुरूद्वेगं यदहं । 16. A°द्या योषिद्भिः के । 17. A and $B^3$ add, after this verse : रे रे यन्त्रक ! मा रोदीर्भामिनीभ्रामितो यदि । कटाक्षक्षेपमात्रेण करलग्नस्य का कथा ॥

भ्रामयित्वा गृहान् सर्वानानीतोऽथ चतुष्पथे ।
द्रव्यान्धश्रेष्ठिनं कश्चिद् दृष्ट्वाग्रे[1] स्थापितो नरैः ॥१९५॥

वणिजो मुञ्जमापश्यन्[2] हास्यं च कुरुते मुखात् ।
गृहीत्वा[3] राज्यमस्माकमागतः पश्यतां श्रियम् ॥१९६॥

एतद्वचनमाकर्ण्य प्रोचे मुञ्जनरेश्वरः ।
रे द्रव्यान्ध ! न जानासि गतिं कर्मण ईदृशीम् ॥१९७॥ यथा–

आपद्गतं[4] हससि किं द्रविणान्ध ! मूढ !
लक्ष्मी स्थिरा न भवतीति किमत्र चित्रम् ।
एतन्न[5] पश्यसि घटीजलयन्त्रचक्रे[6]
रिक्ता भवन्ति[7] भरिता भरिताश्च रिक्ताः ॥१९८॥

तां पुरीं[8] भ्रामयित्वा स शूलायामधिरोपितः[9] ।
कर्मणो गतिमालोच्य श्लोकं मुञ्जः पठत्यमुम्[10] ॥१९९॥ यथा–

अघटितघटितानि [11]घटयति सुघटितघटितानि जर्जरीकुरुते ।
विधिरेव तानि [12]जनयति यानि पुमान्नैव[13] चिन्तयति ॥२००॥

दासीसंसर्गतो मृत्युं विज्ञायासन्नमागतम् ।
तदा पुनः पपाठैकं श्लोकं जनमनोहरम् ॥२०१॥ यथा[14]–

[15]वेसा छंडी वडायिति जे दासी रचंति ।
ते किर मुंजनरिंद जिम परिभव घणा[16] सहंति[17] ॥२०२॥

धारायां भोजभूपेन श्रुता वार्ता जनोक्तिभिः ।
शूल्यां तैलपदेनापि मुञ्जभूपोधिरोपितः ॥२०३॥

क्व[18] तरुरेष महावनमध्यगः क्व च वयं जगतीपतिसूनवः ।
अघटमानविधानपटीयसो दुरवबोधमहो ! चरितं विधेः ॥२०४॥

करोटिर्मुञ्जभूपस्य दक्षिणाधिपसंसदि ।
मुच्यते दधिपूर्णा सा भक्ष्यते वायसैस्ततः ॥२०५॥

---

1. $B^1$ and $B^2$ °श्रेष्ठिकस्यपि दृष्ट्वाग्रे । 2. $P^2$ °श्यापस्य । 3. $B^1$ गृहीतुं । 4. $P^2$ °तौ; $B^1$, $B^2$ and $B^3$ °तान् । 5. $B^1$ and $B^2$ एता न । 6. $P^2$ and $B^1$ and $B^2$ °चक्रे । 7. $P^2$ and A भरन्ति । 8. $P^2$ तत्पु° । 9. L °पिरो° । 10. Instead of this stanga, A has : ऐश्वर्यतिमिरं चक्षुः पश्यतोऽपि न पश्यति । दरिद्रांजनयोगेन पुनर्विमलतां भजेत् ॥ 11. $P^1$, $P^3$ and L जन° । 12. $P^2$ and $B^1$, $B^2$ and $B^3$ घट° । 13. A °नेव । 14. $P^2$ and A omit this word । 15. L जो° । 16. गणा । 17. L हसंति । 18. $B^1$ यतः–क्व तरु° etc. ।

तच्छ्रुत्वा सिन्धुलोप्येवं भ्रातृदुःखेन दुःखितः ।
आक्रन्दयति भूपीठे लुठत्येवं प्रजल्पति ॥२०६॥ यथा[1]–
अद्धा अद्धा नयणला जइ मूं मुंज नलिंत[2] ।
अरिकामिणी थोरंसुयहिं महि निब्बोल करंत[2] ॥२०७॥
अद्धा अद्धा नयणला जइ मूं मुंज नलिंत[2] ।
सत्तय सायरसभरमरि महि सिन्धुल भुञ्जति[3] ॥२०८॥
गूढकोपधरो भूपो न ज्ञापयति कस्यचित् ।
विज्ञातं तु प्रमाणं तत् कृतं यद्दुष्टगोपनम्[4] ॥२०९॥ यतः[5]–
लक्खण एह वियक्खणा जे लक्खणा न जंति[6] ।
ताम रसायण ताम विस हियइ हसंत धरंत[7] ॥२१०॥
पुनः[8]–विरल इव हतै पूर नमीज वेला नीगमैं ।
तेथायैं धर धीर वेडस जिम विलसै वली ॥२११॥
श्रुते मुञ्जस्य मृत्यौ राट् सभालोकमभाषत[9] ।
गुणाः सर्वे निराधारा मुञ्जभूपं विना भुवि ॥२१२॥ यथा–
लक्ष्मीर्वसति[10] गोविन्दे[11] वीरश्रीर्वीरवेश्मनि ।
गते मुञ्जे यशःपुञ्जे निरालम्बा सरस्वती[12] ॥२१३॥
एकदा भोजभूनेतोपविष्टोस्ति[13] सभान्तरे[14] ।
सरस्वतीकुटुम्बाख्यो द्विज एकः समागतः ॥२१४॥
दत्त्वाशिषं नरेन्द्रस्योपविष्टो दत्त आसने ।
पृष्टश्च मन्त्रिवर्गेण नामाप्यद्भुतकश्रियम् ॥२१५॥
द्विज ऊचे[15]–बापो विद्वान् बापपुत्रोपि विद्वान्
आई विदुषी आइधूआपि विदुषी ।
काणी चेटी सापि विदुषी वराकी
राजन् ! मन्ये प्राज्ञरूपं कुटुम्बम् ॥२१६॥
रक्षकैराज्ञया[16] नीतो रजकस्य गृहे द्विजः ।
वस्त्राणि चालयन् [17]दृष्टस्तस्याग्रे पण्डितोवदत् ॥२१७॥

---

1. P³ and L omit this word । 2. L °ति । 3. B¹, B² and B³ घर घर सिन्धुल तुह भुजंति । 4. P² and A वा दुष्ट° । 5. P² and A यथा; P³ omits this word । 6. B¹ न जयंति । 7. B¹, B² and B³ धरंति । 8. P¹ omits this word । 9. P², A, B¹, B² and B³ मुञ्जप्रतीकारे विद्वज्जनम° । 10. P², A, B¹, B² and B³ लक्ष्मीर्यास्यति । 11. A गोविन्दो । 12. L and B³ सरस्वति ! । 13. P², A, L, B¹, B² and B³ भूनाथो° । 14. P² and A °ष्टास्थानमण्डपे । 15. P² उवाच । 16. P² भूपाज्ञारक्षितो; B² and B³ राजाज्ञारक्षकैर्° । 17. L दृ° ।

[1]रे रे साटकमलनिर्घाटिक पाटकपटकपटीरक ।
अस्मिन् नगरे वद[2] का का वार्ता ॥२१८॥

रजक ऊचे[3]–

अश्वा वहन्ति नगराणि सतोरणानि
गावश्चरन्ति कमलानि सकेसराणि ।
नीलं पयो दधिषु नास्ति तिलेषु तैलं
प्रासादशैलशिखरेषु मृगाश्चरन्ति ॥२१९॥

न स्थितिं[4] तद्गृहे ज्ञात्वानीतोऽन्यत्र स [5]पण्डितः ।
बालिकालापिता तेन कासि त्वं किंकुलोद्भवा[6] ॥२२०॥

बालिकोचे–

मृतका यत्र जीवन्ति निश्वसन्ति गतायुषः[7] ।
स्वगोत्रे कलहो यत्र तस्याहं कुलबालिका ॥२२१॥

कुम्भकारगृहेऽन्यत्र नीतः पण्डितपौरुषैः ।
मिलिता तत्सुता द्वारे पृष्टा कस्य गृहं वदः ॥२२२॥

बालिकोचे–

पर्वताग्रे रथो याति भूमौ तिष्ठति सारथिः ।
चलते[8] वायुवेगेन पदमेकं न गच्छति ॥२२३॥

एवं भ्रान्त्वा पुरीं सर्वां[9] पुलिन्दकुटिकां[10] गतः ।
वसतिं यावदीचेत पुलिन्दी तावदुत्थिता ॥२२४॥

पलं करे समादाय गता भोजसभान्तरे ।
पूर्वं दत्त्वा[11] नरेन्द्राग्रे प्रश्नोत्तरवचो जगौ ॥२२५॥ यथा—

देव ! त्वं जय, कासि ? लुब्धकवधूः, पाणौ[12] किमेतत् ? पलं,
क्षामं किं ? सहजं ब्रवीमि नृपते ! यद्यस्ति ते कौतुकम् ।
गायन्ति त्वदरिप्रियाश्रुतटिनीतीरेषु सिद्धाङ्गनाः[13]
गीतान्धा न चरन्ति भोज ! हरिणास्तेनामिषं दुर्बलम् ॥२२६॥

---

1. A, $B^1$, $B^2$ and $B^3$ add यथा before this verse । 2. L has च instead of वद which is omitted by $B^1$ and $B^3$ । 3. $P^1$ and $P^3$ यथा; $P^2$ प्रोचे; the whole is omitted by L । 4. $P^1$ and $P^3$ °तिः; L, $B^1$, $B^2$ and $B^3$ °तं । 5. $P^2$ °तोऽप्यन्यत्र प° । 6. $P^2$ कः कुलोद्भवः । 7. A. °षा । 8. A °ति । 9. $P^3$ and L भ्रान्ता पुरी सर्वा । 10. L °कां । 11. $P^2$, A, $B^1$ and $B^3$ नत्वा । 12. $P^1$, $P^3$, L and $B^2$ °धूर्हस्ते । 13. L दिव्याङ्गनाः ।

पुरं विद्वन्मयं[1] ज्ञात्वा [2]क्वचित्पटकुटी[3]स्थितः ।
श्रुतमेतस्य पाण्डित्यं राज्ञा चाकारितस्ततः[4] ॥२२७॥
सरस्वतीकुटुम्बस्य शिशुर्भूपसभां गतः ।
वर्षर्तुवर्णनं सद्यः कुरु तत्पण्डिता जगुः ॥२२८॥ यथा[5]–
वर्षाकाले प्रणाले पलहलमुदके याति पाले विशाले
चिक्खल्लोलिप्सयित्वा पडहडपडिउं लंबगुड्डो मणूसो ।
चुल्लीगेहस्स मज्झे कुरु कुरु खनते कुर्कुरो वड्डपड्डं
सुन्नागारस्स मज्झे टहरितकरणो रासभो रारटीति ॥२२९॥
श्लोकं श्रुत्वा जहसुस्ते[6] भूपपार्श्वजुषः[7] शिशोः ।
रासभो रारटीत्यादि ज्ञात्वा[8] विद्वांसलक्षणम् ॥२३०॥
भूपेनोक्तं रारटीति क्रिया येन प्रयुज्यते ।
न हि सामान्यविद्वान् स मुधा हास्यं न युज्यते[9] ॥२३१॥
सरस्वतीकुटुम्बोपि सकुटुम्बः समागतः ।
दत्त्वाशिषं समासीनो[10] मालवेन्द्रसभान्तरे ॥२३२॥
[11]सत्कृत्य पूर्वं किल मानदानैः
समस्तदेः संस्तवनस्य हेतोः ।
पृष्टा समस्या नृपभोजराज्ये
प्रवालशय्याशरणं शरीरम् ॥२३३॥

सरस्वतीकुटुम्ब उवाच–
एतद्भूप ! वचः सत्यं[12] पूर्तिं स्वसमस्यया ।
[13]त्वत्प्रतापेन भूपीठे यत्कृतं तत्तथा[14] श्रृणु ॥२३४॥
यथा–तव प्रतापज्वलनाज्जगाल हिमालयो नाम नगाधिराजः ।
चकार मेना विरहातुराङ्गी प्रवालशय्याशरणं शरीरम् ॥२३५॥
कवित्वं भोजभूपेन श्रुतमद्भुतवाचिकम्[15] ।
तत्सुतस्य[16] नृपोवादीदसारात्सारमुद्धरेत् ॥२३६॥
यथा[17]– दानं वित्तादृतं वाचः कीर्तिधर्मौ[18] तथायुषः ।

---

1. $P^2$, A, $B^1$, $B^2$ and $^3$ एवं विद्वज्जनं । 2. L °पत्र° । 3. $P^1$, $P^3$ $B^1$ and $B^2$ °टी । 4. $P^2$, A, $B^2$ and $B^3$ विद्यार्थी प्रेषितो नृपे । 5. It is omitted by $P^1$, $P^2$, A and L । 6. A, L and $B^3$ श्रुत्वा जहास तत् श्लोकं । 7. A गतः; L °र्श्वे युवा । 8. $P^2$ °तं । 9. $P^2$, A, $B^1$, $B^2$ and $B^3$ कार्यते । 10. $P^1$ and $P^3$ शिशुं समानीतो । 11. $P^1$ and $P^3$ add भोजः– । 12. $P^2$ एतत्सत्यवचो भूप ! । 13. $P^2$ त° । 14. L °तः । 15. $P^2$ °चकार । 16. A तत्समस्या( स्यां )। 17. $P^2$, $P^3$, L, $B^1$, $B^2$ and $B^3$ तद्यथा । 18. $P^2$ कीर्तिं धर्मं ।

मार्गदर्शक - आचार्य श्री सुविधिसागर जी महाराज



परोपकरणं[1] कायादसरात्सारमुद्धरेत् ॥२३७॥
तत्सुतस्य[2] वचः श्रुत्वा सभासदसमन्वितः ।
समस्यां तत्प्रियाग्रेवग् भूपः प्राकृतभाषया ॥२३८॥

यथा–किहि मुह पाऊं पीर
एतत्सत्यं[3] त्वया प्रोक्तं समस्यायां प्ररूपितम्[4] ।
श्रूयतामेकचित्तेन पूरयामि तवाग्रतः ॥२३९॥
[5]जिहिं दिणि रावण जाईयो दहमुह इकसरीर ।
माय वियंभी चिंतवै किहि मुह पाऊं पीर ॥२४०॥
प्राकृतेपि विदग्धां तां[6] ज्ञात्वा कोविदकाग्रणीः ।
विनोदेनापि चेटयग्रे समस्यां प्राकृतेवदत्[7] ॥२४१॥

यथा[8]–कंठविलल्लइ काउ ।
का णवविरहकरालीयो उड्डीय गयो वलाउ ।
दिट्ठु अचब्भूय उ हूयउ कंठविलुलइ काउ ॥२४२॥
चेटया अपि च विद्वत्त्वं[9] ज्ञात्वा नृपशिरोमणिः ।
तत्सुतायाः परीक्षार्थं समाहूता सभान्तरे ॥२४३॥
व्यामोहितस्तु तद्रूपे भूपतिर्भूमिवासवः ।
सच्छत्रं तं समालोक्यारम्भ स्तवनं कनी ॥२४४॥ यथा–
राजन् ! मुञ्जकुलप्रदीप ! सकलक्ष्मापालचूडामणे !
युक्तं [10]सञ्चरणं तवात्र भुवने छत्रेण रात्रावपि ।
मा भूत् त्वद्वदनावलोकनवशाद् व्रीडाविलासः[11] शशी
मा भूच्चेयमरुन्धती भगवती दुःशीलताभाजनम् ॥२४५॥
विवेकं विनयं विद्यां विद्वत्त्वं[12] च विदग्धताम्[13] ।
सर्वानपि गुणान् कन्या[14] दृष्ट्वा भूपो व्यचिन्तयत् ॥२४६॥
राज्ञा[15] लब्धं द्विजायादाद्[16] गुणैः किं किं न लभ्यते[17] ।
तत्सुतायाः स्फुरद्रूपव्यामोहेन विशेषतः[18] ॥२४७॥

---

1. $P^2$ and L °कार° । 2. A तत्समस्या° । 3. $P^1$ °च्छत्यं । 4. $P^2$° स्यायाः प्रपूरणम् । 5. $B^1$ and $B^3$ add तद्यथा । 6. $P^1$, $P^3$, A, L, $B^1$, $B^2$ and $B^3$ °थां स्तान् । 7. $P^1$ and $P^3$ °कृतामवक् । 8. L omits यथा । 9. $P^2$, A, $B^1$, $B^2$ and $B^3$ विद्वत्त्वं चेटिकायाश्च । 10. L संच° । 11. $P^2$ and A विलक्ष्य(क्ष:); $B^1$ विलक्ष: । 12. $P^2$, A and $B^2$ विद्याविद्वत्त्वे । 13. $P^2$ and A °ता । 14. $P^2$ and A गुणाः सर्वेपि कन्याया° । 15. A °ज्ञा । 16. A द्विजे दत्त° । 17. $P^2$, A, $B^1$ and $B^2$ न वाप्यते । 18. $P^1$ and $P^3$ विशेषित: ।

मार्गदर्शक - आचार्य श्री सुविधिसागर जी महाराज



भूपानुरागिणी कन्या साप्यभूद्गुणमञ्जरी ।
परिणीता शुभे लग्ने भूभुजा[1] तत्पिताज्ञया ॥२४८॥
एवं पालयतो राज्यं मालवेन्द्रस्य[2] सर्वदा ।
ये के सीमालभूपालाः सर्वेप्याज्ञावशंवदाः ॥२४६॥
नाटकं मुञ्जभूपस्यान्यदारब्धं च नर्तकैः ।
सभायां भोजभूपस्य सर्वं तैलपदोद्भवम् ॥२५०॥
वनौकोवद्यथा भिक्षां भ्रामितः स गृहे गृहे ।
नाटकं दर्शितं सर्वं करोटिं यावदाश्रितम् ॥२५१॥
तं दृष्ट्वा भोजभूपालो यावत्कोपारुणेक्षणः ।
भटो वैदेशिकः कोपि तावत्प्रोवाच संसदि ॥२५२॥
भोजराज ! मम स्वामिन् ! सत्यं नाटकलक्षणम् ।
[3]पूर्यन्ते सर्वचिह्नानि हस्ते मुञ्जशिरो विना ॥२५३॥
एवं क्रोधान्नृपोप्याह नामेदं मे निरर्थकम् ।
मूर्ध्ना तैलपदेवस्य कन्दुवच्चेद्रमामि[4] नो ॥२५४॥
[5]ज्ञात्वाथावसरं भूपश्चतुरङ्गचमूवृतः ।
गत्वा तैलपदे(दं) भूपं जित्वा संग्राममूमिषु ॥२५५॥
पुण्याधिकेन भोजेन[6] बद्ध्वानीतो निजान्तिके ।
विडम्बितो यथा मुञ्जस्तथा सोपि दुराशयः[7] ॥२५६॥
[8]निःशल्यं च[9] तदा[10] जातं हृदयं[11] भोजभूपतेः ।
निष्कण्टका च राज्यश्रीः पाल्यते स्माथ तेन सा[12] ॥२५७॥
देवशर्मा शिवादित्यो विप्रः सर्वधरस्तथा[13] ।
महाशर्माप्यमी तस्य[14] पौरोहितपदानुगाः[15] ॥२५८॥
देवशर्मसुतो धारां वसते भोजसन्निधौ ।
द्विजो वररुचिर्नामाप्यर्धराज्यधुरन्धरः ॥२५६॥
श्रीमालपुरवास्तव्यः[16] शिवादित्यस्य[17] नन्दनः ।
माघपण्डितनामास्ति माघकाव्यस्य कारकः ॥२६०॥

---

1. $P^2$ and A भूपतेस् । 2. $B^1$ and $B^2$ एवं पालयते....न्द्रो हि । 3. A पूर्यते । 4. $P^2$ and A °नि । 5. $P^2$ ज्ञात्वावसरं भूनाथ° । 6. L भूपेन । 7. A मुञ्जो भूपेन तत्तथा कृतम्; $B^2$ मुञ्जो भूपेन स तथाकृतः । 8. A वि° । 9. $P^2$, A, $B^1$ $B^2$ and $B^3$ हि । 10. L तथा । 11. A हृदये । 12. $B^2$ पालयमानां निरन्तरम् । 13. $P^2$, A, $B^1$, $B^2$ and $B^3$ °धरः स्मृतः । 14. $P^2$, A, $B^1$, $B^2$ and $B^3$ °र्मसुता एते । 15. $P^1$ and $P^3$ °हित्य° । 16. $P^2$ श्रीमालवपुरेजातेः (तः); A श्रीमालवपुरे वासः । 17. $P^2$, A, $B^1$, $B^2$ and $B^2$ शिवदत्तस्य ।

अवन्तीपुरवास्तव्यो नाम्ना सर्वधरो द्विजः ।
[1]धनपालशोभनौ[2] द्वौ नृपामात्यौ तदङ्गजौ[3] ॥२६१॥
सिद्धसेनक्रमायाताः[4] सुस्थिताचार्यनामकाः[5] ।
भव्यानां बोधहेत्वर्थमुज्जयिन्यां समागताः[6] ॥२६२॥
श्रुतं सर्वधरेणापि गुरोरागमनं तदा ।
गमनागमनेनापि प्रीतिर्जाता गुरोः समम् ॥२६३॥
एकदा गृहमानीताः [7]प्रकृष्टविनयेन ते[8] ।
पृच्छति क्वापि किमपि[9] द्रव्यं मुक्तं न वाप्यते ॥२६४॥
हसित्वा गुरुराचख्यौ प्राप्यतेऽर्थस्तदा किमु ।
दद्मि स्वामिन् ! विभज्यार्धं[10] प्रोक्तमेवं पुरोधसा ॥२६५॥
तस्योक्त्या[11] भूमिका[12] सम्यग् दीर्घं [13]विस्तारमाप्यत ।
भूगालं दर्शयित्वा च तद् द्रव्यं मङ्क्षु [14]दर्शितम् ॥२६६॥
निष्कास्य निधिं[15] पुञ्जौ द्वौ कृत्वा सर्वधरद्विजः ।
गुरुं विज्ञापयामास गृहाणार्धं धनं प्रभो ! ॥२६७॥
कार्यं न निधिनोवाच गुरुः स्मर निजं वचः ।
द्विजोवग्यन्मयाख्यातं तद् धनं ददस्म्यहम् ॥२६८॥
किं धनं क्रियतेऽस्माकं गुरुः प्राहर्षयो वयम् ।
द्वयोरेकं सुतं दत्त्वा स्ववाचातोऽनृणीभव[16] ॥२६९॥
गुरोर्वचनमाकर्ण्य स्थितस्तूर्ष्णीं द्विजोत्तमः ।
वचनर्णमिदं[17] शल्यं संजातं मरणाधिकम्[18] ॥२७०॥
कियत्यपि दिने सोऽथ[19] संजातो रोगपीडितः ।
अवसानक्रिया सर्वा कृता पुत्रैर्यथाविधि ॥२७१॥
दुःस्थावस्थां समालोक्य पुत्र ऊचे पितुस्ततः[20] ।
पुण्यवाञ्छा[21] तवास्ते या तां मदग्रे[22] निवेदय ॥२७२॥

---

1. $P^2$ and A °पाल: । 2. $P^2$ and A °नो । 3. $P^2$, A, $B^1$, $B^2$ and $B^3$ माननीयो नृपालये । 4. L °तः । 5. L °कः । 6. $P^2$ °गमन्; L °गमत् । 7. $P^1$ and L °कृष्टा° । 8. $P^2$, A, $B^1$, $B^2$ and $B^3$ च । 9. $P^2$, A, $B^1$, $B^2$ and $B^3$ पृच्छेते किं पि कुत्रापि । 10. $P^2$, A, $B^1$, $B^2$ and $B^3$ अर्द्धार्धं भ्रातृवत्स्वामिन् ! । 11. $P^2$ and A °क्ता; L °क्ता । 12. $P^2$ and A °का । 13. A °र्घंवि° । 14. A and $B^2$ च द्रव्य° तत्कालद° । 15. $P^2$, A, $B^1$, $B^2$ and $B^3$ °धि° । 16. $P^2$, A, $B^1$, $B^2$ and $B^3$ ततो वाचान्° । 17. $P^2$, A, $B^1$, $B^2$ and $B^3$ वाचारिणमि° । 18. A, $B^1$, $B^2$ and $B^3$ °णावधि । 19. L °पि । 20. $P^1$, $P^2$, $P^3$ and A ऊच इदं पितुः । 21. $P^1$ and $P^3$ °त्र° । 22. $P^2$, A, $B^1$, $B^2$ and $B^3$ तवाद्यापि वर्तते तां ।

मार्गदर्शक - आचार्य श्री सुविधिसागर जी महाराज



[1]वाच ऋणमयं शल्यं प्राणानामर्गलामिव[2] ।
द्वयोरेकस्तु[3] चारित्रं लात्वा मामनृणीकुरु ॥२७३॥
धनपालो वचः श्रुत्वा चक्रे [4]भूम्यवलोकनम् ।
शोभनोवग्ग्रहीष्यामि दीक्षां तातानृणीभव ॥२७४॥
एतद्वचनमाकर्ण्य देवलोके द्विजो गतः ।
ऊर्द्ध्वदेहक्रियां कृत्वा दीक्षां शोभन आश्रितः[5] ॥२७५॥
जैनद्वेषपरो जातो धनपालः[6] पुरोहितः ।
प्रैषि संघेनोज्जयिन्या[7] लेखो गुर्वन्तिके द्रुतम्[8] ॥२७६॥
शोभनेन विना गच्छः कथं शून्यः प्रवर्त्तते ।
धर्महानिर्घना जाता दुष्टत्वे हि पुरोधसः[9] ॥२७७॥
गुरुभिः सुस्थिताचार्यैः शोभनाय शुभे दिने ।
वाचनाचार्यता दत्ता[10] ज्ञात्वा गीतार्थकोविदम्[11] ॥२७८॥
गुर्वाज्ञया शोभनोपि [12]मुनिद्वितयसंयुतः ।
बहिष्ठात् [13]संस्थितोवन्त्याः [14]प्रतोलीदानकारणात् ॥२७९॥
प्रतिक्रम्य समालोच्य रात्रौ संस्तारकं व्यधात्[15] ।
यत्याचारादिकं कृत्वा तत्रैवाधिक धर्मवान्[16] ॥२८०॥[17]
पुनः प्रातः प्रतिक्रम्य[18] द्वारे चोद्घाटिते सति ।
संमुखं धनपालोपि मिलितः शोभनस्य सः[19] ॥२८१॥
उपहासं[20] प्रकुर्वाणो[21] धनपालोपि दुष्टधीः ।
जैनशासनविद्वेषी[22] त्विदं वचनमब्रवीत् ॥२८२॥

यथा—गर्दभदन्त ! भदन्त ! नमस्ते

एवं श्रुत्वा शोभन ऊचे—कपिवृषणास्य ! वयस्य ! सुखं ते ।

---

1. $P^2$, A, $B^1$, $B^2$ and $B^3$ वाचा रिण° । 2. $P^2$ °लानि च; A °लानिव । 3. $P^2$ and A °योर्मध्ये क । 4. $P^2$ and A भौम्याव° । 5. $P^2$, A, $B^1$, $B^2$ and $B^3$ दीक्षा शोभनमाश्रिता । 6. $P^2$, and A °ल° । 7. $P^2$ and A seem to read सङ्घेन चावन्त्याः । 8. $P^2$ °द्रुतम् । 9. $P^2$, A, $B^1$, $B^2$ and $B^3$ पुरोहिते । 10. $P^2$, A, $B^1$, $B^2$ and $B^3$ °र्यकं कृत्वा । 11. $P^2$ and A °विदः । 12. $P^2$, A, $B^1$, $B^2$ and $B^3$ मुनियुगल° । 13. $P^2$, A, $B^1$, $B^2$ and $B^3$ अवन्त्यायां स्थितो बाह्ये । 14. $P^2$, $B^1$ and $B^2$ प्रतोलीदत्त° । 15. A विधिम् । 16. A, $B^1$, $B^2$ and $B^3$ रात्रौ तत्रैव संस्थितः । 17. $P^2$ omits this verse । 18. $P^2$ परिक्रम्य समालोच्य । 19. $P^2$ and A च । 20. $P^1$, $P^2$ and $P^3$ °हास्यं । 21. $P^2$ and A कृतं तेन । 22. $P^2$, A, $B^1$, $B^2$ and $B^3$ जैनद्वेषपरो भूत्वा ।

धनपाल ऊचे[1]—कस्यातिथयो ह्यद्य भवन्तः
शोभन ऊचे—भ्रातुर्गेहेन्यत्र न युक्तम् ॥२८३॥

उपलक्ष्य वचो भ्रातुः पुरोधा लज्जयान्वितः[2] ।
बहिर्गतोङ्गचिन्तायै शोभनोगात् पुरान्तरं[3] ॥२८४॥
चैत्यचैत्यानि चानम्य[4] संघस्तावत्समागतः ।
गुरोः पादाब्जमानम्योपविष्टस्तु [5]तदग्रतः ॥२८५॥
शोभनेन शुभा[6] वाणी देशितादेशतो[7] गुरोः ।
समस्तसंघसंयुक्तो[8] गतो बान्धवमन्दिरम्[9] ॥२८६॥
भ्राता संमुखमायातो[10] विनयेन धनेन सः ।
उपाश्रयश्चित्रशाला तेन दत्ता पुरोधसा ॥२८७॥
मातृपुत्रकलत्राद्या नताः संसारनात्रके[11] ।
भोजनाय च[12] सामग्रीं कुर्वन्तस्तेन वारिताः ॥२८८॥
आधाकर्मिकदोषास्ते गुरुभिः प्रतिपादिताः ।
गोचराय मुनेः सार्धं संचचार पुरोहितः ॥२८९॥
दुःस्थिता श्राविका [13]कापि गृहे वीक्ष्यागतं मुनिम्[14] ।
दधिभाण्डं तदग्रे सा[15] मुमोच श्रद्धया युता ॥२९०॥
पृष्टा सा मुनिना श्राद्धी शुध्यमानमिदं दधि ।
दिनत्रयस्य संप्रोक्तं ममानुचितमागमे ॥२९१॥
धनपालेन पृष्टोयं[16] किमयोग्यमिदं दधि ।
प्रच्छनीयो निजभ्राता कौतुकेस्मिन् मुनिर्जगौ ॥२९२॥[17]
दधिभाण्डं समादाय शोभनोवग् ममाग्रतः[18] ।
समागच्छ मम स्थाने दर्श्यते कौतुकं यथा[19] ॥२९३॥

1. $P^2$ and A omit these two words । 2. $P^2$ °तुर्लज्जातुरपुरोहितः; A, $B^1$, $B^2$ and $B^3$ °तुर्लज्जापरपुरोहितः । 3. $P^2$, A, $B^1$, $B^2$ and $B^3$ कायचिन्तागतो बाह्ये शोभनः पुरमध्यगः । 4. $P^2$ and A चैत्ये चैत्यो(त्ये) नमस्कृत्य । 5. A तदा° । 6. $P^2$, A, $B^1$, $B^2$ and $B^3$ शोभने शोभना । 7. $P^2$ देशनादेशिता । 8. $P^2$ and A संघयुक्तोऽपि । 9. $P^2$, A, L and $B^2$ °रे । 10. $P^2$, A, $B^1$, $B^2$ and $B^3$ भ्रातरः सम्मुखायाताः । 11. $P^2$ and A माताकलत्रपुत्रादि नमत्संसारनात्रकैः; $B^2$ संसारमात्रके । 12. $P^2$, A, $B^1$, $B^2$ and $B^3$ सु° । 13. $P^2$, A, $B^1$, $B^2$ and $B^3$ क्वा° । 14. $P^2$ मुनिवरं गता । 15. $P^2$ and A हि तस्याग्रे । 16. $P^2$, A, $B^2$ and $B^3$ ते पृष्टाः । 17. $B^1$ omits this whole verse । 18. $P^2$, A, $B^1$, $B^2$ and $B^3$ गतः शोभनसन्निधौ । 19. $P^2$, A, $B^1$, $B^2$ and $B^3$ अशुद्धोयं कथं लोकै( $B^1$, $B^2$ and $B^3$ के )र(चा)मृतं दधि नान्तरम् ।

दधिमध्यस्थितान् जीवान् दर्शयिष्यसि मां यदि ।
तदाहं श्राद्ध एवास्म्यन्यथा त्वं विप्रतारकः ॥२९४॥
धनपालवचः श्रुत्वा शोभनो वचनं जगौ ।
दर्शयामि यदा जीवान् तदा वाचा प्रपाल्यते ॥२९५॥
अङ्गीकृत्य वचोप्येवं तदालक्तकमानय ।
दधिमाण्डमुखे मुद्रां दत्वा[1] छिद्रं व्यधायि च ॥२९६॥
क्षणमातपके मुक्तं तापतः[2] शुभ्रजन्तवः ।
दधिभाण्डस्य छिद्रेण निर्गत्यालक्तके स्थिताः ॥२९७॥
[3]चलमानांस्ततो जीवान् दृष्ट्वा विस्मितमानसः[4] ।
धन्यो जिनेन्द्रधर्मोयं[5] धनपालोवदत्पुनः ॥२९८॥[6]
[7]साधरैर्बोध्यमानः स द्वादशव्रतधारकः ।
वचनेन गुरोः श्राद्धो धनपालोभवत्सुधीः ॥२९९॥
अङ्गीकृतं(त्य)[8] च सम्यक् तं भवपाथोधितारकम् ।
जैनधर्मपरो जातो नान्यं[9] धर्मं समीहते ॥३००॥
अर्हन् देवो गुरुः साधुर्धर्मो[10] जैनप्रभाषितः ।
सर्वदा हृदये[11] ध्यानं मन्त्रस्य परमेष्ठिनः[12] ॥३०१॥
इत्थं संबोधितो भ्राता गुर्वन्ते प्राप[13] शोभनः ।
द्विजेनैकेन दुष्टेन भोजराजाय[14] भाषितम् ॥३०२॥
धनपालो जिनं मुक्त्वा नान्यं[15] देवं हि वाञ्छति ।
भूपोप्यूचे करिष्यामि कदाचित्तत्परीक्षणम् ॥३०३॥
एकदा भोजभूनाथो महाकालालये गतः ।
नमस्कृतो नृपेणाथ धनपालेन नो पुनः ॥३०४॥
अदेवे न हि देवत्वं धनपालोब्रवीदिदम् ।
रागद्वेषपरा देवाः संसारात्तारकाः कथम् ॥३०५॥[16]

---

1. $P^2$ and A मुद्रां दत्वा । 2. $P^2$, A, $B^1$ and $B^2$ तापेन । 3. A वल° । 4. A विस्मय° । 5. $P^2$, A धन्यं जै(A जि)नेन्द्रजं धर्मं । 6. $B^1$ omits this verse । 7. $B^1$, $B^2$ and $B^3$ साक्षरं । 8. L °त्य । 9. A °न्य° । 10. $P^1$ and $P^3$ °धुष° । 11. $P^2$, A, $B^1$, $B^2$ and $B^3$ निरन्तरं हृदि । 12. $P^1$ and $P^3$ °नाम् । 13. $P^2$, $B^1$, $B^2$ and $B^3$ °न्त° । 14. $P^2$, $B^1$, $B^2$ and $B^3$ भोजभूपाय । 15. $P^2$, A, $B^1$ and $B^3$ °न्यदे° । 16. Between verses 304 and 305, $B^1$, $B^2$ and $B^3$ add : तं दृष्ट्वा भोज आचष्टे न देवं स्यादतः परम् । धूपनैवेद्यपुष्पादिर्वन्द्यते पूज्यते स्तुते ॥ ( Cf. verse 307 below )

ये देवा जितरागाः स्युः [1]संसारतारकास्तु ते ।
एवं च मद्वचो राजन् सत्यमेव[2] न संशयः ॥३०६॥

यथा—अकण्ठस्य कण्ठे कथं पुष्पमाला
विना नासिकायाः[3] कथं धूपगन्धः[4] ।
अकर्णस्य कर्णे[5] कथं गीतनृत्यं
अपादस्य पादे कथं मे प्रणामः ॥३०७॥

भोजभूपेन तद्वाक्यं श्रुत्वा हृदि विचिन्तितम् ।
मोक्षो येषां कथं[6] नास्ति परेषां मोक्षदाः कथम् ॥३०८॥
एवं ज्ञात्वाथ संजातो जैनधर्मानुरागभाक् ।
नरेन्द्रो भद्रभावज्ञः[7] कुरुते तत्प्रशंसनम् ॥३०९॥
तुरङ्गानतिवाह्याथ[8] गतो [9]भूपः स्वमन्दिरे ।
तडागोपि[10] नरेन्द्रेण नूतनः कारितोन्यदा ॥३१०॥
वर्षाकाले भृतं ज्ञात्वा दर्शनाय गतो नृपः ।
पञ्चषड्भिश्च विद्वद्भिर्धनपालादिकैर्युतः ॥३११॥
नूतनैर्नूतनैः काव्यैः सरस्या[11] वर्णनं कृतम् ।
पण्डितैः सकलैरेव[12] स्वस्वबुद्ध्यनुमानतः[13] ॥३१२॥
कथितं भोजभूपेन[14] सरसो[15] वर्णनं कुरु ।
धनपालः स्थितस्तूष्णीं भूपोप्यूचे द्विजोच्यताम् ॥३१३॥

[16]तद्यथा—एषा तडागमिषतस्तव [17]दानशाला
[18]मत्स्यादयो रसवती प्रगुणा सदैव ।
[19]पात्राणि ढिङ्कबकसारसचक्रवाकाः[20]
पुण्यं कियद्भवति तत्र वयं न विद्मः ॥३१४॥

इक्कु सावण नै भद्दवै जत्थवि तत्थवि नीर ।
जेठ कलोला जे करै ते सर सहजि गंभीर ॥३१५॥

---

1. $P^1$ and $P^3$ संसारे । 2. $P^2$, A, $B^1$, $B^2$ and $B^3$ सत्यं सत्यं । 3. $P^1$, $P^3$ and L नासया स्यात् । 4. L and $B^3$ गन्धधूपः । 5. $P^2$ and A अकर्ण( र्णे ) अनेत्रे । 6. $B^1$, $B^2$ and $B^3$ स्वयं । 7. $B^3$ भावेन । 8. A, $B^1$, $B^2$ and $B^3$ अतिवाह्य तुरङ्गाणां । 9. $P^2$ and A भूपस्य । 10. $P^2$, A, $B^1$ and $B^2$ सरोवरं( रो ) । 11. L °सो । 12. $P^2$, A, $B^1$, $B^2$ and $B^3$ पण्डितानां च सर्वेषां । 13. $P^2$ °द्ध्यपातिमा°; A and $B^3$ °द्ध्यादिमा°; L, $B^1$ and $B^2$ °द्ध्यानुमा° । 14. $P^1$ and $P^3$ भूपभोजेन । 15. $P^2$, A and $B^3$ °स्या । 16. $P^2$ तथा; $B^3$ यथा । 17. $B^1$ °मिषतो वरदान° । 18. $P^2$ and A °मच्छपा° । 19. L प° । 20. $P^2$ °की ।

मार्गदर्शक – आचार्य श्री सुविधिसागर जी महाराज


धनपालगिरं श्रुत्वा चुकोप हृदये नृपः ।
मम कीर्तनकं दृष्ट्वा दृष्टयापि न सुखायते ॥३१६॥
गुरुरूपे[1] मम द्वेषी वचनैरुपलक्षितः ।
वर्णनीयः [2]परैर्विप्रैः स्वकीयैर्निन्द्यते[3] कथम् ॥३१७॥
अहमेव करिष्यामि प्रतीकारं हि तादृशम् ।
धनपालस्तदा दध्यौ[4] द्वेषनिर्नाशनोत्सुकः[5] ॥३१८॥
एवं [6]विचिन्त्य मनसा यावत्तूष्णीं स्थितो नृपः ।
धाराचतुष्पथे तावद् वृद्धैका संमुखागता ॥३१९॥
भो भो विद्वज्जना ! एवं श्रूयतां मद्वचोधुना ।
भूपः प्रश्नाक्षरं प्रोचे प्रत्युत्तरकृते बुधान्[7] ॥३२०॥

यथा—कर कम्पावै सिर धुणैं बुड्ढी कांइ कहेइ ।
एवं श्रुत्वा पण्डित ऊचे—
इह जमराणै संमरी नंनंकार करेइ ॥३२१॥
विद्याधरो[8] धनपालो ज्ञात्वावसरमब्रवीत् ।
यत्किंचिद् वदते वृद्धा तद्वदामि शृणु प्रभो ॥३२२॥

[9]यथा—

किं नन्दी किं मुरारिः किमु रतिरमणः किं विधुः किं विधाता[10]
किं वा विद्याधरोयं[11] किमुत[12] सुरपतिः किं नलः किं कुबेरः[13] ।
नायं नायं न चायं न खलु न हि न वा नैव चा(ना ?)सौ न चासौ[14]
क्रीडां कर्तुं प्रवृत्तः स्वयमिह हि हले ! भूपतिर्भोजदेवः[15] ॥३२३॥

स्तुतिं श्रुत्वा ततो भूपो हृष्टचित्तोऽब्रवीदिदम् ।
तुष्टोऽहं धनपालास्मि[16] याचस्व तव रोचते[17] ॥३२४॥
एवं श्रुत्वा द्विजः प्रोचे याचितं[18] यदि लभ्यते ।
तन्नेत्रद्वयमस्माकं [19]प्रसादीकुरु भूपते ![20] ॥३२५॥

---

1. $P^1$, $P^3$ and $B^1$ °चे । 2. $B^2$ and $B^3$ °धोऽपरैर्वि° । 3. $P^2$, A, $B^1$, $B^2$ and $B^3$ निन्दितः । 4. $P^2$, A, $B^1$, $B^2$ and $B^3$ °लो द्रुतं चक्षो । 5. $B^1$, $B^2$ and $B^3$ दूरीकुर्वामिहे वयम् । 6. $P^2$ and A सं° । 7. $P^1$ and $P^3$ बुधाः; $P^2$ न वा; L भवान् । 8. $P^2$, A, $B^1$, $B^2$ and $B^3$ धनी । 9. L omits this word । 10. $P^2$, A, $B^1$, $B^2$ and $B^3$ नलः किं कुबेरः । 11. $P^2$, $B^1$, $B^2$ and $B^3$ °रोऽसौ । 12. $P^2$, A, $B^1$, $B^2$ and $B^3$ किमथ । 13. $P^2$, A, $B^1$, $B^2$ and $B^3$ विधुः किं विधाता । 14. $P^2$, A, $B^1$, $B^2$ and $B^3$ नाऽपि नाऽसौ न वैधः । 15. $P^2$ °भोदेवः; $B^1$ and $B^2$ °भोजदेव ! । 16. $P^2$ and A °लस्त्वं । 17. $P^2$ and A रोचितम् । 18. A °तो । 19. $P^2$ and A प्रसादं; $B^1$, $B^2$ and $B^3$ तदा नेत्रद्वयं(यं)ऽस्माकं प्रसादं । 20. $P^2$ and A °पतेः ।

एतदाश्चर्यं भूपस्य कथं ज्ञातं मनःस्थितम् ।
ज्ञातत्वं सफलं तस्य ज्ञायते यदुदाहृतम्[1] ॥३२६॥
धनपालो नृपेणाथ दानमानैः प्रपूजितः ।
विख्यातं जैनधर्मं तं पालयामास पण्डितः ॥३२७॥
ऋषभपञ्चाशिकापि धनपालकृता स्वयम् ।
[2]जैनधर्मरहस्यं तत्सम्यक्त्वं च प्रकाशितम् ॥३२८॥
विधिः श्रावकधर्मस्य निवासस्थानपूर्वकम् ।
कृतं प्रकरणं जैनं[3] धनपालेन सद्धिया ॥३२९॥
यथा—जत्थ पुरे जिणभवणं समयविऊ साहुसावया जत्थ ।
तत्थ समावसियव्वं पउरजलं इंधणं जत्थ ॥३३०॥
यथा पञ्चमकालेत्र[4] केवलज्ञानवर्जिते[5] ।
मिथ्यात्वी[6] धनपालोयं[7] प्रबुद्धो[8] न तथा परः ॥३३१॥
जैनं च धर्मं प्रतिपाल्य सम्यक्
　　संस्तारदीक्षासहितो[9]ऽन्तकाले[10] ।
सर्वाङ्गिनां[11] क्षामणकादिपूर्वं
　　द्विजोत्तमः प्राप स देवलोकम् ॥३३२॥
विविधगुणगुणाली पुण्यपीयूषनाली
　　वदति वचरसाली कीर्तिवल्ली विशाली ।
अरिजनकृत एवं भूभुजैः पादसेवः
　　विदितसकलधामा[12] भूपतिर्भोजनामा[13] ॥[14]३३३॥

*इति धर्मघोषगच्छे वादीन्द्रश्रीधर्मसूरिसंताने[15] श्रीमहीतिलकसूरिशिष्य[16] पाठकश्रीराजवल्लभकृते भोजचरित्रे मुञ्जोत्पत्ति-धनपालस्वर्गगमनो[17] नाम प्रथमः प्रस्तावः ॥१॥*

1. $P^2$, A, $B^1$ and $B^2$ यदि हृद्गतम् । 2. A जिन° । 3. $B^1$, $B^2$ and $B^3$ येन । 4. $P^1$ and $P^3$ °केऽर्य । 5. L °वर्जितम् । 6. L °त्वं । 7. $P^1$ and $P^3$ °त्र । 8. L बुद्धोऽत्र । 9. $P^1$ °ते° । 10. $P^2$ °दीक्षान्वित चा(त्वा ?)न्तकाले । 11. $P^2$, A, $B^1$, $B^2$ and $B^3$ अनासिकं । 12. $P^2$ and A °धाम्ना । 13. $P^2$ and A नाम्ना । 14. $P^1$, $P^3$ and L omit this verse । 15. $P^1$, $P^3$, L and $B^1$ omit this compound word । 16. $P^1$, $P^3$ and L omit this compound word too । 17. $B^1$, $B^2$ and $B^3$ मुञ्जभोजोत्पत्तिधनपालप्रतिबोधस्वर्गगमनो ।

## [ अथ द्वितीयः प्रस्तावः ]

एकदा भोजभूनाथ उपविष्टः सभान्तरे ।
प्रतीहारेण विज्ञप्तः स्वामिन् ! विज्ञप्तिकां शृणु ॥१॥

कलिङ्गाधिपतेः[1] पुत्रो जयसेनः समागतः ।
न्यग्रोधाधो नृपादेशात् स्थापितः सत्कृतोपि च ॥२॥

प्रातरागत्य विज्ञप्तः कुमारेण नृपस्ततः ।
मत्पित्रा ते प्रेषितानि त्रीणि शीर्षाणि हर्षतः ॥३॥

किं मूल्यं कस्य शीर्षस्य[2] कथनीयमिदं मम ।
एवमुक्त्वा कुमारोपि न्यग्रोधस्थानके गतः ॥४॥

आकारितो वररुचिः शीर्षाख्यानं निवेदितम् ।
विचार्या हृदये वार्ता कथं मूल्यं[3] विधीयते ॥५॥

त्वग्विहीनान्यजीवानि[4] तन्मूल्यं केन कथ्यते ।
भूपोवकौतुकं पश्य प्रातरास्थानके मम ॥६॥

भूपचातुर्यवीक्षार्थं[5] जयसेनेन सत्वरम्[6] ।
प्रातरागत्य विज्ञप्तं[7] शीर्षाणां [8]मूल्यकारणम् ॥७॥

शीर्षाण्यानीय मुक्त्वाग्रे भूपतेर्दिव्यबन्धनात् ।
छोटितानि शुभैर्गन्धैर्व्याप्त आस्थानमण्डपः ॥८॥

त्रीणि शीर्षाणि निष्कास्य मुक्तान्यग्रे महीशितुः ।
विस्मिता च सभा सर्वा पश्यते भूपचातुरीम्[9] ॥९॥

एकस्य दोरकः कर्णे क्षिप्तो[10] वक्त्रे न निर्गतः[11] ।
सर्वोत्तममिदं शीर्षं [12]लक्षमूल्यं[13] निरूपितम् ॥१०॥

मध्यमे दोरकः क्षिप्तः कर्णात्कर्णेन निर्गतः ।
सहस्रदशकं तस्य भोजभूपेन भाषितम् ॥११॥

---

1. $B^1$, $B^2$ and $B^3$ पतिः । 2. $B^1$ कस्य शीर्षस्य किं मौल्यम् । 3. $B^1$ and $B^2$ मौल्यं । 4. $B^1$, $B^2$ and $B^3$ त्वचा हीनं तु निर्जीवं । 5. $B^1$ and $B^2$ जयसेनकुमारोऽय; $B^3$ जयसेनकुमारेण । 6. $B^1$, $B^2$ and $B^3$ भूपचातुर्यवीक्षणे । 7. $B^1$, $B^2$ and $B^3$ प्रगेणागत्य विज्ञप्तः । 8. $B^1$, $B^2$ and $B^3$ मौल्य° । 9. $B^1$, $B^2$ and $B^3$ पश्यामो भूपचातुरीम् । 10. $B^1$, $B^2$ and $B^3$ दोरकं कर्णे क्षिप्तं । 11. $B^1$, $B^2$ and $B^3$ निर्गतम् । 12. $P^1$ लक्ष° । 13. $B^3$ °मौल्यं ।

तृतीये दोरकः क्षिप्तः कर्णे वक्त्रेण निर्गतः[1] ।
जघन्यशीर्षं तज्ज्ञेयं[2] मूल्यं भग्नवराटिका ॥१२॥

जयसेनकुमारोपि दृष्ट्वा भूपस्य चातुरीम् ।
प्रशंसन् भोजपादाब्जौ नमस्कृत्य गृहे गतः ॥१३॥[3]

विवेके विनये ज्ञत्वे विद्यायां[4] विक्रमेपि च ।
विद्वज्जन इति प्राह[5] भोजतुल्यो न भूपतिः ॥१४॥

एवं राज्यश्रियं सम्यक् पालयन् सर्वदापि हि[6] ।
पुरन्दर इवोर्वीस्थः श्रूयते विबुधैर्जनैः ॥१५॥

अन्यस्मिन् दिवसे राजा सभायां मण्डपे स्थितः ।
वर्धापको नरः कोपि भूपं विज्ञपयत्यमुम्[7] ॥१६॥

दक्षिणायां दिशि स्वामी [8]पृष्ठविस्थानभूपतिः ।
वैरिसिंहनृपस्तस्य पुत्री[9] सौभाग्यसुन्दरी ॥१७॥

तव कीर्तनके हृष्टा[10] नान्यं भूपं समीहते[11] ।
रतिप्रतिमरूपास्ति[12] समायाता स्वयंवरे ॥१८॥

तस्यावलोकनार्थं च[13] राज्ञा प्रेषि पुरोहितः ।
गीर्वाणवाणीनैपुण्याद्बहुधालापितस्तया[14] ॥१९॥

रञ्जितस्तत्कचातुर्याद्विनयाच्च पुरोहितः ।
छन्दोलङ्कारविदुरा मन्ये साक्षात्सरस्वती ॥२०॥

[15]हृष्टचित्तोवभाषिष्ट भूपस्याग्रे पुरोहितः ।
न वर्ण्यन्ते गुणास्तस्याः कथमप्येकजिह्वया ॥२१॥

द्विजोत्तमवचः श्रुत्वा राजा हर्षपरायणः ।
महोत्सवेन भूपस्तां विवाहयति कन्यकाम् ॥२२॥

तद्गुणे रञ्जितो राजा स्थितोन्तःपुरमध्यतः ।
न करोति स्म राज्यस्य चिन्तां च गजवाजिनाम्[16] ॥२३॥

---

1. B¹ and B² दोरकं क्षिप्तं कर्णात्तन्निर्गतं मुखे । 2. B¹, B² and B³ °शीर्षकं ज्ञेयं । 3. B¹ interchanges verses 13 and 14 । 4. B¹, B² and B³ विद्याविद्वत्त्वे । 5. B¹, B² and B³ विद्वज्जनादिरप्यूचे । 6. B¹, B² and B³ पाल्यमानो निरन्तरम् । 7. B¹, B² and B³ विज्ञापयति भूपतिम् । 8. P³ पुरवि° (?) । 9. B¹, B² and B³ नृपः पुत्री नाम्ना । 10. B¹, B² and B³ हृष्ट्वा । 11. B¹ and B² °हति । 12. B¹ and B² रतिरूपानुकाराऽस्ति । 13. B¹, B² and B³ °नार्थेन । 14. B¹, B² and B³ कन्या गीर्वाणवाणीभिर्बहुधा सत्कृतो गुरुः । 15. B³ दृ(तु?)ष्ट° । 16. B¹, B² and B³ न करोति स किं चिन्ता राज्यादिगजवाजिभिः ।

एवं ग्रीष्मर्तुसंप्राप्तौ जलक्रीडापरो नृपः ।
समस्तान्तःपुरीयुक्तो रमते रमणीगणे ॥२४॥

सार्धं सौभाग्यसुन्दर्या स्नेहयुक्तो नरेश्वरः ।
जलसेकक्रियायोगाज्जातो व्याकुलमानसः[1] ॥२५॥

देव्यवक् संस्कृतं स्वामिन् ! मोदकैर्मां च सिञ्चय ।
अज्ञानाद्भूपतिस्तस्यै मोदकानेव दत्तवान् ॥२६॥

मोदकैर्भरितां स्थालीं दृष्ट्वा विस्मितमानसा ।
विद्वत्त्वं भवतो ज्ञातं राज्ञी ब्रूते विहस्य सा ॥२७॥

राजा विलक्षचित्तः [2]संश्चिन्तयामास मानसे ।
शास्त्राभ्यासं विना ह्यस्मान्[3] हसन्ते स्म स्त्रियोपि हि ॥२८॥

धिङ्मे चतुरचाणक्यं धिङ्मे रूपं च यौवनम् ।
तद्धरे ! विवरं देहि प्रवेशं प्रकरोम्यहम् ॥२९॥

एवं विमृश्य भूपालः करोत्यध्ययनश्रमम् ।
दिनैः स्तोकतरैर्जातो विद्वज्जनशिरोमणिः ॥३०॥

पार्श्वस्थितं पञ्चशतं विदुषामस्य तिष्ठति ।
नृपस्य[4] विरुदं दत्तं कूर्चालियं सरस्वती[5] ॥३१॥

गीते कवित्वे साहित्ये[6] चातुर्ये विनये नये ।
नृपो भोजसमो भूम्यां न भूतो न भविष्यति ॥३२॥

यथा—कविषु वादिषु भोगिषु योगिषु[7]
द्रविणदेषु सतामुपकारिषु ।
धनिषु धन्विषु धर्मपरीक्षिषु[8]
क्षितितले न हि भोजसमो नृपः ॥३३॥

एकस्मिन् दिवसे राजा विद्वद्वररुचिश्रितः ।
सभायामुपविष्टोस्ति मन्त्रिसामन्तसंयुतः ॥३४॥

---

1 $B^1$, $B^2$ and $B^3$ अतिस्नेहेन भूपालः सार्धं सौभाग्य-सुन्दरी । जलसिञ्चनतो बाढं जाता-( $B^3$ तो )व्याकुलमानसा ( $B^1$ and $B^3$ सः ) ॥ । 2 $B^1$, $B^2$ and $B^3$ "चित्तोपि चिन्त" । 3 $B^1$, $B^2$ and $B^3$ विनास्माकं । 4 $B^1$, $B^2$ and $B^3$ भूपाय । 5 $B^1$, $B^2$ and $B^3$ कूर्चेण सह भारती । 6 $B^1$, $B^2$ and $B^3$ कवित्वगीतसाहित्ये । 7 $B^1$ and $B^2$ योगिषु भोगिषु । 8 $B^1$, $B^2$ and $B^3$ धर्मपरेषु च ।

साश्चर्यात्यद्भुता वार्ता चालिता पण्डितैर्जनैः ।
हसित्वा भोजभूपेन प्रोक्तं वररुचेः पुरः ॥३५॥

स्वभावोयं गुरुर्लोकेथवोपाधिगु(र्गु)रुर्मतः[1] ।
एषा [2]वार्ता ममाग्रे हि[3] कथनीया [4]सुनिश्चितम् ॥३६॥

ऊचे वररुचिर्दद्वचो भूपाल ! शृणु मद्वचः ।
नोपाधिः स्तूयते[5] लोके सहजो मण्डनं जने ॥३७॥

नृपोऽप्युवाच भो मित्र ! स्वभावो नो गुरुर्भवेत् ।
उपाधिस्तु गरिष्ठोयं[6] लोकेप्याश्चर्यकारकः[7] ॥३८॥

यदि ते प्रत्ययो नास्ति तदागच्छ ममालये ।
देवतार्चनवेलायां कौतुकं दर्शयामि ते ॥३९॥

तस्मिन्नवसरे तेन सभा सर्वा विसर्जिता[8] ।
स्नानं कृत्वा शुचिर्भूत्वा गतो देवालये नृपः ॥४०॥

प्रतीहारगिरायातः पार्श्वे वररुचिर्विभोः ।
संमान्यमासनं[9] दत्तमुपविष्टस्तु पण्डितः ॥४१॥

पुष्पैः(ष्पैः) [10]प्रवरनैवेद्यैर्धूपदीपादिचन्दनैः ।
[11]पञ्चप्रकारपूजां तां कृत्वा भूपो यथाविधि ॥४२॥

तदारात्रिकवेलायां मार्जारी सम्मुपागता ।
स्नाता गङ्गोदके पूर्वं पुष्पचन्दनचर्चिता ॥४३॥

पञ्चवर्तियुतो दीपः[12] पूजितो विधिपूर्वकम् ।
उत्तारयति मार्जारी वादित्रैः पञ्चशब्दजैः ॥४४॥

विलोकितं मुखं राज्ञा विद्वद्द्विजवरस्य हि[13] ।
स्वभावस्याथवोपाधेर्गरिमा कस्य दीयते[14] ॥४५॥

निरीक्ष्याश्चर्यकृद्वार्तां वदति द्विजपुङ्गवः ।
पारम्पर्यं न हि ज्ञातं पुनः पश्यामि कौतुकम् ॥४६॥

---

1 B¹, B² and B³ सहजोयं गुरुर्लोके उ(ह्य)पाधिरथवा किम् । 2 B¹, B² and B³ एतद्वार्ता । 3 B¹, B² and B³ °ग्रेण । 4 B¹, B² and B³ °नीया हि । 5 B¹ and B³ श्रूयते । 6 B¹ and B² यदुपाधिर्गरिष्टेयं । 7 B¹ and B² लोके साश्चर्यकारिणी । 8 B¹ विवर्जिता । 9 P¹ °मानसं । 10 B¹ प्रकर° । 11 B¹, B² and B³ पंचोपचार° । 12 B¹, B² and B³ दीपस्तु पञ्चवर्तीकः । 13 B¹, B² and B³ च । 14 B¹, B² and B³ दास्यसि ।

भूपः प्राह सदैवैपारात्रिकं[1] प्रकरोत्यहो।
विलोक्या भवता नित्यं नान्या[2] मार्जारिका समा ॥४७॥
पण्डितः कौतुकं दृष्ट्वा समायातो निजे गृहे।
देवार्चावसरे प्रातरेकं मूषकमग्रहीत् ॥४८॥
गतो भूपसमीपेयं पण्डितोप्याशिषं ददौ।
उपविष्टो मुदा तत्र कौतुकं तद्विलोकते[3] ॥४९॥
आरात्रिकं व्यधात्स[4]ज्ञः[5] पूजनानन्तरं नृपः।
मार्जार्यपि समायाता स्नपिता पूर्ववत्तदा ॥५०॥
यावद् भ्रामयते दीपं वादित्रैर्वाद्यमानकैः।
विदुषा मूषको मुक्तो दर्शयित्वा तदग्रतः ॥५१॥
मार्जारी मूषके दृष्टे दीपमास्फालये(य)द् भुवि[6]।
सर्वे हास्यपरा जाता भूपतिप्रमुखा जनाः ॥५२॥
मार्जारीचेष्टितं वीक्ष्य हसित्वा भूपतिर्जगौ।
सहजः सर्वदा पूज्य उपाधिस्तु कियद्दिनान्[7] ॥५३॥
एवं राज्यश्रियं भुक्त्वा[8] भोजराजो नृपाग्रणीः।
एकदास्ति[9] सभासीनो विज्ञप्तः केनचिद्द्विशा ॥५४॥
स्वामिन्! नगरमध्येद्य दृष्टं रक्षोद्वयं मया।
तद् गच्छति च लङ्कातो[10] यात्रां गोदावरीं प्रति ॥५५॥
पृष्टो नरो नरेन्द्रेण दृष्टौ तौ राक्षसौ कथम्।
कुम्भकारगृहे स्तस्तावाकार्यापृच्छ्यतां विभो[11] ॥५६॥
तथाकृते[12] नरेन्द्रेण प्रजापतिरवग्गतौ[13]।
वलमानौ तदास्माकं कथनीयौ सुनिश्चितम् ॥५७॥
शिक्षां दत्त्वा निजे स्थाने प्रेषितः स प्रजापतिः।
भूपतिः कारयामास पतङ्गीनां शतान्यथ[14] ॥५८॥
कियत्स्वहस्सु यातेषु वलमानौ तु राक्षसौ।
तस्यैव कुम्भकारस्य संध्यायां सद्मनि स्थितौ ॥५९॥

---

1 $B^2$ रात्रिदु। 2 $P^1$ °न्य°। 3 $B^1$ and $B^2$ °कति; $B^3$ °कितम्। 4 $P^1$ °त्स्ड°। 5 $B^1$, $B^2$ and $B^3$ °ज्ञं। 6 $B^2$ and $B^3$ भूम्यां स्फालति ( $B^3$ लिति ) दीपकम्। 7 $P^1$ °नात्; $B^1$ °नैः। 8 $B^1$, $B^2$ and $B^3$ भुङ्क्ते। 9 $B^1$, $B^2$ and $B^3$ एकदा च। 10 $B^1$, $B^2$ and $B^3$ सिंहस्ते गच्छते लङ्कात्। 11 $B^1$, $B^2$ and $B^3$ स्वामिन्नाकार्य पृच्छ्यतेधुना। 12 $B^1$, $B^2$ and $B^3$ कृत्वा। 13 $B^1$, $B^2$ and $B^3$ प्राजापते मितिर्जगौ। 14 $B^2$ and $B^3$ बहूनपि।

कथितौ[1] कुम्भकारेण भोजराजनृपाग्रतः ।
रात्रौ स्फुरत्यन्धकारे[2] भो(वी)क्षितास्ताः[3] पताक्किकाः ॥६०॥
अनेकचक्कम्कात्कारैर्दीपोद्द्योतितदिग्मुखैः[4] ।
आहतुर्विस्मयार्तौ तौ कुम्भकारं प्रतिक्षणात् ॥६१॥
आकाशे किमिदं भद्र ! दृश्यते कौतुकं किल[5] ।
प्रजापतिरभाषिष्ट शृणु ह्येतत्कुतूहलम् ॥६२॥
भोजराजो नृपोस्माकं[6] यज्ञस्तेन प्रतन्यते ।
अदग्ध[7]स्वर्णकार्येण भूपः प्रस्थानके स्थितः ॥६३॥
प्रातर्गत्वा ससैन्योसौ भङ्क्त्वा लङ्कापुरीं ततः ।
सुवर्णं तत आदाय यज्ञं तं कारयिष्यति ॥६४॥
तच्छ्रुत्वा राक्षसौ भीतौ जल्पतुस्तौ परस्परम् ।
पुरा रामेण सा लङ्का भग्ना कष्टे महत्यपि ॥६५॥
बद्धोम्भोधिर्दृषद्भिस्तु पादचारेण गच्छता ।
संग्रामे रावणं हत्वा[8] भग्ना लङ्कापुरी तदा ॥६६॥
अस्याकाशस्थितं सैन्यं गच्छत्केन निवार्यते ।
नूनं विभीषणं हत्वास्मत्पुरीं तां गृ(ग्र)हीष्यति ॥६७॥
समालोच्य हृदि द्वाभ्यां कुम्भकाराय भाषितम् ।
गच्छ त्वं भूपतेरग्रेथवावां नय तत्र भोः ! ॥६८॥
प्रधानपुरुषैः सार्धं राक्षसा(सौ) राजमन्दिरे ।
गत्वा भूपं नमस्कृत्य राक्षसावाहतुर्वचः ॥६९॥
स्थापय त्वं[9] निजं सैन्यं यावल्लङ्काधिपान्तिके ।
गत्वा विज्ञप्य तत्पार्श्वादानयावस्तदर्जुनम्[10] ॥७०॥
रामेण पातितं दुर्गं यत्त्रिकूटोपरिस्थितम्[11] ।
स्वर्णेष्टकामयं राजन् ! पतितास्ता इतस्ततः ॥७१॥
स्वामिन् ! निवेदयास्माकं प्रेक्षय(ष्य)न्ते कियदिष्टकाः ।
तावन्मात्राः समानीय मुच्यन्ते त्वत्पदाग्रतः ॥७२॥[12]

---

1 B[1] and B[2] °तं; B[3] °तं° । 2 B[1], B[2] and B[3] रजन्यामन्धकारेण । 3 B[1], B[2] and B[3] °स्ते । 4 B[3] ° खे । 5 B[1] and B[2] कौतुकालयम् । 6 B[1], B[2] and B[3] °स्मासु । 7 B[1] and B[2] अदग्धः । 8 P[1] and P[3] हित्वा । 9 B[1], B[2] and B[3] स्थापयस्व । 10 B[1], B[2] and B[3] पार्श्वात्स्वर्णं तमानयास्म(व)हे । 11 B[1], B[2] and B[3] त्रिकूटोपरि संस्थितम् । 12 B[3] omits this verse ।

भूप ऊचे सहस्रे द्वे ह्यानीयन्तां ममेष्टकाः ।
स्वामिना सह लंकां तां चूर्णयामीति नान्यथा[1] ॥७३॥
राक्षसावूचतुः स्वामिन् ! दशवासर[2]मध्यतः ।
यदि नायाति तत्स्वर्णं चौरवद्दण्डमाचरेः[3] ॥७४॥
एवं निरूप्य भूपाग्रे प्रस्थितौ राक्षसौ प्रगे ।
समुत्पत्य गतौ लंकां विज्ञप्तस्तु विभू(भी)षणः ॥७५॥
देव ! धारापतिर्भोजनामा मालवकेश्वरः ।
विद्यावांश्च महाशूरो दानी माने[4]श्वरो नृपः ॥७६॥
यज्ञमारब्धपस्त्येतेनादग्धस्वर्णहेतुना ।
आगच्छत्सैन्यमाकाशे भीत्यास्माभिर्निवारितम् ॥७७॥
विबोधितः प्रधानैस्तु विभीषणनरेश्वरः[5] ।
प्रेक्ष(ष्य)न्ते हीष्टका देव ! स्तोकेर्थे न विरुद्ध्यते ॥७८॥
न स्वल्पस्य कृते भूरि नाशयेन्मतिमान्नरः ।
एतदेवात्र पाण्डित्यं यत्स्वल्पाद्भूरिरक्षणम् ॥७९॥
जनपञ्चशतीशीर्षे हीष्टकानां चतुष्टयम् ।
दत्त्वा प्रत्येकं भीत्या तैः प्रेषिताः शीघ्रराक्षसाः ॥८०॥
संप्राप्य नगरीं धारां राक्षसैः सकलैरपि[6] ।
इष्टका[7] ढौकिता भोजनृपाग्रे नतमस्तकैः[8] ॥८१॥
लङ्कायां कुशलं वत्स[9] कुशलं तु विभीषणे ।
गजवाजिसुतस्त्रीणां क्षेमं पप्रच्छ भूपतिः[10] ॥८२॥
प्रसादात्तव राजेन्द्र[11] ! कुशलं सर्ववस्तुषु ।
गृह्यन्तामिष्टका देव ! विभीषणविमुक्तकाः ॥८३॥
पश्यन् भोजनरेन्द्रस्य कलाकु[12]शलतां जनः ।
उपाङ्गचक्रवर्तीति वच ऊचे विशेषतः ॥८४॥
विभीषणस्य तं दण्डं भाण्डागारे ररक्ष सः ।
राक्षसानां तु सु(शु)श्रूषां कारयामास[13] भूपतिः ॥८५॥

---

1 B¹, B² and B³ चान्यथा। 2 B¹, B² and B³ दिनानि दश। 3 B¹, B² and B³ °रेत्। 4 B¹, B² and B³ दानमाने°। 5 B¹, B² and B³ विभीषणस्तु संबोध्य प्रधानपुरुषैरपि। 6 B¹, B² and B³ उत्तावनकलास्तेपि धारायां प्राप्तराक्षसाः। 7 B¹ B² and B³ भोजाग्रे। 8 B¹, B² and B³ इंटा विनयान्नतमस्तकाः। 9 B¹ and B² °च्छ°। 10 B¹, B² and B³ °सुतान् दारान् कुशलं पृच्छते नृपः। 11 B¹, B² and B³ भूपेन्द्र!। 12 B¹ and B² °कौ°। 13. B¹ and B² कारापयति।

अष्टादशापि[1] भोज्यानि कृत्वा माल्यादिवस्तुभिः[2] ।
आत्मस्तुतिकृते भूपाः सत्कुर्वन्ति विदेशिनाम् ॥८६॥
एवं मृष्टान्नलुब्धास्ते यावत्षण्मासकं स्थिताः ।
विस्मृता राक्षसी विद्या सर्वाप्युत्प्लव[3]नादिका ॥८७॥
भोजस्य सेवका जाताः स्थितास्तत्रैव मण्डले ।
मेदिनीचारिणो जाता गतविद्यास्ततः परम् ॥८८॥
अनेकोपाङ्गरङ्गेन(ण) विद्याया व्यसनेन च ।
भोजः पालयते राज्यं भूमिस्थो देवराजवत् ॥८९॥[4]

इति धर्मघोषगच्छे [5]पाठकराजवल्लभकृते श्रीभोजचरिते उपाङ्गचक्रवर्तिकूर्चालसरस्वती-
विरुदप्रापणो नाम द्वितीयः प्रस्तावः ॥२॥

मार्गदर्शक - आचार्य श्री सुविधिसागर जी महाराज

1 B¹, B² and B³ °दशानि । 2 B¹, B² and B³ गन्धमाल्यनुवस्तुभिः । 3 B¹ and B² °प्युत्पव° । 4 B¹, B² and B³ add one more verse which is as follows—

सकलगुणनिधानं भूभुजैर्दत्तमानं जनितयशविधानं किन्नरैर्गीयमानम् ।
विजितगणविपक्षं दत्तदानं च लक्षं गुणिजनभिमुखंविमुष्टं भोजभूपस्य दक्षम् लक्षम ॥

5 B¹ श्रीमहोतिलकसूरिशिष्यपाठक, etc.; B² वादीन्द्रश्रीधर्मसूरिसंताने मूलपट्टे श्रीमहीतिलकसूरिशिष्य-पाठक, etc; B³ धर्मसूरिसंताने पाठक, etc.

[ अथ तृतीयः प्रस्तावः ]

भोजभूपोन्यदा रात्रावुत्थितः कायचिन्तया ।
चन्द्रोद्द्योतेन सौधस्थः पश्यति स्वविभूतयः ॥१॥

लावण्यललिमोपेताः[1] पश्येल्लीलावतीस्त्रियः ।
एकदैकत्र सुप्तः सन्[2] राजप्राहरिकान् नृपान् ॥२॥

क्वापि दन्तिनो बद्धानालाने मदविह्वलान् ।
नानाविधान् हयानत्र बाढं हेषयतो गृहे ॥३॥

दृष्ट्वा राज्यश्रियं सर्वां हृष्टोन्तः स[3] व्यचिन्तयत् ।
केन पुण्यप्रभावेन(ण) मयाप्ता वाञ्छिता रमा ॥४॥

सभाया अन्तरे ह्यागन्तास्ते वररुचिः प्रगे ।
स प्रष्टव्य इमां वार्ता प्रष्टव्यो नापरो मया ॥५॥

एवं विमृश्य भूनाथः प्रसुप्तः स्थानके निजे ।
सूर्योदये च संजाते ह्युदयाचलमस्तके ॥६॥

शयनादुत्थितो भूपः प्रातर्नृत्यानि पश्यति ।
सभापि मिलिता तावदमात्या मन्त्रिपुङ्गवाः ॥७॥

राजानो राजपुत्राश्च सीमाला भूपनन्दनाः ।
श्रेष्ठिनः सार्थवाहाश्च वैद्या ज्योतिषिका नटाः ॥८॥

अनेके गीतनृत्यज्ञा भट्टा वादित्रवादकाः[4] ।
बहवो मिलिता लोकाः सभासंस्थानमण्डपे ॥९॥

भूषितो भूषणैर्वस्त्रैः परिच्छदसमन्वितः ।
सिंहासनमलञ्चक्रे सभायां भोजभूपतिः ॥१०॥

भट्टानां हि जयारावैर्विद्वज्जनमनोहरैः ।
वर्तते यावदास्थाने स्ता(ता)वद्वररुचिस्त्वितः[5] ॥११॥

सभा[6] समुत्थिता सर्वा[7] तावद्वररुचिः पुनः ।
दत्त्वाशीर्वचनं पूर्वमुपविष्टो नृपान्तिके ॥१२॥

---

1 P[1] and P[3] °पेतः । 2 B[1] and B[2] एकतोपि हि सुप्तास्ते( प्तांस्तान् ) । 3 B[1] and B[2] °श्रियः सर्वां हृष्टचित्तो । 4 B[1], B[2] and B[3] °त्रकादयः । 5 B[2] वररुचिस्तावदागतः । 6 B[1] and B[2] सभ्याः । 7 B[1] and B[2] °ताः सर्वे ।

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज



यावत्पृच्छति भूपाल[1]श्चिन्तां चित्तस्थितां निजाम् ।
ऊचे वररुचिस्तावत् ज्ञातं राजेन्द्र ! कारणम् ॥१३॥

पृच्छसि त्वं मया राज्यं संप्राप्तं पुण्यतः कुतः[2] ।
तत्र प्रत्युत्तरस्यार्थे वार्ता मत्पार्श्वतः शृणु ॥१४॥

श्रेष्ठी धनदनामास्ति धनदेवो महाधनी ।
भूनाथो वसतेत्रैव[3] सपुत्रः पौत्रकान्वितः ॥१५॥

लक्ष्मीनिवासस्तत्पुत्रो लक्ष्मीदेव्यस्ति तत्प्रिया ।
कथयिष्यति तेऽग्रे सा वधूः श्रेष्ठिसुतस्य हि ॥१६॥

एष संदेह ऊचे राड्[4] ज्ञातो मे हृद्गतः कथम् ।
अथवा शास्त्रवेत्तॄणां न हि किञ्चिदगोचरम् ॥१७॥

विसर्जिता सभा सर्वा कौतुकेन महीभुजा[5] ।
गतः श्रेष्ठिगृहं[6] यत्र तत्र स्वल्पपरिच्छदः ॥१८॥

आयाता मज्जनं कृत्वा मिलिता संमुखं[7] स्नुषा ।
हसन्ती पृच्छति क्ष्मापं[8] निर्लज्जा बान्धवे यथा ॥१९॥

कथं भोजनरेन्द्रस्त्वं[9] विप्रेण प्रेषितोऽधुना ।
केन पुण्यप्रभावेण राज्यं प्राप्तं हि पृच्छसि ॥२०॥

विस्मयेन नरेन्द्रोऽवक् सत्यमेतद्वदाग्रतः ।
संदेहो ह्यस्ति मच्चित्ते[10] स्फे(स्फो)टनाय समागतः ॥२१॥

साप्याह गोपुरद्वारे निर्गमाद्दक्षिणे भुजे ।
कुम्भकारी[11]गृहे ह्यस्ति[12] सोमानाम्न्यस्ति विश्रुता ॥२२॥

स्फो[13]टयिष्यति संदेहं गच्छ त्वं तत्र बान्धव ! ।
विनोदाय गतो राजा कुम्भकारीगृहे द्रुतम् ॥२३॥

सापि तत्र गृहे नास्ति भूप[14] ऊर्ध्वः स्थितः क्षणम् ।
तावत्समागता सोमा भूपं दृष्ट्वा गृहेऽवदत्[15] ॥२४॥

---

1 B¹, B² and B³ भूपेन्द्र° । 2 B¹, B² and B³ केन पुण्यतः । 3 B¹, and B³ वसतेत्रैव भूनाथ । 4 B³ एतच्छ्रुत्वा भूप ऊचे । 5 B¹, B² and B³ °केनापि भूपतिः । 6 B¹ and B² गृहे । 7 B¹ °खा । 8 B¹, B² and B³ हसित्वा पृच्छते भूपं । 9 B³ नरेन्द्र ! त्वं । 10 B¹, B² and B³ मे चित्ते । 11 B¹ °रि° । 12 B³ भूप । 13 P¹, P² and B¹, B² स्फे° । 14 P¹ °य । 15 B¹, B² and B³ गृहाङ्गणे ।

रे पुत्रा ! श्रुतपापिष्ठाः ! पृथ्वीशः सत्कृतो न किम् ।
भोजभूपः समायाति पुण्यैः कस्यापि मन्दिरे ॥२५॥
मानसन्मानपूर्वं चोपविष्टो नृपतिः क्षणम् ।
पूर्वजन्मानुरागेण[1] सोमयालापितस्तदा ॥२६॥
श्रेष्ठिवध्वात्र हे स्वामिन् ! प्रेपितस्त्वं ममालये ।
अनुक्ता ज्ञापितोदन्तं कथयामि तवाग्रतः ॥२७॥
शूलिका नाम मातङ्गी बहिस्तिष्ठति भोः ! पुरात् ।
राजेन्द्र ! तव संदेहवार्तां सा कथयिष्यति ॥२८॥
तद्वाक्यश्रवणाद्भूपो गतो मातङ्गिनीगृहे ।
दूरतोप्युपलक्ष्यैनं सा गुहाया निर्गता[2] बहिः ॥२९॥
एकस्याथ द्रुमस्याधः स्थिता सा शूलिका ततः ।
पूर्वभवानुबन्धेन बहुधालापितो नृपः ॥३०॥
सोमानाम्न्या च कुम्भार्या प्रेपितस्त्वं ममान्तिके ।
वार्तामहं हृद्गतां ते जानामि श्रूयतां नृप ॥३१॥
अत्रैव दक्षिणाशायामेकं दूरेस्ति[3] काननम् ।
तन्मध्ये पद्मिनीषण्डमण्डितं वर्तते सरः[4] ॥३२॥
तस्य पाल्युपरिष्टात्तु प्रासादोस्ति मनोहरः[5] ।
राक्षसस्तत्र वसति[6] जातिस्मरणसंयुतः ॥३३॥
भनक्ति तव संदेहं गतमात्रस्य नान्यथा ।
यदीच्छेः कार्यसिद्धिं त्वं तदा तत्रैव गम्यते[7] ॥३४॥
मातङ्गीवचनाद्राजा गतो गह्वरकानने ।
दृष्टं सरः [8]सुविस्तीर्णं जिनायतनमण्डितम् ॥३५॥
राक्षसेन महीपालो दूरादप्युपलक्षितः ।
संमुखं मिलनायागाद्भवपूर्वानुरागतः[9] ॥३६॥
ष(ख)ङ्गमादाय राजेन्द्रो यावदध्वनि[10] तिष्ठति ।
तावत्प्रदक्षिणीकृत्य तेन राजा नमस्कृतः[11] ॥३७॥

---

1. $B^1$, $B^2$ and $B^3$ भवपूर्वानु॰ । 2. $B^1$, $B^2$ and $B^3$ उपलक्ष्य सुदूरस्थो [ $B^3$ स्था ] गुहास्या निर्गता । 3. $B^1$ and $B^2$ ॰यां किंचिद्दूरेस्ति । 4. $B^1$, $B^2$ and $B^3$ मण्डितोस्ति महासरः । 5. $B^1$, $B^2$ and $B^3$ ॰दं सुमनोहरम् । 6. $B^1$, $B^2$ and $B^3$ वसते राक्षस [ $B^2$ and $B^3$ सा ]स्तत्र । 7. $B^1$, $B^2$ and $B^3$ तदा निर्भय ! गम्यते । 8. $B^1$ and $B^2$ सवि॰ । 9. $B^1$, $B^2$ and $B^3$ भवपूर्वानुरागेण सन्मु(म्मु ?)खो मिलनागतः । 10. $B^1$, $B^2$ and $B^3$ मार्गस्थो यावत्ति॰ । 11. $B^2$ and $B^3$ तावन्नमस्कृतस्तेन त्रिप्रदक्षिणपूर्वकम् ।

विनयेन घनेनाथ स्तुतस्तेन नरेश्वरः[1] ।
नीतः स्थाने निजे यत्र विद्यते नाभिनन्दनः ॥३८॥
पश्य भूपाल[2] ! देवोयं भुक्तिमुक्तिफलप्रदः ।
तं नमस्कृत्य पूर्वं तु पश्चात्कार्यं ममादिश ॥३९॥
वचसा तस्य भूनाथो गत्वा गर्भगृहान्तरे ।
नमस्कृत्यास्तवीद्भक्त्या वासनापूर्णमानसः ॥४०॥
जिनालयाद्बहिः[3] प्राप्तः कथयामास राक्षसः ।
मया ज्ञातोस्त्यभिप्रायो[4] मातङ्ग्या प्रेषितस्त्वकम्[5] ॥४१॥
पृच्छसि त्वं मया राज्यं प्राप्तं पुण्येन केन हि[6] ।
तव हृद्गतसंदेहं कथयाम्युपविश्यताम् ॥४२॥
एकाग्रं[7] मानसं कृत्वा श्रूयतां मद्वचस्त्वया ।
तिष्ठाम्यत्र वने राजन् ! भुञ्जन् पूर्वभवार्जितम् ॥४३॥
एकस्मिन्दिवसेत्रैव[8] वन्दनाय जिनेशितुः[9] ।
पञ्चज्ञानधरः कोपि समागान्मुनिपुङ्गवः[10] ॥४४॥
प्रविश्य गर्भगेहस्थः स्तवीति जिनपुङ्गवम् ।
विनयात्परया भक्त्या भूभागन्यस्तमस्तकः ॥४५॥[11]
नमस्ते परमज्योतिर्नमस्ते मोक्षदायिने ।
नमस्ते लोकनाथाय [12]कृतानन्द ! नमोस्तु ते ॥४६॥
एवं सोनेकधा स्तुत्वा प्राप्तो देवगृहाद्बहिः ।
तावन्मया नमन्मौलि वन्दितो मुनिपुङ्गवः ॥४७॥
करौ च कुड्मलीकृत्य पृष्टं विनयतो घनात् ।
मया पूर्वभवे किं किं [13]दुष्कर्मोपार्जनं कृतम् ॥४८॥
येन दुःक(दुष्क)र्मयोगेन जातोहं [14]रक्षसां कुले ।
क्षुत्तृपापीडितो नित्यमसंतुष्टो भ्रमाम्यहम्[15] ॥४९॥
मुनिः प्राह तदा भद्र ! शृणु पूर्वभवां कथाम् ।
एकचित्तः स्थिरो भूत्वा कथयामि तवाग्रतः ॥५०॥

---

1. B¹, B² and B³ स्तुतस्ते(स्त्व) नरपुङ्गव: । 2. B¹, B² and B³ भूपेन्द्र ! । 3. B¹, B² and B³ देवगृहाद्बहिः । 4. B¹, B² and B³ मया ज्ञातमभिप्रायं । 5. B¹, B² and B³ प्रेषितोत्र भोः । 6. B¹, B² and B³ संप्राप्तं केन पुण्यतः । 7. B¹, B² and B³ °ग्र° । 8. B¹, B² and B³ °सेप्यत्र । 9. B¹, B² and B³ जिनेश्वरम् । 10. B¹ and B² समायातो मुनीश्वरः । 11. B³ omits this verse । 12. B³ चिदानन्द । 13. P¹ and P³ दुःक° । 14. B¹, B² and B³ राक्षसे । 15. B³ भवाम्यहम् ।

[1]मरुस्थलाभिधे देशे पुरं सत्यपुराभिधम् ।
वसते राजसूरेको धरणो[2] जैनधार्मिकः ॥५१॥

धनश्रीस्तत्प्रिया पुत्राः पुत्र्यश्चास्यास्त्रिसंख्यकाः ।
देवराजः शिवराजः सारङ्गश्च[3] ततोपरः ॥५२॥

दामू नामू तथा षेमी पुत्रीणां च त्रयं[4] क्रमात् ।
पितरौ च[5] दिनैः कैश्चित्त् पूर्णायुष्कौ दिवं गतौ ॥५३॥

कियद्भिर्दिवसैस्तत्र जातं दुर्भिक्षमद्भुतम्[6] ।
भ्रातरोपि भगिन्योपि पीडिताश्च क्षुधाभ्रमन् ॥५४॥

वासरान्गमयामासुः कन्दैर्मूलफलैर्घनैः ।
यावद् द्वादशवर्षाणि[7] कान्तारे पीडितो जनः ॥५५॥

कियद्वर्षैः पुलिन्द्राणां देशे दुःखेतिवाहिताः ।
परिच्छदसहायास्ते प्राप्ताः सर्वेपि मालवान् ॥५६॥

देवराजस्य संसर्गाच्छिवराजोपि धार्मिकः ।
देवार्चनं प्रकुर्वाणौ[8] कृत्वाभोज्यं स्थितौ च तौ ॥५७॥

प्रजापुण्योदयाज्जाता[9] मेघवृष्टिर्घना क्षितौ ।
सामकान्नस्य निष्पत्तिः संजाता बहुला द्रुतम् ॥५८॥

देवराजो गतोरण्ये [10]सामार्थे सपरिच्छदः ।
अग्रपक्वशिरोग्राहात् सर्वे ते मुदिताः कृताः ॥५९॥

तान्यानीय[11] निजे स्थाने मुक्त्वा तापेतिपाचनात्[12] ।
परिवेषणकं पाकं दामूनाम्नी स्वसाकरोत् ॥६०॥

अन्नपाकस्य[13] वेलायां देवराजः सबान्धवः ।
स्नात्वा देवार्चनं[14] कृत्वा भाजने स न्यवीविशत् ॥६१॥

कान्तारे च सुधातुल्यं कदन्नमपि जायते ।
षड्भागेनाधिकेनान्नं भग्न्यापि परिवेषितम् ॥६२॥

---

1. B[3] तथाहि–मरुस्थ° etc. । 2. B[3] धरणो । 3. B[3] सावरश्च । 4. B[1] and B[2] त्रयः । 5. B[1], B[2] and B[3] माता पिता । 6. B[1] and B[2] कान्ताररौरवम् । 7. B[1] and B[3] वर्षान् द्वादशकान् यावत् । 8. B[1], B[2] and B[3] देवार्चान्ते शुचिष्मन्तौ । 9. B[1], B[2] and B[3] °दये जाता । 10. B[1] सामर्थ्ये; B[2] सामापथे; B[3] सामर्थ° । 11. B[1] and B[2] आनीतस्तम्; B[3] आनीयते । 12. B[2] °पेतिखण्डितः । 13. B[1], B[2] and B[3] °पाचन° । 14. B[2] and B[3] °ना ।

यावद् भवति शीतान्नं चिन्तयेत्तावदग्रजः[1] ।
द्वादशाब्देन संप्राप्तं मया प्रथमभोजनम्[2] ॥६३॥
पात्रं यदि[3] समायाति तदान्नं तस्य दीयते ।
दिनमन्नविहीनं मे जायतामद्य चापि तत् ॥६४॥
पुण्योदयात्समायातो[4] मुनिर्मासोपवासभाक् ।
देवराजः स्थितो यत्र धर्मलाभाशिषं ददौ ॥६५॥
[5]दुर्वारा वारणेन्द्रा जितपवनजवा वाजिनः स्यन्दनौघा
लीलावत्यो युवत्यः प्रचलितचमरैर्भूषिता राज्यलक्ष्मीः ।
तुङ्गं [6]श्वेतातपत्रं चतुरुदधितटीसंकटा मेदिनीयं[7]
प्राप्यन्ते यत्प्रसादात् त्रिभुवनविजयी[8] सोस्तु वो धर्मलाभः ॥६६॥
अभ्रं विना[9] यथा वृष्टिः कल्पवृक्षो यथा मरौ ।
मम पुण्योदयाकृष्टो[10] यन्मुनिः समुपागतः[11] ॥६७॥
आसनादुत्थितः शीघ्रं विनयाच्छुद्धमानसः ।
पारणाय मुनीन्द्रस्य निजान्नं भावतो[12] ददौ ॥६८॥
प्रासुकान्नं समादाय गतोसौ मुनिपुङ्गवः ।
देवराजश्च संतोषी यावत्तिष्ठति सत्सुधः ॥६९॥
बन्धुवात्सल्यतोर्धान्नं शिवराजो ददौ मुदा[13] ।
निजान्नाद्ग्रासमेकं तु भ्रातुर्दत्ते लघुस्वसा ॥७०॥
न सक्रोधा न दत्तान्नं दामूनाम्नी च निन्दति ।
नामूनाम्नी च सारङ्गो रोषद् द्वावपि जल्पतः ॥७१॥
धार्मिकोभिनवो जातो देवराजो हि[14] बान्धवः ।
स्वयं क्षुधातुरः स्थित्वा भोजयत्यन्नमद्भुतम् ॥७२॥
ददा(दे)तामात्मभागं तौ किमस्माभिः[15] प्रयोजनम् ।
[16]एतत्क्रुद्धाक्षरैस्ताभ्यां दुःक(दुष्क)र्म समुपार्जितम् ॥७३॥

---

1. B² and B³ तावत्चिन्तयतेग्रजः । 2. B¹ and B² प्रथमं मेन्नभोजनम् । 3. B¹ पात्रं कोपि; B² पात्रः कोपि; B³ यतिः कोपि । 4. B¹, B² and B³ °दये स° । 5. B³ adds : यथा काव्यम्—नो वापी नैव कूपो न च वरतुलसो नैव गंगा न काशी नो ब्रह्मा नैव विष्णुर्न च दिवसपतिर्नैव शम्भुर्न दुर्गा । विप्रेभ्यो नैव दानं न च तीर्थगमनं नैव होमाहुतासि (वा) रे रे पाखण्डशुम्भ ! कथयसि न च ते कीदृशो धर्मलाभः ॥ काव्यम्–दुर्वारा, etc. । 6. B¹ उच्चैः दवं°; B³ तुङ्गश्वे° । 7. B² °नी च । 8. B³ °नसहितः । 9. B¹ and B² अनभ्रेण । 10. B¹ and B³ पुण्यादिनाकृष्टो; B² पुण्य-दिनाकृष्टो । 11. B³ संमुखागतः । 12. B¹, B² and B³ बासनाद् । 13. B¹, B² and B³ अर्द्धान्नं सिन्धुराजेन( जोपि ) प्रददौ बन्धुवत्सलात्( लः ) । 14. B³ °जोसि । 15. B² ददतुः स्वात्मभागान्नमस्माभिः किं । 16. B¹, B² and B³ एतत्क्रोधा° ।

पात्रदानप्रभावात्त्वं संजातो मालवेश्वरः ।
अर्धान्नदानात्तद्बन्धुर्जातो वररुचिः पुनः ॥७४॥
लघुभग्न्या स्वभावेन ग्रासो दत्तो निजान्नतः ।
तेन पुण्यप्रभावेन(ण) संजाता श्रेष्ठिनः स्नुषा ॥७५॥
दामूनाम्नी च मध्यस्था सा जाता कुम्भकारिका ।
चतुःपुत्रातिसुखिनी सोलानाम्नी तुविप्रुता ॥७६॥
नाम्नी भग्न्यप्यहं सद्यस्तस्माद् दुःकर्मयोगतः ।
अहन्तु राक्षसो जातो मातङ्गी शूलिकास्ति सा ॥७७॥
वार्ता पूर्वभवस्येयं मुनिना कथिता मम ।
जाता जातस्मृतिः श्रुत्वास्माकं पूर्वभवस्थितिम् ॥७८॥
ज्ञातं शूलोदितं[1] वृत्तं नमस्कृतो[2] मुनीश्वरः[3] ।
हुङ्काराद् गत आकाशे तत्क्षणाच्चारणो मुनिः ॥७९॥
मया पूर्वभवस्नेहः[4] प्रोक्तो वररुचेर्निशि ।
तिसृणामपि भग्नीनां पूर्वजन्मकथोदिता ॥८०॥
भूपः प्राह कथं भद्र ! ममाग्रे [5]न निवेदितम् ।
वल्लभा भ्रातृभग्नी ते वयमेव न वल्लभाः ॥८१॥
हसित्वा राक्षसो ब्रूते राजंस्तन्नास्ति कारणम् ।
प्रायेण हीनजातीनां दुर्लभं भूपदर्शनम् ॥८२॥
ज्ञातश्च तव वृत्तान्तो भूपोवग्नात्र कारणम् ।
त्वया जातस्मृतिर्लब्धा कथं न प्राप्यते मया ॥८३॥
राक्षसः पुनरप्यूचे कारणं सत्यमेव हि ।
राज्यसौख्यनिमग्नानां पूर्वजन्मस्मृतिः[6] कथम्[7] ? ॥८४॥
भोजभूपो निजं पुण्यं श्रुत्वा पूर्वभवार्जितम् ।
धर्मानुरागतो ब्रूते सत्यमेतज्जिनोदितम् ॥८५॥
तुष्टचित्तनृपः प्रोचे वचनं राक्षसाग्रतः ।
त्वच्चिन्ता भक्तपानाद्या ममाधीनास्त्वतः परम् ॥८६॥
प्रणम्य परमं देवं श्रीयुगादिजिनेश्वरम् ।
संस्थाप्य राक्षसं तत्र समायातो नृपो गृहे ॥८७॥

---

1. $B^1$, $B^2$ and $B^3$ ज्ञात्वा मूलोदितं । 2. $P^1$ °स्कृत्यो; $B^1$, $B^2$ and $B^3$ °त्य । 3. $B^1$, $B^2$ and $B^3$ °रम् । 4. $B^3$ °स्नेहात् । 5. $B^3$ नो । 6. $B^1$, $B^2$ and $B^3$ भवपूर्वस्मृतिः । 7. $B^1$, $B^2$ and $B^3$ कुतः ।

पाल्यमानो निजं राज्यं लाल्यमानो निजाः प्रजाः[1] ।
युगादिजिनसु(शु)श्रूषां चक्रे पूर्वार्पितश्रियम् ॥८८॥
दीनो द्वारपरो नित्यं सत्राकारविधानतः[2] ।
धर्मार्थकामवर्गाणां साधकोभून्नराधिपः ॥८९॥
वञ्चकद्यूतधूर्तानां लम्पटद्यतभृन्नृणाम् ।
प्रवेशो नास्ति धारायां राजादेशोस्त्ययमीदृशः ॥९०॥
कोपि नागरिकः पुर्यां धूर्तेनैकेन धूर्तितः ।
दृष्टो भटैश्च धूर्तोयं[3] समानीतो नृपान्तिके ॥९१॥
विटं(डं)व्य बहुधा धूर्तः खरारोपाच्चतुःप( तुष्प )थे ।
भ्रामयित्वा ततो मुक्तस्तलारक्षैर्नृपाज्ञया ॥९२॥
मुक्तो धूर्तोवदल्लोके यदेनं भोजभूपतिम् ।
नोन्मूलयामि चेद्राज्यात्तन्मे नाम निरर्थकम् ॥९३॥
हसित्वा वदते क्ष्मापो यदि मुक्तोसि याहि रे ! ।
न कुर्याः कुत्र धूर्तत्वं प्रोक्त्वेति[4] स विसर्जितः ॥९४॥
कियत्स्वप्यधिपोहस्सु क्रीडायै वन आगमत् ।
विद्वज्जनैः समीपस्थैराढ्यलोकैः[5] परीवृतः ॥९५॥
कियत्यपि दूरदेशे तावत्संमुखमागतम् ।
जलहारिस्त्रियां वृन्दं तासामेकेन भाषितम् ॥९६॥
विद्याचतुर्दशस्थानं रूपेण जितमन्मथम् ।
आयाति सखि ! पुंरत्नं पश्य दृष्टिं कृतार्थय ॥९७॥
हसित्वाथ वदत्येका गुणा अस्य निरर्थकाः ।
परकायाप्रवेशस्य यावद्विद्यां न सि( शि )क्षति ॥९८॥
नीरहर्त्री वचः[6] श्रुत्वा विलक्षोभून्नृपो हृदि ।
एतत्सत्यवचः प्रोक्तं नागरिकया तया स्त्रिया ॥९९॥
परकायाप्रवेशस्य विद्यां शिष्ये( क्षे ) यथा तथा ।
तदा मे सफलाः सर्वे गुणा नैःफ( नैष्क )ल्यमन्यथा ॥१००॥
इति चिन्तापरो भूपः पृच्छति स्म घनान् जनान्[7] ।
योगिनस्तापसादींश्च वैदेशिकनरानपि ॥१०१॥

---

1. $B^1$, $B^2$ and $B^3$ °नोखिलां प्रजाम् । 2. $B^1$, $B^2$ and $B^3$ सत्रागा [ $B^1$का ] रान- [$B^3$ श्य] नेकशः । 3. $B^1$, $B^2$ and $B^3$ भटैर्गृहीत्वा च । 4. $B^1$, $B^2$ and $B^3$ धूर्त ! त्वमित्युक्त्वा । 5. $B^1$, $B^2$ and $B^3$ विद्वज्जनसमीपस्थो भूपालाद्यैः । 6. $B^1$, $B^2$ and $B^3$ °रहारी° । 7. $B^1$, $B^2$ and $B^3$ बहुधा ( $B^1$ and $B^2$ धान् ) जनान् ।

धूर्तो विडम्बितो बाढं[1] भोजभूपेन यः पुरा ।
तेन विद्यार्थिनं भूपं श्रुत्वा मनसि चिन्तितम् ॥१०२॥
प्रतिज्ञापूरणे प्राप्तः प्रस्तावो मेपि वाञ्छितः ।
परकायाप्रवेशस्य विद्यां शिक्षापि कुत्रचित् ॥१०३॥
विमृश्येदं गतो धूर्तः क्वापि कास्मी(श्मी)रमण्डले ।
एकस्मिन् पर्वते दृष्टा कन्दरा सुमनोहरा ॥१०४॥
जलस्थानमनोज्ञा च वृक्षपा(खा)द्यफलान्विता ।
धूर्त्तश्चिन्तयति स्वान्ते कश्चिद्वसति पूरुषः[2] ॥१०५॥
स्थितो यामद्वयं यावत् स धूर्त्तः साहसाग्रणीः ।
योगीन्द्रो निर्गतस्तावन्मध्याह्नदिवसे ननु ॥१०६॥
योजयत्यञ्जलिं धूर्त्तो विनयानतमस्तकः[3] ।
योगिनं तं स्तवीति स्म[4] परमब्रह्मवद्यथा ॥१०७॥
अनालाप्य च योगीन्द्रो[5] जले स्नात्वा गतो गुफाम् ।
स धूर्तः केटके लग्नः प्रविष्टस्तस्य[6] कन्दराम् ॥१०८॥
बहुधा वारितस्तेन योगिना न निवर्त्तते ।
कियतीं च गतो भूमिं स्थितो योगी निजासने ॥१०९॥
विश्रामणां च सु(शु)श्रूषां कुरुते धूर्त्तपूरुषः[7] ।
भक्त्या देवास्तु तुष्यन्ति मानवानां च का कथा ॥११०॥
कियत्स्वपि दिनेष्वेष योगी च वचनं जगौ ।
कोसि त्वं केन कार्येण समायातोत्र सुन्दर ! ॥१११॥
वैदेशिकोहं स प्राह समायातस्तवान्तिके ।
अपूर्वां देहि विद्यां मे स्वामिन् ! मयि कृपां कुरु ॥११२॥
विद्याग्रहणवाञ्छा ते प्रोचे योगी यदास्ति ते ।
तदा मुद्रां गृहाण त्वं मच्छिष्यो भव नान्यथा ॥११३॥
धूर्त्तः शिष्योथ संजातः कार्यार्थी न करोति किम् ।
गुरुर्वदति कां विद्यां ददामि कथयात्र मे[8] ॥११४॥
धूर्त्तोवग्देहि मे विद्यां परकायाप्रवेशिनीम् ।
दत्तो मन्त्रो यथोक्तस्तु[9] होमजापविधिश्रितः[10] ॥११५॥

1. B[3] बहुविडम्बितो धूर्तो । 2. B[1], B[2] and B[3] पौरुषः । 3. B[1] and B[2] °यान्नत° । 4. B[1], B[2] and B[3] स्तवीति योगिनोत्यन्तं । 5. B[1], B[2] and B[3] अनालापितयो° । 6. B[1], B[2] and B[3] °ष्टस्तेन । 7. B[1], B[2] and B[3] पौरुषः । 8. B[1], B[2] and B[3] कथयस्व माम् । 9. B[1], B[2] and B[3] दत्तं मन्त्रं यथोक्तं ते । 10. B[1], B[2] and B[3] युतम् ।

मार्गदर्शक - आचार्य श्री सुविधिसागर जी महाराज



मन्त्रोसाधि गुरोरग्रे तदा तत्प्रत्ययाय तु ।
कृता सत्पुरुषे सेवा निःफ( निष्फ )ला न कथञ्चन ॥११६॥

ऊचे योगीश्वरोप्यस्मै किमिदं याचितं त्वया ।
न हि रूपपरावर्त्ता[1] स्वर्णसिद्ध्यादिकं न हि ॥११७॥

अमर्षादिव विद्येयं मया संसाधिता विभो[2] ! ।
गुरुः प्रोवाच[3] कस्यार्थे कथनीयं ममाग्रतः ॥११८॥

स ऊचे मालवेष्वस्ति धारायां भोजभूपतिः ।
तस्य राज्यं गृ(ग्र)हीष्यामि किं घनैः कटु[4]जल्पितैः ॥११९॥

योग्यूचेस्मिन्कृते कार्ये न हि ते भद्र ! सुन्दरम् ।
क्रीडन्नी रच्यते राजा [5]यस्मात्प्रत्यक्षदेवता ॥१२०॥[6]

कृते प्रतिकृतं सोवक् यो न कुर्यात्स चाधमः ।
तिरश्चात्र शुकेनापि वेश्यायाः किं कृतं यथा ॥१२१॥

[7]कृते प्रतिकृतं कुर्याद्धिंसिते[8] प्रतिहिंसितम्[9] ।
त्वया लुञ्चापितौ पक्षौ मया मुण्डापितं शिरः ॥१२२॥

एतत्कथां समाख्याय मुक्त्वालाप्य गुरुं पुनः ।
समायातः स धारायां बहुशिष्यपरीवृतः ॥१२३॥

नातिदूरे न चासन्ने शून्ये[10] देवगृहे स्थितः ।
साडम्बरः समागत्य लोकस्याश्चर्यदायकः[11] ॥१२४॥

जनोक्तिभिः श्रुतं राज्ञा सोपायनकरः स तु[12] ।
गत्वा नत्वा च योगीन्द्रमुपविष्टो नृपोग्रतः ॥१२५॥

भूपं पप्रच्छ सोप्येवं[13] कुशलं वर्तते गृहे ।
गजवाजिरथादीनां कुशलं पुत्रपौत्रकैः[14] ॥१२६॥

विनयादवनीपीठे न्यस्तशीर्षः स [15]भूपतिः ।
कुशलं सर्वतोस्माकं सिद्धिनाथ प्रसादतः[16] ॥१२७॥

---

1. B² °परावृत्या । 2. B¹, B² and B³ स्वामिना साधिता मया । 3. B¹, B² and B³ गुरुरूचे स [ B³ °चेत ] । 4. B¹, B² and B³ कूट° । 5. B¹, B² and B³ कस्मात्प्र° । 6. B¹ and B³ add the following verse after this : उपकारोपकारो वा यस्य व्रजति विस्मृतम् । पाषाणहृदयं तस्य जीवितव्यं मुधा जने ॥ 7. B¹, B² and B³ यथा–कृते etc. । 8. B¹ and B² °सते । 9. B³ °हिंसति । 10. B¹ °न्य°; B³ मूर्तो । 11. B¹, B² and B³ समुच्छाहलोके साश्चर्यं° । 12. P³ नु । 13. B¹, B² and B³ भूतस्य पृच्छते सोथ । 14. B¹ and B² पौत्रिभिः । 15. B¹, B² and B³ न्यस्तमस्तकम्° । 16. B¹, B² and B³ सिद्धनाथ° ।

विसर्जितः क्षणं स्थित्वा भूपतिस्तेन योगिना ।
भुक्तिं भूपगृहायातां भुङ्क्ते योगी प्रमोदतः ॥१२८॥
एवं प्रतिदिनं भूपो गच्छते योगिनोन्तिके ।
कियत्स्वहस्सु भूपालो धूर्तनाथेन पृच्छितः ॥१२९॥
राजन् ! भु(भ ?)क्तिस्तवैषा किं स्वार्थे वा पुण्यहेतवे ।
श्रुत्वा भूप उवाचैवं स्वार्थे भक्तिस्तु मेधुना ॥१३०॥
खगमोधानुवादादि स्तम्भनं मोहनादिकम् ।
अन्या वा भूप ! या विद्या[1] यद्रोचते गृहाण तत् ॥१३१॥
[2]हर्षपूरितचित्तस्तु वदति क्षमापपुङ्गवः ।
परकायाप्रवेशस्य कला यद्यस्ति देहि मे ॥१३२॥
सद्यस्तद्वचनं श्रुत्वा भूपाग्रे योग्यदोवदत् ।
भुवने नास्ति सा काचिद्यां न जानाम्यहं कलाम् ॥१३३॥
प्रणम्य वदति[3] क्षमाप एतत्सत्यतरं[4] वचः ।
परकायाप्रवेशस्य विद्यां मेर्पय सांप्रतम् ॥१३४॥
एषा स्तोकतरा वार्ता विद्यां तुभ्यं ददाम्यहम् ।
परं चतुर्दशीभौमवारं यावच्च तिष्ठ भोः ! ॥१३५॥
एतद्वचनमाकर्ण्य भूप आगान्निजे गृहे ।
विश्वासस्तस्य नायाति ह्यविश्वासः श्रियो गृहम् ॥१३६॥
सर्वेषां राजवर्गीयपुरोहितनियोगिनाम् ।
कथयामास राजेन्द्रो वार्तां निजहृदि स्थिताम् ॥१३७॥
एषा विद्या मया ग्राह्या प्राणत्यागेपि सर्वथा[5] ।
योगिनोपि हि विश्वासः पूर्वाचार्यैस्तु वर्जितः ॥१३८॥ यथा–
अहिक्रीडा वणिग् मित्रं विनोदाद्विषभक्षणम्[6] ।
विश्वसेन्न च योगिभ्यो यदीच्छेज्जीवनं घनम् ॥१३९॥
दंसेमि तं पि ससिणं वसुहावइण्णं
थंभेमि तस्स य रविस्स रहं णहद्धे ।
आणेमि जक्खसुरसिद्धवरंगणाओ
तं नत्थि भूमिवलये मह जं न सिद्धं ॥१४०॥[7]

---

1. $B^1$, $B^2$ and $B^3$ अन्या वा कापि राजेन्द्र ! । 2. $B^1$, $B^2$ and $B^3$ °चित्तेन वदते नृप°। 3. $B^1$, $B^2$ and $B^3$ °ते । 4. $B^1$, $B^2$ and $B^3$ °त्यमिदं । 5. $B^1$, $B^2$ and $B^3$ नूनं प्राणत्यागेपि गृह्यते । 6. $B^1$, $B^2$ and $B^3$ विनोदे विष° । 7. $B^1$, $B^2$ and $B^3$ omit this verse ।

विद्याग्रहणवाञ्छा मे विश्वासो योगिनां न हि ।
परं साहसिनः कार्यसिद्धिरेव भविष्यति ॥१४१॥ यथा–

साहसियां ववसाइयां धीरांइक मनांह ।
देव पच्छां छं चिंतणै अररद्धु फलेस्यै तांह ॥१४२॥ पुनः–

साहसीयां लच्छी हवै न हु कायरपुरिसांह ।
कन्नह कुंडल आभरण कज्जल पुण नयणांह ॥१४३॥ पुनः–

दैवह तणैकपाल साहसियां नउं हलु वहै ।
पेडि मपूंटा टालि पूंटा विणषीं पै नहीं ॥१४४॥

राज्यचिन्ता प्रकर्तव्या भवद्भिर्बुद्धिशालिभिः[1] ।
गृ(ग्र)हीष्यामि ह्यहं विद्यां नात्र कार्या विचारणा ॥१४५॥

अन्तःपुरीणां सर्वासां[2] राजवर्गीयभूस्पृशाम्[3] ।
संकेतं पूरयेद्यस्तु स विज्ञेयः स्वभूपतिः ॥१४६॥

शिक्षां दत्त्वा चतुर्दश्यां कृष्णायां भौमवासरे ।
योग्यन्तिके गतो राजा गृहीत्वोपस्करं शुकम् ॥१४७॥[4]

मुक्त्वा परिच्छदं रात्रौ राजा योगी शुकोपि च ।
गतास्ते गह्वरोद्याने चतुर्थोन्यो जनो न हि ॥१४८॥

मन्त्रिवर्गेण प्रच्छन्ना रक्षिता[5] रक्षका जनाः ।
स्वयं संनद्धबद्धास्ते स्थिताश्च[6] वनबाह्यतः ॥१४९॥

योगिना भोजभूपस्य दत्तो मन्त्रो[7] यथाविधि[8] ।
होमजापादिकं[9] सर्वं गुरुणोक्तं तथा कृतम् ॥१५०॥

योगिना च स्वहस्तेन हत्वा निर्जीविते कृते ।
शुकदेहे नृपस्योचे[10] संचारयस्व जीवितम् ॥१५१॥

साधका बहवो विद्याः प्रत्ययेन विना न हि[11] ।
योगिना कथितं कार्यं भूपेनापि तथा कृतम् ॥१५२॥

---

1. $B^1$, $B^2$ and $B^3$ भवता बुद्धिशालिना । 2. $B^1$ and $B^2$ सर्वेषाम् ; $B^3$ °पुरीयसर्वेषाम् । 3. $B^1$, $B^2$ and $B^3$ °वर्गीयकादपि । 4. $B^3$ omits this verse । 5. $B^1$, $B^2$ and $B^3$ रक्षता । 6. $P^1$ स्थित्वा च । 7. $B^1$, $B^2$ and $B^3$ दत्तं मन्त्रं । 8. $P^1$ विधिः । 9. $B^1$, $B^2$ and $B^3$ जाप्या° । 10. $B^1$, $B^2$ and $B^3$ नृपस्य शुकदेहेस्मिन् । 11. $B^1$, $B^2$ and $B^3$ किम् ।

तस्यादेशान्निजो जीवः[1] शुकदेहे नियोजितः[2]।
भूपदेहे द्रुतं जीवो योगिनापि नियोजितः[3] ॥१५३॥
शुकोपि भयभीतात्मा गतोड्डीय वने क्वचित्।
हत हतेति राज्ञोक्तां श्रुत्वा वाचं[4] भटा ययौ(युः) ॥१५४॥
खड्गव्यग्रकराः सर्वेप्यागता नृपसन्निधौ।
किमेतद्भो विभो! क कं हन्मस्तत्त्वं समादिश ॥१५५॥
उच्चस्वरं[5] नृपः प्रोचे योगी सोयं मया हतः।
द्रोहकर्तुर्न[6] विश्वासो गर्तायां क्षिप्यतामयम् ॥१५६॥
द्रोही शुकोपि पापिष्ठो गतो न ज्ञायते क्वचित्।
प्रातस्तस्य प्रतीकारं करिष्यामीति निश्चितम् ॥१५७॥
[7]पुरोहितादिसामन्ता[8] मन्त्रिवर्गास्तु सेवकाः।
वने गत्वानमन् भूपं सर्वे ते राजवर्गिणः ॥१५८॥
न ज्ञायते गुरुः कः स्यात् को वा[9] मन्त्र्यङ्गरक्षकः।
अपरोपि जनस्तेन[10] राज्ञा[11] न ज्ञायते क्वचित्[12] ॥१५९॥
सर्वैर्विमृश्य भूनाथः समानीतो गृहाङ्गणे।
गतः सोन्तःपुरद्वारे मन्त्रिपौरोहितावृतः ॥१६०॥
अन्तःपुरीणां नो वेत्ति[13] नामस्थानादिकं पुनः।
कांचित्सांकेतिकीं वार्तां शयनीयं च वेत्ति न[14] ॥१६१॥
सर्वोप्यन्तःपुरीवर्गः स्थितो वररुचेर्गृहे।
दासीजनः सशृङ्गारः स्थापितस्तत्र मन्दिरे ॥१६२॥
स्वदास्यन्तःपुरीभेदं न जानाति स भूपतिः।
उपविष्टः सभास्थाने गमयामास वासरान् ॥१६३॥
यो नो वेत्ति परं स्वकीयमथवा नो सद्गुणं निर्गुणं
नो वा पात्रकुपात्रभेदरचनां नो दानमानादिकम्[15]।

---

1. $B^1$, $B^2$ and $B^3$ जीवं। 2. $B^1$, $B^2$ and $B^3$ °तम्। 3. $B^1$, $B^2$ and $B^3$ तथा कृतम्। 4. $B^1$ and $B^2$ वाचां। 5. $B^1$ and $B^2$ °स्वरे; $B^3$ °स्वर°। 6. $B^1$, $B^2$ and $B^3$ द्रोहिण(णो)स्य न। 7. $B^2$ पौ°। 8. $B^3$ °न्त°। 9. $B^1$, $B^2$ and $B^3$ को वाथवा। 10. $B^1$, $B^2$ and $B^3$ न ज्ञायते कथं को वा। 11. $P^1$, $B^1$, $B^2$ and $B^3$ राजा। 12. $B^1$, $B^2$ and $B^3$ विस्मितमानसः। 13. $B^1$, $B^2$ and $B^3$ °पुरीं न जनाति। 14. $B^1$ न वेत्ति सः। 15. $B^1$ and $B^2$ °माने प्रभुः।

यश्चान्तःपुरमध्यगो न हि वहेद्राज्ञीकुदास्यन्तरं
सोयं कृत्रिमभोजभूपतिरहो मुष्णाति राज्यश्रियम् ॥१६४॥

इति श्रीधर्मघोषगच्छे वादीन्द्रश्रीधर्मसूरिसंताने[1] श्रीमहीतिलकसूरिशिष्य-पाठकश्रीराजवल्लभकृते श्रीभोजचरित्रे [2]पूर्वभववर्णनपरकाया-प्रवेशविद्यासिद्धिनामा[3] तृतीयः प्रस्तावः ॥३॥

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

1. B[1] omits this compound word । 2. B[1], B[2] and B[3] add अन्नदान here । 3. P[1] omits विद्या ।

### [ अथ चतुर्थः प्रस्तावः ]

[1]नृपादेशेन्यदा भिल्लाः शुकानानीय ते[2] ददुः ।
द्रामं द्रामं च तन्मूल्यं[3] दत्त्वा व्यापादयन्नृपः ॥१॥

शुकोस्ति भोजजीवो यः प्राणरक्षणहेतवे ।
चन्द्रावती[4]पुरोद्याने सफले दूरगः स्थितः ॥२॥

द्रव्यलोभवशाद्भिल्ला वने तत्र समागताः ।
अन्तर्बहुशुकानां च बद्धः सोपि शुकाग्रणीः ॥३॥

मार्गदर्शक : आचार्य श्री सुविधिसागर जी महाराज

क्षिप्त्वा पञ्जरके सर्वोश्चलिताः[5] स्वपुरं प्रति ।
तावच्छुकेन ते पृष्टा भिल्ला मधुरया गिरा ॥४॥

एते शुकाः कथं बद्धाः कारणं कथ्यतां मम[6] ।
न भक्षयति कोप्येतान् अभक्षाः सर्वदाप्यमी ॥५॥

धारायां भोजभूपोस्ति व्याधोवक् श्रूयतां शुक ।
कीराननानाय्य चानाय्य व्यापदयति सर्वदा[7] ॥६॥

ज्ञातः सोर्थो मया[8] व्याधा ! भवतां किं प्रदीयते ।
द्रामं द्रामं प्रतिशुकं व्याधैरुक्तं प्रदीयते[9] ॥७॥

शिक्षां कुरुत तन्मे भोः ! सुन्दरं स्याद्यथोभयोः[10] ।
जीवन्त्येतेपि हि शुका[11] लाभोपि भवतां घनः[12] ॥८॥

तद्वाचाहुरिदं व्याधास्तथा कु(कु)रु यथोचितम् ।
पुनः प्राहुर्गमिष्यामः कस्य पार्श्वे किमद्भुतम् ॥९॥

शुक ऊचे समासन्ना पुरी चन्द्रावती वरा ।
चन्द्रसेनोस्ति भूपालो गुणा(णि)नामग्रणीः किल[13] ॥१०॥

आवाभ्यां गम्यते तत्र पश्य मे[14] वाक्यचातुरीम् ।
एवं श्रुत्वा सभां नीतः पुलिन्द्रेण शुको वरः ॥११॥

---

1. $B^1$ begins with श्रीमद्गुरुभ्यो नमः । 2. $B^1$, $B^2$ and $B^3$ तान् । 3. $B^1$ and $B^3$ °न्मौल्यं । 4. $B^1$, $B^2$ and $B^3$ °वत्यां । 5. $B^1$, $B^2$ and $B^3$ सर्वे चलि° । 6. $B^1$, $B^2$ and $B^3$ कथयस्व माम् । 7. $B^1$ and $B^2$ प्रत्यहम् । 8. $B^1$, $B^2$ and $B^3$ ज्ञातस्तदर्थो भो । 9. $B^3$ ददाति व्याध उच्यते । 10. $B^1$, $B^2$ and $B^3$ तच्छिक्षां कुरु मे व्याध उभयोरपि सुन्दरम् । 11. $B^1$, $B^2$ and $B^3$ एते शुकाश्च जीवन्ति । 12. $B^1$, $B^2$ and $B^3$ तव वाञ्छितः । 13. $B^1$ and $B^2$ °णीयसः; $B^3$ °णीयसा । 14. $B^1$ पश्यतां ।

मार्गदर्शक - आचार्य श्री सुविधिसागर जी महाराज

दृष्टश्चन्द्रावतीभूपः[1] प्रत्यक्ष इव वासवः ।
पुलिन्द्रस्य करासीनः शुक आशीर्वचो ददौ ॥१२॥ यथा–

स शिवः पातु वो नित्यं गौरी यस्याङ्गसङ्गता ।
आरूढा हेमवल्लीव राजते राजते[2] तरौ ॥१३॥

शुकस्याशीर्वचः[3] श्रुत्वा चन्द्रसेनो नरेश्वरः ।
सविस्मयोथ[4] संजातः सभा सर्वा चमत्कृता ॥१४॥

तिर्यङ्ङरण्यवासी च पुलिन्द्रैः सह संगमात् ।
वाणीं गीर्वाणजां[5] ब्रूते विस्मयाद्वदति स्म राट्[6] ॥१५॥

शुकराज ! पुनर्वाचं श्रावय स्वां सुधामयीम् ।
अहं तु श्रोतुमिच्छामि सभा सर्वापि वाञ्छति ॥१६॥ यथा[7]–

सङ्ग्रामाङ्गणमागतेन भवता चापे समारोपिते
देवाकर्णय येन येन सहसा यद्यत्समासादितम् ।
कोदण्डेन शराः शरैररिशिरस्तेनापि भूमण्डलं
तेन त्वं भवता च कीर्तिरतुला कीर्त्या च लोकत्रयम् ॥१७॥

इति कीरस्तुतिं श्रुत्वा हर्षपूरितमानसः ।
भूपोप्युवाच भिल्लस्य कीरमूल्यं समादिश ॥१८॥

भिल्लोवग्देव ! निर्मूल्यमूल्ये किं कथ्यते[8] शुके ।
पुनर्वदति भूपालः शुकवाक्यप्रमाणताम्[9] ॥१९॥

[10]भिल्लोवोचदसौ देव ! भवतां ढौकितः शुकः ।
दीनारदशकं दत्तं[11] पुलिन्द्राणामिदं धनम् ॥२०॥

राज्ञा तस्य शुकस्यार्थे कारितं स्वर्णपञ्जरम् ।
रच्यते च स्वपार्श्वस्थो न दूरीक्रियते क्वचित् ॥२१॥

विद्वज्जनाधिको गोष्ठ्यां मन्त्रे मन्त्रीश्वराधिकः ।
कुरुते भूभुजा सार्धं शुकराजो यथोचितम्[12] ॥२२॥

---

1. $B^1$, $B^2$ and $B^3$ °वतीदेन्द्रः । 2. $B^1$, $B^2$ and $B^3$ रजते । 3. $B^1$, $B^2$ and $B^3$ शुकादाशी° । 4. $B^1$, $B^2$ and $B^3$ °पि । 5. $B^1$, $B^2$ and $B^3$ वाचा गीर्वाणिकां । 6. $B^1$, $B^2$ and $B^3$ वदते नृपः । 7. $B^3$ यथा–काव्यम्– । 8. $B^1$, $B^2$ and $B^3$ मूल्यं चेत्कथ्यते । 9. $B^2$ प्रमाणतः । 10. $B^1$, $B^2$ and $B^3$ शुकोवो° । 11. $B^1$, $B^2$ and $B^3$ युक्तं । 12. $B^1$, $B^2$ and $B^3$ दिवानिशम् ।

व्यासावतारकीरेण[1] मोहितो मानसे नृपः ।
देशग्रामपुरोद्यानराज्यचिन्ता समुज्झिता[2] ॥२३॥
कियद्भिस्तु दिनै[3] राजा विज्ञप्तो मन्त्रिपुङ्गवैः ।
वनक्रीडाकृते स्वामिन् ! गम्यते बहुभिर्दिनैः ॥२४॥
अन्तःपुरीपञ्चशतीमध्येप्यस्ति शशिप्रभा ।
अन्यासां न हि विश्वासः पट्टराज्ञ्याः शुकोर्पितः ॥२५॥
वनभूमिं गतो राजा पश्चात्सर्वः पुरीजनः[4] ।
मिलित्वा पट्टराज्ञ्यग्रे विज्ञप्तिं कृतवानिमाम्[5] ॥२६॥
अस्मद्ग्राम्या[6]त्समायातः शुको[illegible]स्तवान्तिके ।
कलां सामुद्रिकीं वेत्ति शुको देवि ! स वीक्ष्यते ॥२७॥
पट्टराज्ञ्युपदेशेन गतो लोकः शुकान्तिके[7] ।
शुकेनालापितः सर्वः सुधामधुरया गिरा ॥२८॥
येन येन च[8] यत्पृष्टं तस्य तस्योत्तरं ददौ ।
वेष्टयित्वा स्थितो लोको मक्षिका मधुवृन्दवत्[9] ॥२९॥
[10]विहितोदारशृङ्गारा सखीजनसमन्विता ।
स्वर्णरूप[11]मयैर्दृक्षैः स्थालीं हस्ते प्रपूर्य च[12] ॥३०॥
[13]गत्या मन्थ(न्थ)रगामिन्या सखीस्कन्धावलम्बिता ।
शुकान्तिके समायाता पट्टराज्ञी शशिप्रभा ॥३१॥
निजगुणगणसौभाग्यं परगुणपरिवर्णनेन कथयन्ति ।
सन्तो विचित्रचरिता नम्रतया चोन्नतिं यान्ति ॥३२॥[14]
शुकोवोचद्यथा नाम ज्ञातव्यं तादृशं फलम् ।
यथा तारागणे चन्द्रस्तथा राज्ञी शशिप्रभा ॥३३॥[15]

---

1. B¹, B² and B³ शुको व्यासावतारस्तु । 2. B¹, B² and B³ चिन्तादिरुज्झिता । 3. B¹, B² and B³ कियत्यपि दिने । 4. B¹, B² and B³ पश्चादन्तःपुरी° । 5. B¹, B² and B³ विज्ञप्तं कीरदर्शनम् । 6. B¹, B² and B³ °ग्रस° । 7. B¹, B² and B³ गतास्ते शुकसंनिधौ । 8. B¹, B² and B³ येनापि । 9. B¹, B² and B³ °बिन्दुवत् । 10. B¹ and B² कृतसत्सार° । 11. B¹, B² and B³ रूप्य° । 12. B¹, B² and B³ स्थालिका पूरिता करे । 13. B³ गति° । 14. instead of this verse B¹, B² and B³ have the following verse:—शुकाग्रे स्थालिका मुक्ता भूमौ संन्यस्तमस्तका । शुकेनालापिता चाग्रे स्थिता सा योजिताञ्जलिः ॥ 15. After this verse B¹, B² and B³ add भेटा मुक्ता ममाग्रे या तद्गरिम तवैव हि । विचित्रा गतिः सन्तानां नम्रत्वे यान्ति चोन्नतिम् ॥

राज्ञ्यूचे मत्करं कीर ! पश्यतामेकचित्ततः ।
लक्षणालक्षणान्यत्र कथनीयानि मेऽग्रतः ॥३४॥

शुकराजः करं दृष्ट्वा राज्ञीं प्रत्येवमुक्तवान्[1] ।
किं ब्रूमस्त्वत्करे स्त्रीणां लक्षणान्युत्तमान्यथो[2] ॥३५॥ यथा–

प्रासादश्चक्रपद्मौ वा[3] पूर्णकुम्भश्च तोरणम् ।
यस्याः करतले रेखा पट्टराज्ञी समादिशेत् ॥३६॥

यस्याः करतले रेखा मयूरश्छत्रचामरे[4] ।
राजपत्नीत्वमाप्नोति पुत्रैश्च सह वर्धते ॥३७॥

उत्तमैर्लक्षणैरेवं तत्प्रभावेण मान्यता ।
अत्यर्थं श्लाघनीया स्याद्राज्ञी भूपस्य मन्दिरे ॥३८॥

प्रशंसिता गता राज्ञी वेषमन्यं विधाय च[5] ।
समायाता शुकोपान्ते पृच्छति स्म पुनः शुकम्[6] ॥३९॥

यत्किंचिल्लक्षणं मेऽङ्गे तच्छ्रावय शुकेश्वर ! ।
लक्षणं कररेखास्थं यत्किंचित्तच्छ्रुतं मया ॥४०॥

शुक आह—यस्या आकुञ्चिताः केशा मुखं च परिवर्तुलम् ।
नाभिश्च दक्षिणावर्ता सा नारी सुखमेधते ॥४१॥

अल्पस्वेदोल्परोमाणि निद्राल्पाल्पं च भोजनम् ।
नेत्रगात्रसुशोभाढ्या(ढ्यं)[7] स्त्रीणां लक्षणमुत्तमम् ॥४२॥

स्तुतिं श्रुत्वा[8] गतावासे परावर्तितवेषभृत्[9] ।
पप्रच्छ पुनरागत्य शुकराजस्य सन्निधौ ॥४३॥

पण्डितस्त्वत्समो[10] नास्ति किं मुधा बहुजल्पितैः ।
देशे देशे त्वया पक्षिन् ! दृष्टा राज्ञ्योप्यनेकशः ॥४४॥

मत्समाना गुणैः क्वापि रूपलावण्यराजिनी ।
यत्र कुत्रापि दृष्टास्ति[11] शुकराज ! तदुच्यताम् ॥४५॥

---

1 $B^1$, $B^2$ and $B^3$ राज्ञीनां वचनं जगौ । 2 $B^1$ and $B^2$ सन्ति स्त्रीणां ये लक्षणोत्तमाः । 3 $B^1$, $B^2$ and $B^3$ प्रासादं पद्मचक्रं वा । 4 $B^1$, $B^2$ and $B^3$ म(मा)यूरं छत्रचामरम् । 5 $B^1$ and $B^2$ नेपथ्यान्ये(न्य)परीवृता । 6 $B^1$, $B^2$ and $B^3$ शुकान्ते सा पुनः पृच्छति तं [ $B^1$ and $B^2$ पृच्छयति ] शुकम् । 7 $B^1$ and $B^3$ °शोभाढ्या । 8 $P^1$ and $P^3$ कृत्वा । 9 $B^1$, $B^2$ and $B^3$ वेषप्रावर्तनं कृतम् । 10 $B^1$, $B^2$ and $B^3$ विद्वांसत्वत्° । 11 $P^1$ °स्ते ।

सगर्ववचनं श्रुत्वा शुकोभून्मत्स[1]राकुलः ।
विमृश्य हृदये किंचित् तस्या अग्रे शुकोब्रवीत् ॥४६॥
त्वत्समाना गुणैर्दृष्टा नार्येका वर्तते क्वचित् ।
क्षणं स्थित्वाह[2] हुं ज्ञातं कथयामि तवाग्रतः ॥४७॥
अस्त्यत्र दक्षिणे देशे पुरं काञ्चननामकम् ।
उग्रसेनो नृपस्तस्य[3] राज्ञी त्रैलोक्यसुन्दरी ॥४८॥
पुष्फा(ष्पा)वती सुता तस्या[4] गुणलावण्यमन्दिरम् ।
भण्डसेनास्ति तद्दासी तत्समाना त्वमेव हि ॥४९॥
एतद्वचनमाकर्ण्य स्मिताः सर्वाः सपत्निकाः ।
लज्जिता पट्टराज्ञी सा मन्ये वज्रेण ताडिता ॥५०॥
गता शोकगृहे राज्ञी पतिता साप्यधोमुखी ।
सर्वं जातं विषप्रायं हास्यगीतासनादिकम् ॥५१॥
चन्दसेनो नृपस्तावत् समायातः स्वमन्दिरे ।
आभोषार्थे तदा दासी समागाद्भूपसंमुखम्[5] ॥५२॥
स्वामिनी तव किं कुत्र गतेत्याह महीपतिः[6] ।
क्षणं स्थित्वावदद्दासी स्वामिन्य(नी)शोकमन्दिरे ॥५३॥
किमर्थं कस्यचिद्वार्थे[7] केन राज्यस्ति कोपिता[8] ।
शीघ्रं कथय रे दासि ! विरुद्धं भावि तेन्यथा ॥५४॥
भयेन कम्पमाना सा यावन्मौनेन संस्थिता ।
हता भूपेन बाढं सा शुकोक्तं सावदत्तदा[9] ॥५५॥
कीरोक्तिश्रवणाद्भूपः शान्तकोपो बभूव च ।
शयनीये स्थितो गत्वा समाहूयाथ तत्सखी[10]॥५६॥
गृहीत्वा स्वसमीपे तां राज्ञी प्रशमहेतवे ।
आह त्वं वद किं रुष्टा तिर्यञ्चो ज्ञानवर्जिताः ॥५७॥
तव स्नेहवशाद्भूपो दुःखी संतिष्ठते[11] बहिः ।
सख्यः सर्वा निराहाराः शुकोभूच्छोकसंकुलः ॥५८॥

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

---

1. B¹, B² and B³ °क्षु°। 2. B¹, B² and B³ °त्वास्ति। 3. B¹, B² and B³ °स्तत्र। 4. B¹, B² and B³ तस्य। 5. B¹, B² and B³ संमुखा। 6. B¹, B² and B³ गता पृच्छति भूपतिः। 7. B¹, B² and B³ किमर्थं केन कस्यार्थे। 8. B¹, B² and B³ राज्ञी विरोधिता। 9. B¹, B² and B³ तद्व्रूते सा शुके प्रभोः ( B² and B³भो )। 10. B¹, B² and B³ गत्वाप्याहूता तत्सखी गृहात्। 11. B¹, B² and B³ दुःखितो( तस् )तिष्ठते।

उत्तिष्ठ क्षालय स्वास्यं भूप[1] कारय भोजनम् ।
विसर्जय सखीवर्गमस्माकं कुरु भोजनम्[2] ॥५९॥
नृ[3]पोक्तयैवंप्रकारेण सखीभिः प्रतिबोधिता ।
राज्ञी कदाग्रहं स्वीयं न मुञ्चति कथंचन ॥६०॥[4]
भूपेनालोचितं चित्ते शुकेनेयं वदिष्यति ।
शुकेमां बोधय त्वं भोस्त्वयैवेयं प्रकोपिता ॥६१॥
नृपादेशाद्गतः कीरो यत्र राज्ञी शशिप्रभा ।
विनयी शीतलालापान्मधुरान् वदति स्म सः ॥६२॥
मयाज्ञानवशात्तुभ्यं यदुक्तं दुर्वचः किल[5] ।
धर्तुं तद्धृदये स्वीये[6] न हि युक्तं विवेकिनि ॥६३॥
सुशीलाद्या विनीताद्याः सज्ज्ञानाद्याः शुभश्रियः ।
तिर्यग्रूपे मय्यसारे तव रोषो न युज्यते ॥६४॥
बहुधा बोधिता राज्ञी चित्ते कोपं न[7] मुञ्चति ।
शुको वदति हे देवि ! त्यजस्वेदं कदाग्रहम् ॥६५॥
कुग्रहात्प्राणसंदेहः कुग्रहात्स्नेहनाशनम् ।
कुग्रहान्न जने श्लाघा कुग्रहान्नरकातिथिः ॥६६॥

---

1. $B^1$, $B^2$ and $B^3$ मुखं प्रक्षालय शीघ्रं भूपे । 2. $B^1$, $B^2$ and $B^3$ भाषितम् । 3. $B^1$, $B^2$ and $B^3$ एवं बहुप्र° । 4. $B^3$ adds the following after this verse:—यतः काव्यम्—

गतप्राया रात्रिः कृशतनु शशी शीर्यत इव
प्रदीपोऽयं निद्रावशमुपगतो घूर्णत इव ।
प्रणामान्तो मानस्त्यजसि न तथापि क्रुधमहो
कुचप्रत्यासन्नं हृदयमपि ते सुभ्रु कठिनम् ॥
सन्त्येवात्र गृहे गृहे युवतयस्ताः पृच्छगत्वाधुना
प्रेयांसं प्रणमन्ति किं तव पुनर्दासो यथा वर्तते ।
आत्मद्रोहिणि दुर्जनप्रलपितं कर्णे विषं मा कृथाः
छिन्नस्नेहरसा भवन्ति पुरुषा दुःखानुवृत्त्या पुनः ॥
निश्वासा वदनं दहन्ति हृदयं निर्मूलमुन्मूल्यते
निद्रा नैति न दृश्यते प्रियमुखं नक्तंदिवं रुद्यते ।
कण्ठे शोषमुपैति पादपतितः प्रेयांस्त्वदोपेक्षित
सख्यः क गुणमाकलय्य दयते मानं च यं कारिता ॥

These three stanzas from Amaru and Bāṇa are dealt with in the explanatory notes at the end.

5. $B^1$, $B^2$ and $B^3$ तिर्यङ्स्वरवं प्रकाशितम् । 6. $B^1$, $B^2$ and $B^3$ वचस्ते हृदये धर्तुं । 7. $B^1$, $B^2$ and $B^3$ परं कोपो ।

[1]यथा कुग्रहतो राज्ञी दुःखं प्राप्ता मनोरमा ।
तां कथां शृणु हे देवि ! कथयामि तवाग्रतः ॥६७॥
श्रूयतां पूर्वदेशेस्ति पुर्य्ययोद्ध्याभिधानतः ।
जन्मेजयोस्ति भूनाथ आसमुद्रान्तभूविभुः[2] ॥६८॥
मान्यास्त्यन्तःपुरी तस्य पट्टराज्ञी मनोरमा ।
तया समं सुखं भुङ्क्ते गते काले कियत्यपि ॥६९॥
राज्यं निष्कण्टकं भुङ्क्ते न हि कोप्यस्त्युपद्रवः[3] ।
आस्थानस्थो नृपोन्येद्युरिन्द्रदूतः समागतः ॥७०॥
प्रणम्य तं महीनाथं दूतो वचनमब्रवीत् ।
इन्द्रेण प्रेषितो देव ! श्रूयतां मद्वचस्त्वया ॥७१॥
अस्ति दक्षिणपाथोधौ[4] त्रिकूटाचलसंनिधौ ।
द्वीपोस्ति भीषणो नाम लङ्कातो विषमक्षितौ[5] ॥७२॥
क्वचा राक्षसास्तत्र दानपुण्यस्य विघ्नदाः ।
तुष्यन्ति देवताभ्यस्ते प्रतीकारं विना[6] न हि ॥७३॥
उपद्रवस्तु देवानां तेभ्यः संजायते सदा ।
देवेभ्यो न मृतिस्तेषां राक्षसानां कथंचन ॥७४॥
मनुष्या भक्षमस्माकं देवेभ्यस्तु [7]मृतिर्न हि ।
राक्षसास्तेन गर्वेण न मन्यन्ते भयं क्वचित् ॥७५॥
मनुष्यैर्मारणीयास्ते तेनाहं प्रेषितोधुना ।
त्वत्समो भूपतिर्नास्ति पराक्रम्युपकारकृत्[8] ॥७६॥
अस्मदीयस्वामिवाचं[9] प्रमाणीकुरुषे यदि ।
तदा त्वं निजसैन्येन प्रयाणं कुरु मत्समम् ॥७७॥
इन्द्रोप्येष्यति तत्रैव वैमानिकसमन्वितः ।
गोदावर्यस्ति संकेतमुभयोः सैन्ययोरपि ॥७८॥
जन्मेजयस्य भूपस्य ससैन्यस्य सुरप्रभोः ।
परस्परं च संजातः[10] संकेतस्थानसंगमः[11] ॥७९॥

---

1. $B^2$ and $B^3$ add कथा($B^3$कु) ग्रहोपरिकथा before this verse । 2. $B^1$, $B^2$ and $B^3$ भूपतिः । 3. $B^2$ and $B^3$ °द्रवो । 4. $B^1$, $B^2$ and $B^3$ °सामुद्रः । 5. $B^1$, $B^2$ and $B^3$ लङ्काविषमभूमिषु । 6. $B^1$, $B^2$ and $B^3$ विना तेन प्रतीकारे तुष्यन्ति देवता न हि । 7. $B^1$ वराहे वान्मृतिर्न हि । 8. $B^1$, $B^2$ and $B^3$ उ(ह्र)पकारी पराक्रमी । 9. $B^3$ अस्माकं स्वामिनो वाचां । 10. $B^1$, $B^2$ and $B^3$ °तं । 11. $B^1$, $B^2$ and $B^3$ मम ।

मार्गदर्शक – आचार्य

ऐरावणे समारूढ इन्द्र इन्द्रपुरीपतिः[1] ।
जन्मेजयः समुत्तीर्णो मेले सति निजद्विपात् ॥८०॥
समालिङ्गितवानिन्द्रो दृष्ट्वा जन्मेजयं नृपम्[2] ।
संजाता परमा प्रीतिरुभयोरपि ही तयोः[3] ॥८१॥
इन्द्रदत्तविमानाधिरूढः स नृपपुङ्गवः ।
सेनान्यस्तस्य चारूढाश्चलिता राक्षसान् प्रति ॥८२॥
कौतुकाच्चलितश्चेन्द्रो वैमानिकसमन्वितः ।
दूतेन ज्ञापितं वृत्तं रक्षसां भूभुजा(जे)क्षणात्[4] ॥८३॥
संजाता राक्षसाः सर्वे संनद्धाः सपरिच्छदाः ।
असमानं नृपं ज्ञात्वा संग्रामाय स्थिताः पुरः ॥८४॥
समागत्यास्य सैन्येन विमानैर्वेष्टितं पुरम् ।
नृपादेशाद्भटैर्युद्धं प्रारब्धं राक्षसैः समम् ॥८५॥
दुर्गस्था दुर्गपाः सर्वे बहिःस्था[5] नृपसैनिकाः ।
जातं परस्परं युद्धं दारुणं भीषणं महत् ॥८६॥
सायकैश्छि(श्छ)न्नमाकाशं[6] खड्गखाट्कारकैर्दिशः ।
जीनशालास्तु भिद्यन्ते [7]घातैर्भल्लकभीषणैः ॥८७॥
श्रूयन्ते नैव वाद्यानि[8] गुणटङ्कारकाग्रतः ।
ईदृशे तत्र संग्रामे देवानामपि कौतुकम्[9] ॥८८॥
यथोन्मत्तकरीन्द्रेणोन्मूल्यन्ते भूमिपादपाः ।
तथैवोन्मूलयामास भूपालो रक्षसां पुरीम् ॥८९॥
भग्नं दुर्गं समालोक्य कवचा नाम राक्षसाः[10] ।
मुक्तशस्त्रकराः सर्वे पतिता भूपपादयोः ॥९०॥
सर्वे ते चौरवद्दैत्या आनीता इन्द्रसंनिधौ ।
एतेपराधिनो ही वः कुरु दण्डं यथोचितम् ॥९१॥
इन्द्रोपदेशतस्तेपि कृताः पातालवासिनः ।
पुर्यभ्येत्य[11] समग्रा सा लुण्ठिता ध्वंसिता पुनः ॥९२॥

---

1. B¹ and B² °भ्रा° । 2. B¹, B² and B³ ज्ञात्वा जन्मेजयं भूपो (यम् ?) इन्द्रेणालिङ्गितं द्रुतम् । 3. B¹, B² and B³ °रुभयोर्नृपदेवयोः । 4. B¹ ज्ञापितस्तेषां राक्षसानां च भूपतिः । 5. B¹, B² and B³ बाह्यस्था । 6 B¹, B² and B³ बाणौघैः छि( पैरछ )न्न° । 7. B¹ या° । 8. B¹, B² and B³ न श्रूयन्तेपि वादित्रा । 9. B¹, B² and B³ कौतुकी देवताधिपः । 10. B¹, B² and B³ दैत्यपाः । 11. B¹, B² and B³ पुरी दैत्य° ।

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज


इन्द्रेण भूप आनीतः[1] सहर्षेणामरावतीम् ।
महोत्सवेन[2] चागत्योपविष्ट स्थानमण्डपे ॥९३॥
निजासने स्वयं भूपः स्थापितो मध्यतो गृहम् ।
गीतनृत्यकथावार्तालापैः[3] प्रीणितवान् भृशम् ॥९४॥
इन्द्रोवोचन्नृपस्याग्रे[4] भूप ! मामनृणीकुरु ।
मत्पार्श्वतो वृणु वरं यत्किंचिद्रोचते तव ॥९५॥
त्वत्प्रसादान्नृपः प्राह सर्वमप्यस्ति मद्गृहे[5] ।
आसमुद्रान्तभूपोस्मि कल्याणं वर्तते गृहे ॥९६॥
एवं श्रुत्वा हरिः प्राह[6] न मोघं देवदर्शनम् ।
ज्ञात्वैवं भूपतिः प्राह[7] यथास्तु तव भाषितम् ॥९७॥
इन्द्रेणोक्तं तदा ब्रूहि यदस्ति तव मानसे ।
राजोचे देहि देवा( वां )शं वस्त्रयुग्मं च कुण्डलम् ॥९८॥
महिष्यग्रे गतश्चेन्द्रो बभाषे स्वप्रियां प्रति ।
देहि कुण्डलवस्त्रे मे देयं जन्मेजयाय मे ॥९९॥
तयोत्तार्य स्वदेहात्तत्प्रदत्तं स्वपतेः करे ।
कथयामास चेन्द्राणी देवराजाग्रतस्ततः ॥१००॥
यथाहं तव नारी हि वियुक्ता कुण्डलांशुकैः[8] ।
वियोगो भवतात्तस्मै प्रियापरिजनैः समम् ॥१०१॥
इन्द्रो वदति हा धिग्-धिग् मुधा[9] शापो न दीयते ।
दत्तो मयान्यथा न स्याद्भूपोच्छेदोङ्गनारिपुः[10] ॥१०२॥
हरिरेवं जगौ राज्ञे दत्त्वा सत्कुण्डलांशुके ।
मत्पार्श्वे त्वत्समाभीष्टा नित्यं तिष्ठन्ति तद्वरम् ॥१०३॥
एतच्छ्रुत्वावदद्भूप[11] इन्द्रोवग्दर्शनं पुनः ।
समायातो गृहे राजा प्रविष्टः पुरमुत्सवैः[12] ॥१०४॥
जितकाशी नृपोभ्येत्योपविष्टस्तु क्षणं सभाम् ।
विसर्ज्य मन्त्रिसामन्तान्[13] गतोन्तःपुर ईशिता ॥१०५॥

---

1. $B^1$, $B^2$ and $B^3$ इन्द्रेणानीयते राजा । 2. $B^1$ and $B^2$ °च्छ° । 3. $B^1$ and $B^2$ °वार्ताप्रीत्या; $B^3$ °वार्ताप्रीता: । 4. $B^1$, $B^2$ and $B^3$ °नृपाग्रेण । 5. $B^1$, $B^2$ and $B^3$ सर्वोऽस्ति मम मन्दिरे । 6. $B^1$, $B^2$ and $B^3$ हरिर्ब्रूते । 7. $B^1$, $B^2$ and $B^3$ प्रोचे । 8. $B^1$, $B^2$ and $B^3$ तेन कामिन्या वियुक्ता कुण्डलांशुकात् । 9. $B^1$, $B^2$ and $B^3$ वदते वासवो हा धिङ् मुधा । 10. $B^1$, $B^2$ and $B^3$ दत्तोपि नान्यथा स्वामिन्! भूपाहार: स्त्रियो रिपु: । 11. $B^1$ नमद्भूपम् । 12. $B^1$ °च्छवे । 13. $B^1$, $B^2$ and $B^3$ विसर्जयित्वा सा° ।

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

पूर्वं मन्त्रिभिरालापं कृत्वालापितवान् स्त्रियः ।
स्नेहेन प्रेरितो भूपः पट्टराज्ञीगृहं[1] गतः ॥१०६॥
उत्थाय[2] च नमस्कारं कुरुते स्म[3] मनोरमा ।
शुद्धशीलाः स्त्रियो यास्तु तासां स्याद्देवता पतिः ॥१०७॥
पर्यङ्के ह्युपविष्टो[4] राज्ञ्यप्यग्रेस्य संस्थिता ।
अवादी[5]न्मत्कृते किं किं समानीतं सुरालयात्[6] ॥१०८॥
निष्कास्य कुण्डले राजा[7] देवदूष्यं च तद्ददौ[8] ।
हर्षेण प्रावृता ताभ्यां[9] जाता देवाङ्गनोपमा ॥१०९॥
सत्कृतस्तु तया भूपः सभायां प्रातरागतः ।
मन्त्रिसामन्तसीमालैः सर्वैरपि नतो नृपः ॥११०॥
राज्यूचे स्नेहतः पत्न्याः[10] किं किं नानयति प्रियः[11] ।
एवमालोच्य गर्वेण सपत्न्यन्तिकमागता ॥१११॥
नमस्कृता च सर्वाभिः( भी ) रूपाद्विस्मयकारिणी ।
सूर्य[12]मण्डल सत्तेजा दुरालोका[13] बभूव सा ॥११२॥
नेपथ्यदर्शनायात्मरूपस्यालोकनाय च ।
आमन्त्रिताः स्त्रियः सर्वा याः स्युः प्राघूर्णिका अपि ॥११३॥
चतुर्धाशनपानादि भोजयत्यात्मनोग्रतः ।
कुण्डलांशुकतेजस्तो दुरालोका गभस्तिवत् ॥११४॥
स्त्रियो यथा यथा तस्याः समालोकनविह्वलाः ।
तथा तथा च[14] सा राज्ञी जाता हास्यपरायणा[15] ॥११५॥
प्रावृते कुण्डले देवि ! न ते तापयतस्तु नः ।
भवद्दष्टिदु( र्दु )रालोका सहते नेति कौतुकम् ॥११६॥
वस्त्रताम्बूलदानेन प्रेषितास्ताः स्त्रियो गृहे ।
राजा राज्यश्रियं भुङ्क्ते सुखग्राही तया सह[16] ॥११७॥
एकस्मिन् दिवसे राज्ञा राज्ञी दृष्टा सुदुर्बला ।
पप्रच्छ तव को व्याधिराधिर्वा बाधतेपि कः ॥११८॥

---

1. $B^1$, $B^2$ and $B^3$ °गृहे । 2. $B^1$, $B^2$ and $B^3$ उत्थीय । 3. $B^1$, $B^2$ and $B^3$ च । 4. $B^1$, $B^2$ and $B^3$ भूपोपविष्टपर्यङ्के । 5. $B^1$, $B^2$ and $B^3$ वदते म° । 6. $B^1$, $B^2$ and $B^3$ दिवौकसात् । 7. $B^1$, $B^2$ and $B^3$ कुण्डलं राजा । 8. $B^1$, $B^2$ and $B^3$ समर्पितम् । 9. $B^1$, $B^2$ and $B^3$ तेन । 10. $B^1$ and $B^2$ पुंसो । 11. $B^1$ and $B^2$ प्रियाम् । 12. $B^1$, $B^2$ and $B^3$ भानु° । 13. $B^1$, $B^2$ and $B^3$ °क्या । 14. $B^1$, $B^2$ and $B^3$ °पि । 15. $B^1$, $B^2$ and $B^3$ पराबदत् । 16. $B^1$ सौख्येन सह सर्वदा ।

प्रच्छनीया न हि स्वामिन्नसौ वार्ता[1] कथंचन।
का सा वार्तास्ति हे देवि! गोपनीया ममापि हि ॥११९॥

महाग्रहेण साप्यूचे दोहदो वर्तते मम।
मनुष्यरुधिरापूर्णवाप्यां स्नानं विधीयते ॥१२०॥

भूपोवग्नात्मसदृशं त्वयावादि वचः[2] प्रिये।
मारिवाक् श्रूयते नैव मया कुत्रापि मत्पुरे[3] ॥१२१॥

लालिता या मया नित्यं प्रजा सा मेस्ति पुत्रवत्[4]।
निर्दोषा सा कथं भद्रे घातनीया मया किल ॥१२२॥

दोहदस्तादृशः कार्यो यादृक्चक्रे[5] सुनन्दया।
गजमारुह्य जीवानामभयं दत्तवत्यथो ॥१२३॥

प्रोचे मनोरमा राज्ञी दोहदः पूर्यते यदा।
तदान्नं भुज्यते स्वामिन्नान्यथा दर्शनैर्नवैः[6] ॥१२४॥

भूपः कदाग्रहं ज्ञात्वा राजकार्ये प्रवर्त्तितः।
लङ्घनं पट्टराज्ञी सा चकार स्वल्पबुद्धितः ॥१२५॥

अमात्यमन्त्रिवर्गेण श्रुता वार्ता कियद्दिनैः।
मिलित्वा ते समायाता[7] विज्ञप्तो नृपपुङ्गवः ॥१२६॥

शृणु स्वामिन्! स्त्रियो राजा मूर्खो बालः कदाग्रही।
एते बुद्धिप्रपञ्चेन ग्रहीतव्या हि नान्यथा ॥१२७॥

पट्टराज्ञीकृते सर्वो लङ्घतेन्तःपुरीजनः।
दासा दास्योसुखं प्राप्ताः संतापो भवतोप्यभूत् ॥१२८॥

ततो[8] बुद्धिप्रपञ्चेन पूरणीयस्तु दोहदः[9]।
केनोपायेन भूपोपि पूरणीयोप्यचिन्तयत् ॥१२९॥

मन्त्र्यूचे कार्यतां वापी ह्यलक्तकपयोभृता[10]।
तदा श्रेष्ठ उपायोयं चिन्तितो भूपतिर्जगौ ॥१३०॥

---

1. $B^1$, $B^2$ and $B^3$ पृच्छनीया न ते स्वामिन्निमां वार्तां। 2. $B^1$, $B^2$ and $B^3$ वचनं भाषितम्। 3. $B^1$, $B^2$ and $B^3$ क्रोडङ्घ्रिर्मारिवाचोयं नान्यत्र श्रूयते क्वचित्। 4. $B^1$, $B^2$ and $B^3$ नित्यमेषा मे पुत्रवत्प्रजा। 5. $B^1$, $B^2$ and $B^3$ यादृशास्ते। 6. $B^1$ दर्शनेन वै। 7. $B^1$, $B^2$ and $B^3$ °त्वास्ते समागत्य। 8. $B^1$, $B^2$ and $B^3$ तदा। 9. $B^1$, $B^2$ and $B^3$ पूर्यते दोहदो न किम्। 10. $B^1$, $B^2$ and $B^3$ ह्यलक्तोदकपूर्यते (पूरिता)।

कृता वापी नृपादेशादलक्तकजलैर्भृता[1] ।
विज्ञप्ता पट्टराज्ञी सा मन्त्रिणा विनयेन च ॥१३१॥

मातरुत्थीयतां शीघ्रं पूर्यतां दोहदो निजः ।
सा च यावद्गता वाप्यां दृष्टा सा रुधिरावृता[2] ॥१३२॥

सखीभिः सहशृङ्गारे[3] र्गीतवादित्रसंचयैः[4] ।
दीनदुःस्थितदानानि ददती तुष्ट[5]मानसा ॥१३३॥

नरैरवीक्षिता वाप्यां[6] प्रविष्टा स्नानमण्डपे[7] ।
दोहदं पूरयित्वा च वाप्या यावच्च निर्गता ॥१३४॥

भारुण्डेन तदोत्क्षिप्ता मांसपिण्डस्पृहालुना ।
नीयते नीयते राज्ञी स्त्रीभिः कोलाहलः कृतः ॥१३५॥

सेवका यावदायान्ति तावद्राज्ञी हृता[8] खगैः[9] ।
शोधिता बहुभिर्दूरं क नीता ज्ञायते न हि ॥१३६॥

शुकोवगेप दृष्टान्तः[10] पट्टराज्ञी तवोदितः[11] ।
मन्यतां मद्वचो देवि ! तद्वत्त्वमपि चान्यथा ॥१३७॥

कथयित्वा त्विमां वार्तां शुकोगाद्भूपसंनिधौ ।
अस्माकीनं वचो देव ! पट्टराज्ञी न मन्यते ॥१३८॥

राड्वे शुक ! राज्ञेपा त्वद्वचा कुपिता कथम् ।
भण्डसेनौपम्यवार्ता कीरेणोक्ता नृपान्तिके ॥१३९॥

हसित्वा भूपतिः प्राह युक्तमेव त्वयोदितम् ।
वाढं पंचयति स्वं यः[12] शैथिल्यं तस्य युज्यते ॥१४०॥

परं कीर ! त्वया वाच्यं [13]पुष्पवत्याः कथानकम् ।
परिणीता च कौमारी वृत्तान्तं तन्निवेदय ॥१४१॥

शुकोवगस्ति कौमारी रूपेणात्यन्तमद्भुता ।
देवाचार्यो न शक्नोति कर्तुं तद्गुणवर्णनम् ॥१४२॥

---

1. $B^1$, $B^2$ and $B^3$ भूपादेशेन तडागी आ(ला)क्तजलपूरिता । 2. $B^1$, $B^2$ and $B^3$ वाप्यां सा गता यावद्दृष्टा शोणितपूरिता । 3. $B^1$, $B^2$ and $B^3$ सशृङ्गारा सखीसार्धं° । 4. $B^1$, $B^2$ and $B^3$ °त्रकादिभिः । 5. $B^1$ हृष्ट° । 6. $B^1$, $B^2$ and $B^3$ नरैर्विवर्जिता वापी । 7. $B^1$, $B^2$ and $B^3$ स्नानहेतवे । 8. $B^3$ हृता । 9. $B^1$, $B^2$ and $B^3$ खगे । 10. $B^1$, $B^2$ and $B^3$ °तदाख्यानं । 11. $B^1$, $B^2$ and $B^3$ °दितम् । 12. $B^1$ and $B^2$ पंचयत्या ($B^1$ चित्वा ) त्मनो गाढं; $B^3$ वञ्चयितात्मनो गाढं । 13. $B^1$ and $B^2$ °ष्पा° ।

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज



जन्म स्यात् सफलं तस्य यद्गृहे गृहिणी हि सा ।
शुकस्य वचनं श्रुत्वा जातः कन्यानुरागभाक् ॥१४३॥
शुकराज ! त्वया शिक्षा दातव्या मत्कृते तथा ।
यणाद्येन[1] प्रकारेण कन्यामुद्वाहयाम्यहम् ॥१४४॥
कार्यं सिद्ध्यति दुःसाध्यं शुकः प्राहोद्यमादिह ।
परिणीता च कौमारी शेनिका विक्रमेण वै[2] ॥१४५॥

भूपोवकीर ! का कन्या पर(रि)णीता कथं पुनः ।
विक्रमेणेति[3] वृत्तान्तं कथनीयं ममाग्रतः ॥१४६॥

शुकोवगेतदाख्यानं श्रूयतामेकचित्ततः ।
पश्चिमायां तु दिश्यत्र वारुणं नाम पत्तनम् ॥१४७॥
रूपचन्द्राभिधो राजा राज्ञी रुक्मप्रभाभिधा ।
बहुपुत्रोपरिष्टात्तु कन्या जातास्ति शेनिका ॥१४८॥
लाल्यमाना कियद्वर्षैः[4] पाठिता सा ततः परम् ।
सर्वशास्त्रे कृताभ्यासा परं सा द्वेषिणी नरे[5] ॥१४९॥
क्रमेण यौवनं प्राप्ता रूपेण रतितुल्यका[6] ।
मातृ( ता )पित्रोश्च संजाता संतापं तन्वती तदा ॥१५०॥
अन्यदा विक्रमो राजा मालवानामधीश्वरः ।
उपविष्टः सभायां हि मन्त्र्यमात्यपरीवृतः ॥१५१॥
सभायां तत्र चायातो विदेशीयो द्विजः कचित् ।
लात्वा देशं[7] समासीनो यथास्थाने नृपाज्ञया[8] ॥१५२॥
पृष्टो[9] विक्रमभूपेन सुधामधुरया गिरा ।
कथं कुतः समायातः ? प्रकाशय ममाद्भुतम् ॥१५३॥
अवादीद् ब्राह्मणो देव ! ह्येकचित्ततया शृणु[10] ।
अद्भुतं यादृशं पृष्टं कथयामि च तादृशम् ॥१५४॥
वारुणं नाम नगरं ह्यस्ति पश्चिमदिश्यहो ।
रूपचन्द्राभिधो राजा सेचानीनामिका[11] सुता ॥१५५॥

---

1. $B^1$ and $B^2$ यथा येन । 2. $B^2$ and $B^3$ विक्रमं यथा । 3. $B^1$, $B^2$ and $B^3$ एतदामूल० । 4. $B^1$, $B^2$ and $B^3$ °र्वे । 5. $B^2$ and $B^3$ नरैः । 6. $B^1$, $B^2$ and $B^3$ सादृशा ( $B^3$ शी ) । 7. $B^1$, $B^2$ and $B^3$ दत्त्वाशिषं । 8. $B^1$, $B^2$ and $B^3$ द्विजोत्तमः । 9. $B^2$ पृष्टे । 10. $B^1$, $B^2$ and $B^3$ तदा शृणु तमद्भुतम् । 11. $B^1$ नामतः; $B^2$ and $B^3$ नाम तत्° ।

विद्यया विजिता ब्राह्मी रम्भा रूपेण चात्मनः[1] ।
बुद्ध्या च वाक्पतिर्जिग्ये[2] चातुर्येण च विष्टपम् ॥१५६॥

अस्तीदृश्यद्भुता कन्या विश्वलोकविभूषणम्[3] ।
पुरुषद्वेषिणी सा तु रत्नद्वेषी यतो विधिः ॥१५७॥[4]

रम्याद्रम्यतरां वार्तां श्रुत्वा विक्रमभूपतिः ।
ददाति स्मेप्सितं दानं ब्राह्मणस्तु विसर्जितः ॥१५८॥

अथ विक्रमभूनाथश्चातुर्यैकधुरन्धरः ।
वार्तामोहितचित्तः सन्[5] प्रेषयामास सेवकान् ॥१५९॥

मार्गदर्शक
यावदीति नरद्वेषं अकारास्कुल एव सा[6] ।
कन्याया मूलवृत्तान्तं नी( ज्ञा? )त्वा मे कथ्यतां पुरः ॥१६०॥

शिक्षां दत्त्वाथ भूपेन प्रेषिता निजपूरुषाः ।
क्रमेण तेऽपि[7] संप्राप्ता वारुणाभिधपत्तने ॥१६१॥

तस्थुरेकप्रदेशेन वृद्धमालिनिकागृहे ।
मिष्टाद्याहारदानेन वृद्धाप्यावर्जिता भृशम् ॥१६२॥

मालिन्या ते तया पृष्टाः किमर्थं समुपागताः ?
मम पुत्राधिका यूयं यद्वाच्यं तद्वदन्तु भोः[8] ॥१६३॥

राजपुत्रा मातुराहुः काप्यास्ते शेनिका कनी[9] ।
सुता सा द्वेषिणी पुंस्सु ( सु ) तद्वृत्तान्तं[10] निगद्यताम् ॥१६४॥

---

1. B¹, B² and B³ रूपे रम्भायते येन ब्राह्मी विद्यागुणैर्जिता । 2. B¹, B² and B³ पतिर्जल्पतः । 3. B¹, B² and B³ °विभूषणा । 4. B³ adds the following verses after this :—

शशिनि खलु कलङ्कं कण्टका पद्मनाले
उदधिजलमपेयं पण्डिते निर्धनत्वम् ।
दश.....................गोदुर्गत्वमन्त्रत्वे
धनिगुण (च) कृपणत्वं रत्नदोषः कृतान्तः ॥
चन्द्रे लाञ्छनता हिमं हिमगिरौ क्षारं जले सागरे
सुधा चन्दनपादपा (पे) विषधरै (राः) पद्मे स्थिताः कण्टकाः ।
स्त्रीरत्ने (हि) जरा कुचेषु पतितं वृद्धस्य दारिद्र्यता
..........सहितं देवाधिपा निर्मितम् ॥

5. B¹ and B² °सोऽपि । 6. B¹, B² and B³ कथं केन प्रकारेण नरद्वेषेण वर्तते । 7. B¹, B² and B³ अनुक्रमेण । 8. B¹, B² and B³ कथनीयास्ति तद्वद । 9. B³ सेचानी चास्ति कन्यका । 10. B¹, B² and B³ नरद्वेषी श्रुतास्माभिर्वृत्तान्तं तत्° ।

मालिन्यूचेथ वृत्तान्तं मत्पुत्राः शृणुताद्भुतम् ।
सेचानिकासमीपेहं यास्यामि च गताप्यहम् ॥१६५॥
अन्यदा रूपचन्द्रोयं चिन्तयामास मानसे ।
नरद्वेषभवां वार्तां गत्वा पृच्छामि तां सुताम् ॥१६६॥
यावद्याति सुतावासे [1]भूपतिर्निष्परिच्छदः ।
तावत्सुता[2] समादिष्टा दत्ता जवनिकान्तरे ॥१६७॥
तदन्तरेवदद्भूपो वत्से[3] मद्वचनं शृणु ।
पक्षोभयविशुद्धा त्वं सुरूपा सद्गुणोचिता ॥१६८॥
सुशीला [4]सुन्दराचारा सदाक्षिण्या सुशास्त्रवित् ।
परं वत्से कथं जातं पुरुषद्वेषलक्षणम् ? ॥१६९॥
कन्योचे श्रूयतां तात ! त्वं तां शृणु कथामथ ।
गङ्गातीरेस्ति चासन्नं बदरीनामकं वनम् ॥१७०॥
सीचानकयुगं[5] तत्र वनान्तर्निवसत्यहो[6] ।
अन्यदा जलपानाय गतं गङ्गातटे तु तत्[7] ॥१७१॥
सार्थेशः कोपि तीरस्थः प्रासुकान्नेन सद्यतेः[8] ।
पारणं कारयामास दृष्ट्वा [9]सिश्चानकोब्रवीत् ॥१७२॥
पश्य भद्रे ! मुनीन्द्रस्य धन्यो दत्ते च[10] पारणम् ।
प्राप्यते यदि मानुष्यं तदावां दीयते प्रिये ! ॥१७३॥
दानानुमोदनात्पुण्यमावाभ्यां समुपार्जितम् ।
कियद्भिस्तु दिनैस्तत्र वृक्षे मुक्तमथाण्डकम् ॥१७४॥
प्राप्ते ग्रीष्म ऋतौ तत्र दावानल उपस्थितः ।
संप्राप्तो दारुणोटव्यां वृक्षासन्नः समागतः ॥१७५॥
सिश्चान्योक्तं द्रुतं स्वामिन् ! व्रज पानीयहेतवे ।
यथोपशाम्यते वह्निर्वृक्षपर्यन्तसेचनात् ॥१७६॥
एवं श्रुत्वा ततः शीघ्रं गतः [9]सिश्चानको जले ।
तावत्सि[9]श्चानका पश्चाज्ज्वालापूरेण[11] वेष्टिता ॥१७७॥

---

1. B[3] भूपोपि नि°। 2. B[1], B[2] and B[3] सुताभिरा°। 3. B[1] वच्छे। 4. B[1], B[2] and B[3] सत्कु( B[3] कु)ता°। 5. B[1], B[2] and B[3] °न युगलं। 6. B[1], B[2] and B[3] निवसन्ति (ति) वनान्तरे। 7. B[1] and B[2] गतौ गङ्गातटे खगौ°। 8. B[1] and B[2] °कान्नं मुनीश्वरे। 9. B[1] and B[2] सेचा°। 10. B[1], and B[3] ददति। 11. B[1], B[2] and B[3] °लामालेन।

सिंहानी चिन्तयत्यन्तर्गतो भर्ता स कातरः ।
आत्मजेनापि न स्नेहः प्रियया तस्य किं भवेत् ॥१७८॥

धिग् धिग् निःस्नेहमर्त्यानां मुखे दृष्टेपि पातकम् ।
सिंहानी चिन्तयत्येवं दग्धा दावानलेन सा ॥१७९॥

मुनिदानानुमोदेन पुरा यत्पुण्यमर्जितम् ।
तत्पुण्यान्मानुषं जन्म[1] संजाता त्वद्गृहे सुता ॥१८०॥

तस्मात्कारणतस्तात[2] ! पुरुषद्वेषिणी ह्यहम् ।
न रोचते हि मे मर्त्यमुखस्यालोकनं क्वचित् ॥१८१॥

एवं पुत्रीकथां श्रुत्वा राजकार्ये गतो नृपः ।
मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज
अहं च[3] तन्मुखाच्छ्रुत्वा समायाता[4] निजे गृहे ॥१८२॥

चरैर्विक्रमभूपस्य मालिन्या मुखतः श्रुतम् ।
सिंहान्याः[5] पूर्ववृत्तान्तं ज्ञात्वागत्योक्तमीशितुः ॥१८३॥

विज्ञाय कन्यकावृत्तं विक्रमो वीर उत्तमः ।
उपायांश्चिन्तयामास पाणिग्रहणवाञ्छया ॥१८४॥

गौडिकावंशसंजाता वागलक्रीडनादिकाः[6] ।
गौडदेशात्समानीताः सुक्रीडावाडिका घनाः[7] ॥१८५॥

मन्त्रिणां राज्यभारं हि दत्वा साहसिकाग्रणीः ।
किंचित्सैन्यं समादाय वह्निवेतालकान्वितः ॥१८६॥

सह पेटकवर्गेण भूपतिर्गरिमान्वितः ।
सेचनकाभिधानं च स्वनामस्थापनं कृतम् ॥१८७॥

मार्गे नगरमध्ये ये समायान्ति हि भूभुजः ।
गत्वा तत्र कलावत्यो दर्शयन्ति निजाः कलाः ॥१८८॥

क्रीडन्त्यन्याः कलावत्यः ख्यातः सेचनकः स च ।
विदितः सकले देशे मार्गमुल्लङ्घयत्यपि ॥१८९॥

एवं च ग्रामानुग्रामं क्रीडयन्नद्भुताः कलाः ।
जगाम तत्पुरोद्याने यत्र सेचनिका कनी ॥१९०॥

---

1. B¹ and B² °ण्याद्भुवमानुष्यं । 2. B¹, B² and B³ तेन का° । 3. B¹, B² and B³ मयाद्य । 4. B¹, B² and B³ °याता(तं) । 5. B¹, B² and B³ सेचा° । 6. B¹, B² and B³ इकादयः ( B¹ and B² दिवे ) । 7. B¹, B² and B³ बहवः क्रीडवाडिकाः ।

वारुणाख्यपुरासन्नं[1] वनं पुष्का(ष्पा)वतंसकम् ।
तत्र सेचनको नाम पेटकेन समं स्थितः ॥१९१॥
अतः प्रभातवेलायां रूपचन्द्रो नरेश्वरः ।
अनेकमन्त्रिसामन्तपूरितास्थानसंस्थितः ॥१९२॥
वामदक्षिणतस्तस्थुः सुस्वराः सरसा बुधाः ।
अग्रे गीताङ्गनादक्षा मन्येसौ वासवोपमः ॥१९३॥
अतः सेचनको[2]प्यश्वारूढः स्त्रीभिः समन्वितः[3] ।
संनद्ध शस्त्रपाणिस्थः सभां गत्वा[4] नमन्नृपम् ॥१९४॥
देव ! ते[5] सत्यशीलाद्या विदिता विश्वमण्डले ।
तच्छ्रुत्वा त्वत्समीपेहं ह्यागतः शृणु कारणम् ॥१९५॥
विग्रहे देवदैत्यानां जायमाने रणाङ्गणे[6] ।
मया भूभामिनीनाथ ! गम्यते हि त्वदाज्ञया ॥१९६॥
यदि मे देहि वाचं त्वं तदा मे गमनं भवेत् ।
यस्य तस्यान्तिके पुंसो वाचं कोपि न याचते ॥१९७॥
ततो नृपो रूपचन्द्र[7]उवाचेदं नरं प्रति ।
वाचा दत्ता मया तुभ्यं कथयस्व यथोचितम् ॥१९८॥
नरोवोचदियं भार्या रक्षणीया प्रयत्नतः ।
यस्य कस्यान्तिके न स्त्रीरत्नं केनापि धार्यते ॥१९९॥
पुनर्विज्ञापयाम्येवं संग्रामे गम्यते मया ।
कुर्वतः समरं दैत्यैर्यदा[8] पतति मे वपुः ॥२००॥
प्रियाया दर्शनीयं तत् करोत्वेषा यथोचितम् ।
शिक्षां दत्त्वा नमन् भूपं हयेनोत्पत्य खं ययौ ॥२०१॥
पश्यमाना सभा सर्वा गतो दृष्टेरगोचरम् ।
सभ्याः सर्वे प्रशंसन्ति तं नरं कौतुकाद्भुतम् ॥२०२॥
कियत्यपि गता वेला करं खेटकसंयुतम् ।
आकाशात्पतितं दृष्टं सभा सर्वा चमत्कृता ॥२०३॥

---

1. $B^3$ वारुणीनगरासन्नं । 2. $B^1$, $B^2$ and $B^3$ सेचानकादेशद° । 3. $B^1$, $B^2$ and $B^3$ स्त्रियान्वितः । 4. $B^3$ नत्वा । 5. $B^1$ and $B^2$ त्वत्° । 6. $B^1$, $B^2$ and $B^3$ तत्र घोरं रणाङ्गणम् । 7. $B^1$, $B^2$ and $B^3$ रूपेन्दुभूपश्च रु(ह्य)वा° । 8. $B^1$, $B^2$ and $B^3$ दैत्यानां युद्धमानोहं यदा ।

हाहाकारपराः सर्वे यावत्पश्यन्ति विस्मयात् ।
तावत्करो द्वितीयोपि सखड्गः सहसापतत् ॥२०४॥

हाहापरस्ततो राजा दृष्ट्वा खड्गयुतं करम् ।
पतितं तावदाकाशान्मस्तकं तन्नरस्य च ॥२०५॥

ततश्च दुःखिताः सर्वे धुन्वाना मस्तकं मुहुः ।
सतुरङ्गः कवन्धश्चापतदास्थानमण्डपे ॥२०६॥

सर्वे हाहापरा जाताः सर्वे जाताः सुदुःखिताः ।
दर्शितं तत्प्रियायास्तद् दृष्ट्वा भर्तुः स्वरूपकम्[1] ॥२०७॥

तदग्रेञ्जलिमायोज्य पादपद्मं नमस्कृतम् ।
अवादीत् त्वत्प्रसादेन भुक्ता भोगा हृदीप्सिताः ॥२०८॥

तया भूपोपि विज्ञप्तः[2] स्वामिन् ! काष्ठानि मेर्पय ।
मृते भर्तरि नारीणां नान्यो मार्गः कुलस्त्रियाम् ॥२०९॥[3]

राजोचे स्थीयतां भद्रे ! मृते पि न हि किंचन ।
तव निर्वाहजां[4] चिन्तां यावज्जीवं करोम्यहम् ॥२१०॥

नारी प्राह तव स्वामिन् ! शीलाख्या वर्तते भुवि ।
रूपं दृष्ट्वा परस्त्रीणां न लोभस्तव[5] युज्यते ॥२११॥

एतच्छ्रुत्वा नृपः प्रोचे न लोभस्त्वं सुतासमा ।
काष्ठावरोहणे नार्यास्तिष्ठ तिष्ठोच्यते वचः ॥२१२॥

इत्युक्त्वा चन्दनैः काष्ठैर्नृपोकारापयच्चिताम्[6] ।
अतिस्नेहानुभावात्स्त्री[7] प्रविष्टा सा चितानले[8] ॥२१३॥

---

1. B[1], B[2] and B[3] भर्तुर्यथाविधि । 2. B[1] भूपः मुवि°; B[2] and B[3] भूपस्तु वि° ।
3. B[3] adds the following, after this verse :—

उक्तं च—पतियुगलकमेवोन्मत्तपुण्याकरस्य,
　　त्रिनयनतनुपूजा वाथ वा भूमिपालः ।
　　विमलकुलभवानामङ्गनानां शरीरं,
　　पतिकरकरजैर्वा संव्रणं सप्तजिह्वैः ॥
　　स्त्रीणां दोषसहस्रेषु गुणत्रयमुपस्थितम् ।
　　पुत्रोत्पत्तिर्गृहारम्भं विपत्तिः पतिना सह ॥

4. B[1] and B[2] °हेकों । 5. B[1], B[2] and B[3] लोभं तव । 6. B[1], B[2] and B[3] °ष्ठैश्चितां कारापयन्नृपः । 7. B[1] and B[2] °वा स्त्री । 8. B[3] °लम् ।

युग्मस्नानेन[1] धौताङ्गाः सभासभ्याः समागताः ।
स तावज्जितकाशी ना नत्वा भूपं पुरः स्थितः ॥२१४॥
हे देव! त्वत्प्रसादेन जित्वा दैत्यमहाबलम्[2] ।
समायातोधुनास्म्यत्र देहि मे वनितां विभो ! ॥२१५॥
राजा सविस्मयश्चित्ते यावद्दत्ते न चोत्तरम् ।
तावता[3] स नरः प्राह[4] पूर्वोक्तं देव ! नान्यथा ॥२१६॥
तृषार्तोम्बु क्षुधार्तोन्नं स्त्रीः कामं दुर्गतो धनम् ।
न मुञ्चति तथा सत्यं वचः सत्पुरुषो निजम्[5] ॥२१७॥
नरस्य वचनं श्रुत्वा भूपः स्थाता निरुत्तरः[6] ।
तावन्मन्त्रीश्वरो ब्रूते मद्वचः श्रूयतां प्रभो ! ॥२१८॥[7]
प्रत्यक्षोयं[8] मृतो दृष्टो जीवन्नेवाथ दृश्यते ।
तदा सा दैवयोगेन राज्ञीपार्श्वे विलोक्यताम् ॥२१९॥
इति मन्त्रिवचः श्रुत्वा भूपेनापि तथा कृतम् ।
राज्ञीपार्श्वात्समानाय्य तस्य पुंसोर्पिताङ्गना ॥२२०॥
नरेण तत्र कैवारं प्रारब्धं नरपाग्रतः ।
भूपो ज्ञात्वा कलावन्तं हृष्टो दत्ते धनं घनम् ॥२२१॥
सहर्षो भूपतेर्लोकैः स्त्रियो जाताः ससम्मदाः ।
विसर्जितो नरः सोपि गतोस्तं च दिवाकरः ॥२२२॥
प्रातःकाले च भूनेतोपविष्ट स्थानमण्डपे ।
ज्योतिषिको[9] नरः कोपि भूपपार्श्वे समागतः ॥२२३॥
द्वादशतिलकैर्युक्तः कक्षायां न्यस्तपुस्तकः ।
भूपस्याशीर्वचो दत्त्वोपविष्टस्तु तदग्रतः[10] ॥२२४॥
पृष्टो भूपेन भो ज्योतिषिक ! ज्ञाता किमागमम्[11] ।
किं शास्त्रं दर्शयोद्दामं कलायाः प्रत्ययं निजम् ॥२२५॥

---

1. P[1], and P[3] युग्म° । 2. B[1], B[2] and B[3] दैत्यान् महाबलान् । 3. B[1], B[2] and B[3] °तः । 4. B[1], B[2] and B[3] नरो ब्रूते । 5. B[1], B[2] and B[3] have instead :—

स्त्रियं कामी धनं क्षीणं क्षुधिता(तो)न्नं तृषज्जलम् ।
प्राप्यते तानि वस्तूनि केके ? त्यं न मुंचति ॥

6. B[1] and B[2] भूपे नायाति चोत्तरम् । 7. B[3] omits this verse completely । 8. B[2] °क्षेयं । 9. B[1], B[2] and B[3] °तिष्कको । 10. B[1] दत्वाप्युपविष्टस्त° । 11. B[1], B[2] and B[3] भो ज्योतिः ! किं किं जानाति चागमम् ।

स्वामिन् ! सत्यमिदं वाक्यं भवता यत्प्ररूपितम् ।
पुस्तकस्य वहे भारं यद्यहं प्रत्ययोऽस्मितः[1] ॥२२६॥
धनस्य प्रत्ययो दानं प्रत्ययः पात्रमंहतेः[2] ।
पात्रे प्रत्यय आचारो[3] ज्ञानेपि प्रत्ययस्तथा ॥२२७॥
यथायं [4]प्रत्ययो राजन्नधुना पश्य कौतुकम् ।
निष्कास्य प(ख)टिकां कोशाल्लग्नं स्थापितवांस्ततः ॥२२८॥
बलाबलं[5] ग्रहाणां तु ज्ञात्वा भूपं व्यजिज्ञपत् ।
मेघ आयाति चेद्रौद्रोऽधुना मे प्रत्ययस्तदा ॥२२९॥
ज्योतिर्वचनमाकर्ण्य सभा सर्वापि विस्मिता ।
व्योम्नि मेघलवो[6] नास्ति किमिहालीकभाषया ॥२३०॥
यावदेवं विमृशति[7] तावदभ्रो विनिर्गतः ।
क्षणान्मुशलधाराभिर्लग्नो मेघस्तु वर्षितुम् ॥२३१॥
तत्क्षणाज्जलपूरेण प्रवृत्तः प्लावितुं महीम् ।
सभां स्वीयां[8]जलैः पूर्णां दृष्ट्वा भूपः समुत्थितः ॥२३२॥
ज्योतिष्कस्य करे लग्न ऊर्ध्वभूम्यां गतो नृपः ।
जलेन प्लाविता सापि द्वितीयां भूमिकां गतः[9] ॥२३३॥
दृष्ट्वा तामप्यम्बुपूर्णां[10] भूपो व्याकुलमानसः ।
तृतीयां भूमिमारूढो ज्योतिष्केन समं ततः ॥२३४॥
सापि पूर्णाम्बुभिस्तुर्यां पञ्चमीं[11] च क्रमाद्गतः ।
एकविंशतिभूम्योपि[12] यावत्पूर्णा महाजलैः[13] ॥२३५॥
भूपोवक् श्रूयतां ज्योतिः ! प्रलयो भाषितस्त्वया[14] ।
अधुनाप्यागतः सोयं वद किं[15] क्रियतेधुना[16] ॥२३६॥

---

1. $B^1$, $B^2$ and $B^3$ यदि न प्रत्ययं विभो ! 2. $B^1$ and $B^2$ दानप्रत्ययपात्रता; $B^3$ दाने दाने प्रत्ययपात्रयोः । 3. $B^3$ °यमाचारं । 4. $B^1$ and $B^3$ तथा यत्प्र° । 5. $B^1$ चलाचलं । 6. $B^1$, $B^2$ and $B^3$ मेघालङ्कारको । 7. $B^1$, $B^2$ and $B^3$ °इयन्ति । 8. $B^1$, $B^2$ and $B^3$ यावज्ज° । 9. $B^1$ and $B^2$ गतो । 10. $B^1$, $B^2$ and $B^3$ सापि पूर्णा जले दृष्टा । 11. $B^1$, $B^2$ and $B^3$ पूर्णा चतुर्थ्यां पञ्चम्यां । 12. $B^1$, $B^2$ and $B^3$ भूमीषु । 13. $B^1$, $B^2$ and $B^3$ महो जले । 14. $B^1$, $B^2$ and $B^3$°यं भाषितं त्वया । 15. $B^1$, $B^2$ and $B^3$ त्वं । 16. $B^1$, $B^2$ and $B^3$ किमु ।

मार्गदर्शक - आचार्य श्री सुविधिसागर जी महाराज



ज्योतिरूचे महाराजन्! महतामिति चेष्टितम्।
संपदि[1] सति(त्यां) नो गर्वो विषादो न विपद्यपि[2] ॥२३७॥

यतः— संपदि यस्य न हर्षो विपदि विषा[2] ॥२३८॥[3]

तावत्पूर्णा जलैः सापि भूमिका भूप उत्थितः।
नृपोपि यावन्नाशा(सा)ग्रं जले मग्नः क्षणेन सः[4] ॥२३९॥

भूपः प्रोचे वद त्सा(सा)धु क्रियतेप्यधुना किमु।
ज्योतिरूचे महाराज[5]! नेत्रमीलनमाचर[6] ॥२४०॥

नेत्रे निर्मील[7]यित्वा च यावद्भूपोनु[8]मीलति।
न तावज्जलदो नाम्बु नार्द्रत्वास्ति भुवोपि च ॥२४१॥

उपविष्टो निजस्थाने न हि कोप्यस्त्युपद्रवः।
तावन्नरेण कैवारं प्रारब्धं भूपतेः पुरः ॥२४२॥

राज्ञा ज्ञातं कलाविज्ञो न सामान्यास्त्यसौ कला।
हसिताः सर्वसामन्ता भूपाद्याश्च चमत्कृताः[9] ॥२४३॥

राज्ञोचेत्यद्भुता विद्या शिक्षिता कस्य पार्श्वतः।
एका पूर्वदिने दृष्टा द्वितीयाद्य किमुच्यते ॥२४४॥

स आह स्मास्ति सार्थेश गुरुः सेचनको[10] मम।
शिक्षितस्तत्प्रसादेन भूपाग्रेद्यास्मि कौतुकी ॥२४५॥

भूपः प्रोचे कदा नृत्यं सेचनाख्यो गुरुस्तव।
करिष्यति [11]किलास्माकं दर्शयिष्यति[12] कौतुकम् ॥२४६॥

तदा कलाविद्प्याहास्मदीयो भूपते! गुरुः।
स्त्रीणां [च] वर्तते द्वेषी तासां नालोकयेन्मुखम् ॥२४७॥

एवं श्रुत्वा[13] महीनाथो जातो विस्मितमानसः[14]।
कथंचिद्गुरुरात्मीयो मेलनीयो मयापि[15]हि ॥२४८॥

---

1. $B^1$, $B^2$ and $B^3$ संपदे। 2. $B^1$, $B^2$ and $B^3$ विषादं विपदे न हि। 3. $B^1$ and $B^3$ omit the whole expression; $B^2$ stops after हर्षो। 4. $B^1$, $B^2$ and $B^3$ किं पुनर्नृप-नासाग्रं यावन्मग्नो जलेन सः [$B^1$ जले मग्नः]। 5. $P^1$ and $P^3$ °जन्। 6. $B^1$, $B^2$ and $B^3$ नेत्राणां मीलय क्षणम्। 7. $B^1$, $B^2$ and $B^3$ नेत्राणां मेल°। 8. $B^2$ न। 9. $B^1$, $B^2$ and $B^3$ °श्चा द्दृश्चम°। 10. $B^1$, $B^2$ and $B^3$ सेचा°। 11. $B^1$ and $B^2$ कदा; $B^3$ तदा। 12. $B^1$, $B^2$ and $B^3$ दर्शयिष्यति। 13. $B^1$ एतच्छ्रु°। 14. $B^1$, $B^2$ and $B^3$ विस्मयमा°। 15. $B^1$ and $B^2$ ममापि।

मार्गदर्शक - आचार्य श्री सुविधिसागर जी महाराज

इत्युक्त्वा तस्य वेगेन स्वर्णरत्नादि भूषणम्[1] ।
शोभनाश्वादि पृच्छा(ख्या ?)दि दत्तं दानं [2]हृदीप्सितम् ॥२४६॥

प्रेषितः स निजे स्थाने सभा सर्वा विसर्जिता ।
राज्यलीलोचितैः सौख्यै रात्री [3]राज्ञातिवाहिता ॥२५०॥

पुनः प्रातः सभासीनो रूपचन्द्रनरेश्वरः ।
सेचानकं समानेतुं नरान् प्रेषितवान्निजान्[4] ॥२५१॥

सेचानकः सश्रृङ्गारो नानाभरणभूषितः ।
सुखासने समारूढः [5]ससैन्यपरिवारकः[6] ॥२५२॥

नेत्रयोः पट्टको बद्धो डाङ्गिकैश्चाग्रतः श्रितः ।
पथि यत्र समायाति नारी नश्यति तत्पवात्[7] ॥२५३॥

परिच्छदेन संयुक्तो गतो यत्रास्ति भूपतिः ।
अभ्युत्थानं न सन्मानं नतिं कस्यापि नो सृजेत्[8] ॥२५४॥

उपविष्टः सभामध्ये नेत्रयोः पट्टकावृतः ।
निषिद्धाश्च स्त्रियः सर्वा रूपचन्द्रेण मण्डपात् ॥२५५॥

तथापि कौतुकाकांक्षी नरो रूपेण पश्यति ।
सेचानिका[9] च[10] साश्चर्या जालकान्तः प्रपश्यति[11] ॥२५६॥

पृष्टः स रूपचन्द्रेण सत्यं वद नरोत्तम ।
स्त्रीषु द्वेषी[12] कथं जातः कथय त्वं[13] ममाग्रतः ॥२५७॥

ततः सेचानको ब्रूते स्त्री नैवास्त्यत्र कुत्रचित् ।
नेत्रयोः पट्टकं त्यक्त्वा वदति स्म विदां वरः[14] ॥२५८॥

दिशायाः पूर्वभागेस्ति गङ्गानाम्नी महानदी ।
तस्यास्तीरेस्ति भो ! रम्यं विख्यातं बदरीवनम् ॥२५६॥

बहवः पक्षिणस्तत्र निवसन्ति यदृच्छया ।
सेचानकस्य युगलं मुदितं तत्र तिष्ठति ॥२६०॥

---

1. $B^1$, $B^2$ and $B^3$ °णान् । 2. $B^1$, $B^2$ and $B^3$ तदो° । 3. $B^1$ भूपेति°; $B^2$ and $B^3$ भूपेन । 4. $B^1$, $B^2$ and $B^3$ प्रेषिता भूवर्तेर्नराः । 5. $B^1$, $B^2$ and $B^3$ स्व० । 6. $B^1$, $B^2$ and $B^3$ °वारितः । 7. $P^3$, $B^1$ and $B^2$ तत्स्वात् । 8. $B^1$, $B^2$ and $B^3$ प्रणामं ननु कस्यचित् । 9. $P^3$ °न° । 10. $B^1$ °चि । 11. $B^1$, $B^2$ and $B^3$ पश्यन्ती जालिकान्तरे । 12. $B^1$, $B^2$ and $B^3$ स्त्रीभिर्द्वेषं । 13. $B^1$, $B^2$ and $B^3$ जातं कथयस्व । 14. $B^1$, $B^2$ and $B^3$ वदते वदतां वरः ।

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज



कियत्स्वहस्सु संजातः सेचानीगर्भसंभवः ।
एकस्यां वृक्षशाखायां मुक्तमण्डकयुग्मकम् ॥२६१॥

कियद्भिस्तु दिनैरेतौ संजातौ युग्मबालकौ ।
एकस्मिंस्तु दिने जातो दावाग्नेः समुपद्रवः[1] ॥२६२॥

सेचानेन तदैवोक्तं समानय जलं प्रिये ! ।
जलसेकाद्यथा वह्नेर्नाशयामि मुपद्रवम् ॥२६३॥

गता सा जलमानेतुं नायाता निर्दया पुनः ।
बालकोपरि दग्धोहं दावाग्नेर्ज्वालया तदा[2] ॥२६४॥

कन्यकोचे निराश्चर्यं कूटं किं जल्पसे मुधा ।
दग्धाहं बालकैः सार्धं नष्टस्त्वं स्नेहवर्जितः[3] ॥२६५॥

इति वादं विवदतोः श्रुत्वा सेचानिकापितुः(ता) ।
मिलितः पूर्वसंकेतो ज्ञातः पूर्वभवप्रियः ॥२६६॥

पुनश्चिन्ता समुत्पन्ना रूपचन्द्रस्य भूभुजः ।
परमेतत्सुतारत्नं दास्ये नाटकिनो न हि ॥२६७॥

उक्तं च— कुलं[4] च शीलं च रूपवता च
विद्या वयो रूपधनाढ्यता च ॥
एते गुणाः सप्त वरेतिरिक्त-
स्ततः परं पुण्यफलाय कन्याः ॥२६८॥

पुम्भिः सार्धं निर्विरोधं ज्ञात्वा भूपः समुत्थितः ।
सेचानोप्यश्वमारुह्य यावद्याति निजाश्रमे ॥२६९॥

तावत्केनापि भट्टेन बकेनाप्युपलक्षितः ।
स एष मालवाधीशो विक्रमादित्यभूपतिः ॥२७०॥

दातॄणां दानधौरेयो वीराणामेकवीरराट् ।
साहसैकनिधिः[5] सम्यग् विक्रमी विक्रमो नृपः ॥२७१॥

एतद्वचनमाकर्ण्य रूपचन्द्रो धराधिपः ।
पादचारी समायातो यत्र विक्रमभूपतिः ॥२७२॥

---

1. $B^1$, $B^2$ and $B^3$ लाल्यमाना(नो) दिनैकस्मिन् दावानलसमुत्प्लवः । 2. $B^1$, $B^2$ and $B^3$ ज्वाला दावानलस्य च । 3. $B^3$ °तम् । 4. $B^1$ and $B^2$ omit the whole verse; $P^1$ and $P^3$ have only कुलं च शीलं च । 5. $B^1$, $B^2$ and $B^3$ साहसीनां निधिः ।

करौ च कुड्मलीकृत्य स्तुतिमेवं विनिर्मि(र्म)मे[1] ।
गृहं पवित्रयास्माकं [2]पदपद्मरजेन तु ॥२७३॥

धन्योहं मत्पुरं धन्यं यत्प्राप्तो विक्रमाधिपः ।
प्रकृष्टविनयेनाथ[3] समानीतो निजे गृहे ॥२७४॥

पुनः पप्रच्छ भूनाथः प्रारब्धं किमिहाद्भुतम् ।
मालवेश्वर ! वार्तेयमारब्धा वद कारणम् ॥२७५॥

हसित्वा विक्रमः प्रोचे प्राघूर्णोस्म्यधुना तव ।
तव कीर्तिः परा धूर्ता धूर्तितोहं तयागतः ॥२७६॥

इति प्रीतिवचः श्रुत्वा रूपचन्द्रो नराधिपः[4] ।
परमानन्दरूपेण[5] भोजितो भक्तिपूर्वकम् ॥२७७॥

मन्त्रयित्वा मन्त्रिभिः स विज्ञप्तो विक्रमाधिपः ।
प्रसादं कुरु भूमीन्द्र ! वचनं मामकं शृणु ॥२७८॥[6]

न हि दानं विना प्रीतिर्न शोभा प्राप्यते क्वचित्[7] ।
यथा पंचामृतं भोज्यं घृतहीनं न शोभते ॥२७९॥

गजवाजिसुवर्णाद्याः पादार्घास्तव[8] मन्दिरे ।
तव योग्यमिदं पुत्री[9]रत्नमेतद्विवाहय ॥२८०॥

एतद्वचनमाकर्ण्य हृष्टो मालवभूपतिः ।
वाञ्छितार्थप्रदानेन को न तुष्यति मानवः[10] ॥२८१॥

प्रशस्ते दिवसे भूपः कारयामास[11] मण्डपम् ।
परिणीता विक्रमेण सुता सेचनिकाह्वया[12] ॥२८२॥

अनेकगजवाज्यादि[13] स्वर्णरत्नादि भूषणम्[14] ।
प्रददौ रूपचन्द्रोयं या(जा)मातृकरमोचने ॥२८३॥

---

1. B[1], B[2] and B[3] प्रचक्रमे । 2. B[1], B[2] and B[3] पाद° । 3. B[1], B[2] and B[3] °नापि । 4. B[2] and B[3] धराधिपः । 5. B[1], B[2] and B[3] °पूरेण । 6. B[3] adds the following after this verse :—

ददाति प्रतिगृह्णाति गुह्यमाख्या(ख्या)भिजल्पति ।
भुक्तं भोजयतिश्चै(ते चै)व षड्विधं प्रीतिलक्षणम् ॥

7. B[1], B[2] and B[3] कथम् । 8. B[1], B[2] and B[3] बहुवस्त° । 9. B[1], B[2] and B[3] तव योग्यास्ति मे पुत्री । 10. B[1], B[2] and B[3] मानवे । 11. B[1], B[2] and B[3] कारापयति । 12. B[1], B[2] and B[3] सुता सेचानिकानाम्नी परिणीतास्ति विक्रमे । 13. B[1], B[2] and B[3] अनेकान् गजवाजीना । 14. B[1], B[2] and B[3] भूषणान् ।

उत्सवेन च वीवाहं[1] कृत्वा विक्रमभूपतिः ।
समायातो निजे स्थाने स्वसैन्यपरिवारितः ॥२८४॥
सिद्ध्यत्युद्यमतः कार्यमगम्या ये मनोरथाः[2] ।
यथा सेचानिका कन्या विक्रमेण विवाहिता ॥२८५॥
यथा विक्रमभूपस्य शुकेनायं निवेदितः ।
उद्यमोपरि दृष्टान्तश्चन्द्रसेननृपाग्रतः ॥२८६॥
एतत्कथानकं श्रुत्वा हृष्टः[3] कीरस्य वाचया ।
मया पुष्का(ष्पा)वतीनाम्न्याः[4] कथं कार्यः परिग्रहः[5] ॥२८७॥
शिक्षां पृच्छति भूनाथे कन्यावरणहेतवे ।
कीरोपि कथयामास भूपस्य हितवाञ्छया ॥२८८॥
कृतास्ति यदि सामग्री विदेशगमने[6] त्वदा ।
तदा शकुनजाङ्घेया[7] गृ(ग्र)हीतव्या कथा हृदि[8] ॥२८९॥[9]
यथा शकुनिकीरोक्त् श्रेष्ठिपुत्रफलप्रदः ।
तथा हि सर्वलोकानां चिन्तितार्थफलप्रदः ॥२९०॥
चन्द्रसेनो नृपः प्राह शुकराज ! ममाग्रतः ।
कथनीया समग्रापि कथा श्रेष्ठिसुतस्य च ॥२९१॥
कीरोवग्मालवे देशे पुरं दशपुराभिधम् ।
देवदत्ताभिधः श्रेष्ठी वसते तत्र वित्तवान्[10] ॥२९२॥
देवश्रीरस्ति तद्भार्या सुतो दशरथाभिधः ।
वात्सल्यात्पितृमातृभ्यां बालत्वे स विवाहितः ॥२९३॥
पाठितश्च[11] ततः सम्यक्कलाविद्यादिकोविदः ।
जातः सर्वगुणावासो मन्ये विद्यानिकेतनम् ॥२९४॥
संप्राप्त[12]रूपलावण्यो[13] यौवनेनाप्यलंकृतः ।
जातश्च विषये लुब्धो द्वितीयवयसः फलम् ॥२९५॥
एकदा श्रेष्ठिपुत्रेण नापिताय निवेदितम् ।
मन्मित्राणां मत्समानां सन्ति जाता गृहे सुताः ॥२९६॥

1. $B^1$ and $B^2$ उच्छवेन च वेवाहं । 2. $B^1$ and $B^2$ °रथैः । 3. $B^2$ and $B^3$ हृष्ट° । 4. $B^3$ °कण्या । 5. $B^3$ परिणीया मया कथम् । 6. $B^1$, $B^2$ and $B^3$ विदेशगदृतो । 7. $B^3$, °लंघे° । 8. $B^1$, $B^2$ and $B^3$ सुखप्रदा । 9. B adds the following, after this verse :—अथ शकुनजंघ उपरि कथा । 10. $B^1$, $B^2$ and $B^3$ धनवान् ततः । 11. $B^1$, $B^2$ and $B^3$ पाठितोपि । 12. $B^1$ and $B^2$ °प्तं । 13. $B^1$ and $B^2$ °ण्यं ।

इष्टगोष्ठ्युपविष्टस्य स्निग्धा मम हसन्ति हि ।
पित्रा विवाहवार्तापि काप्यस्य न हि कथ्यते ॥२९७॥
कथनीयं च ताताग्रे मदुक्तं वेत्स्यसौ यथा[1] ।
प्रत्युत्तरं तथास्माकं कथनीयं त्वया सखे ॥२९८॥
श्रेष्ठिपुत्रगिरं श्रुत्वा संप्रदायेन संयुतः ।
वामशायी स्थितः श्रेष्ठी नापितस्तत्र चागतः ॥२९९॥
दर्पणं दर्शयामास पादसंवाहनापरः ।
श्रेष्ठिनं जल्पयामास[2] विवाहादिकवार्तया ॥३००॥
[3]कमप्यवसरं प्राप्य कथयामास नापितः ।
भवतां पुत्ररत्नं तु[4] विवाहे योग्यतां गतम्[5] ॥३०१॥
हसित्वा श्रेष्ठिनाप्यूचे त्वयाद्यापि हि न श्रुतम् ।
मया वात्सल्यतः पुत्रो बालत्वेयं[6] विवाहितः ॥३०२॥
नापितः पुनरप्यूचे कुतः कस्य गृहे प्रभो !
एतदाश्चर्यमस्माकं न श्रुतं कस्य चान्तिकात्[7] ॥३०३॥
श्रेष्ठ्यूचे मालवे देशे निकटं ह्यस्ति चात्मनः ।
वैराटनगरं नाम श्लाघ्यं सुरपुराधिकम् ॥३०४॥
तत्रास्ति धनदः श्रेष्ठी राजमान्यो महाधनी ।
नन्दानाम्न्यस्ति[8] तत्पुत्री परिणीताङ्गजेन मे[9] ॥३०५॥
स्वरूपं श्रेष्ठिपुत्रस्य नापितेन निवेदितम् ।
गृहीत्वाज्ञां पितुस्तस्याः समानयनहेतवे ॥३०६॥
[10]श्रेष्ठिपुत्रो रथारूढः प्रस्थितोल्पपरिच्छदः ।
पुराद् बहिः समागत्याकथयन्निजसेवकान् ॥३०७॥
वामपार्श्वे यदा देव्या भाषते[11] वचनत्रयम् ।
ग्रामान्तरे तदायामि व्याघुटिष्येन्यथा त्वहम्[12] ॥३०८॥
एतद्वचनमात्रेण श्रुता[13] सा दक्षिणे भुजे ।
श्रुत्वा व्याघुट्य चायातः प्रातः प्रचलितः पुनः ॥३०९॥

---

1. $B^1$, $B^2$ and $B^3$ मदुक्तं ज्ञायते न हि । 2. $B^1$ बाबालयति श्रेष्ठिनश्च । 3. $B^1$, $B^2$ and $B^3$ किंचिदव° । 4. $B^1$, $B^2$ and $B^3$ °रत्नोयं । 5 $B^1$, $B^2$ and $B^3$ गतः । 6. $B^1$, $B^2$ and $B^3$ °त्वेपि । 7. $B^1$, $B^2$ and $B^3$ पार्श्वतः । 8. $B^1$, $B^2$ and $B^3$ नामास्ति । 9. $B^1$, $B^2$ and $B^3$ ममात्मजे । 10. $B^3$ omits the verses 307-11 । 11. $B^2$ दास्यते । 12. $B^1$ and $B^2$ °प्यहम्° । 13. $B^1$ श्रुता ।

मार्गदर्शक - आचार्य श्री सुविधिसागर जी महाराज



तथैव दक्षिणे भागे देव्या शब्दायते भृशम् ।
पुनर्वेश्म समायातो निजश्रेयोभिलाषुकः ॥३१०॥
अरुणोदयवेलायां यावद्गच्छति मार्गतः ।
देव्या शब्दसदृक्शब्दश्चटकः[1] कोपि जल्पितः ॥३११॥
तावद्दशरथः श्रेष्ठी सोत्साहवचनं जगौ ।
मातरस्माकमप्येवं वचः किं श्रावयस्यहो ॥३१२॥
निवेद्येदं मुखे[2] वाक्यं रथं खण्डितवान्पथि ।
तावत्सूर्योदये देव्या निजस्थाने समागता ॥३१३॥
पप्रच्छ चटकाद्यान्सा मार्गेणास्मिन् गतोस्ति कः ।
यथोक्तं चटकेनोक्तं श्रेष्ठिपुत्रेण यत्कृतम् ॥३१४॥
शकुनो हाहापरत्वेन चिन्तयामास मानसे ।
अग्रे श्रेष्ठिसुतस्यापि मृत्युरस्ति कथं कृतम् ॥३१५॥
शकुनोप्यात्मलज्जातः[3] कृत्वा रूपं द्विजन्मनः ।
मिलितः कैटके गत्वा तस्य श्रेष्ठिसुतस्य च ॥३१६॥
सोपि सार्थस्थितो याति क्रमाद्वैराटमाययौ ।
सपरिच्छद [4]आयातः श्वशुरस्य निकेतने ॥३१७॥
जामातरं तं विज्ञाय श्वशुरः सालकादिभिः ।
संमुखं तस्य चायातः[5] कृतं गौरवमादरात् ॥३१८॥
जामाता तैः समानीतो गृहमध्ये कृतादरः ।
कृतमाङ्गल्यकाचारः श्वश्रूभिः शालकादिभिः[6] ॥३१९॥
मर्दनोद्वर्तनं कृत्वा स्नानभोजनकादिभिः ।
दिनं हर्षातिरेकेण क्रीडाद्यैरत्यवाहयत्[7] ॥३२०॥
जाता संध्या ततः स्त्रीभिर्नन्दा संस्नापिता तनौ ।
शृङ्गारषोडशोपेता कृता [8]भूषणभूषिता ॥३२१॥
एकं(क)यौवनसम्पन्ना भूषाभिर्भूषिता पुनः[9] ।
साक्षाद्देवाङ्गनाकारा प्रेषिता शयनीयके ॥३२२॥

---

1. $B^1$ and $B^2$ °टिकः । 2. $B^1$, $B^2$ and $B^3$ कथयित्वा रि(लि)दं । 3. $B^1$, $B^2$ and $B^3$ °लज्जाभिः । 4. $B^1$, $B^2$ and $B^3$ °दमा° । 5. $B^1$, $B^2$ and $B^3$ तस्य मा(चा)गत्य । 6. $B^1$ and $B^3$ शालिका° । 7. $B^1$, $B^2$ and $B^3$ दिवा हर्षप्रमोदेन क्रीडाभिरतिवाहितः । 8. $B^1$, $B^2$ and $B^3$ शृङ्गारैः षोडशैः ($B^2$ and $B^3$शो) कृत्वा विभू° । 9. $B^1$ and $B^2$ विभूषाभिविभूषिता; $B^3$ विभूषणविभूषिता ।

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

चिन्तयामास सा कन्या संकेतो यत्र विद्यते ।
पूर्वं तत्रैव गच्छामि पश्चान्निजधवान्तिके ॥३२३॥
एवं विमृश्य सा कन्या यक्षस्यायतने गता ।
चिन्तयत्यन्तरे यक्ष[1] आगता पतिघातिनी ॥३२४॥[2]
या स्त्री निजपतिं त्यक्त्वा भजतेन्यपतिं पुनः[3] ।
पतिघातकृतं पापं तयापि [4]समुपार्जितम् ॥३२५॥
अद्याहमस्याः पापिन्याः शिक्षां दास्यामि निश्चितम् ।
विमृश्यैकशवस्यैवं देहे यक्षोप्यधिष्ठितः ॥३२६॥
सजीवं(वो) मृतकं(को) जातं(तः) तां भाषयति कामिनीम्[5] ।
वेलाद्य महती लग्ना भद्रे ! कथय कारणम् ॥३२७॥
साप्यूचे परिणीतो मे भर्ताद्य समुपागतः ।
तद्विशेषवशात्स्वामिन् ! विलम्बो मेऽभ्युपस्थितः ॥३२८॥
संकेतितनरव्या[6]जाद्वदते मृतपूरुषः[7] ।
संतुष्टालिङ्गनं मेद्य[8] दत्त्वा याहि निजे प्रिये ॥३२९॥
स्नेहादुत्कण्ठिता कन्या यावदालिङ्गनं ददौ ।
दन्तैर्नासां कराभ्यां च कर्णावत्रोटयच्छि(च्छ)वः ॥३३०॥
कन्यका निजदोषस्य गोपनाय गृहे गता ।
भर्तुः समीपमागत्योच्चैःस्वरेणापि पूत्कृतम्[9] ॥३३१॥
कन्यकायाः पिता माता बान्धवाश्च समागताः ।
दृष्ट्वासमञ्जसं कार्यं को न कुप्यति मानसे ॥३३२॥
वणिक्कुले[10] न जातोयं जातश्चाण्डालजे कुले[11] ।
यदेषा बालिका भद्र ! त्वयाजन्म[12] विडम्बिता ॥३३३॥
तावत्कोलाहलं श्रुत्वा रक्षकाः समुपागताः ।
बन्धयित्वा दृढं नीतः प्रातर्भूपस्य संनिधौ ॥३३४॥

---

1. $B^1$, $B^2$ and $B^3$ यक्षश्चिन्तयते चित्ते । 2. $B^3$ adds the following ,after this verse:—

यतः श्लोकम्—आज्ञाभङ्गो नरेन्द्राणां गुरूणां मानखण्डनम् ।
पृथक्शय्या च नारीणामशस्त्रवधमुच्यते ॥

$B^2$ stops with आज्ञाभङ्गो नरेन्द्राणाम् । 3. $B^1$, $B^2$ and $B^3$ यदि । 4. $B^1$, $B^2$ and $B^3$ तया तस्समु° । 5. $B^1$, $B^2$ and $B^3$ सजीवो मृतकस्तस्यामालापयति कामिनी(नि ?) । 6. $B^1$ and $B^2$ °तिपुरुषव्या° । 7. $B^1$, $B^2$ and $B^3$ पौरुषः । 8. $B^1$, $B^2$ and $B^3$ आलिङ्गनेच संतुष्टा । 9. $B^1$, $B^2$ and $B^3$ °कृता । 10. $B^1$, $B^2$ and $B^3$ वणिजेषु । 11. $B^1$ and $B^2$ °कुले: क्वचित् । 12. $B^1$, $B^2$ and $B^3$ भद्रा जन्मावधि ।

श्रुत्वा व्यतिकरं राजा ब्रूते कोपारुणेक्षणः ।
मद्भ्रातृपुत्री रे पाप ! निर्दोषेयं[1] विडम्बिता ॥३३५॥

विस्मितः श्रेष्ठिपुत्रोसौ चिन्तयामास मानसे ।
शकुनस्तादृशो जातः कार्यं नीत्याजनीदृशम्[2]॥३३६॥

भूपोवक् कथमानीतः पापिष्ठोयं ममाग्रतः ।
शूलिकायां समारोप्य आदिष्टं बन्धकान्[3] प्रति ॥३३७॥

वधाय नीयमानेस्मिन्[4] हाहाकारपराः प्रजाः[5] ।
शकुनो द्विजरूपेण भूपस्याग्रे न्यवेदयत्[6] ॥३३८॥

श्रूयतां देव ! मद्वाचो[7] रोषं च हृदि मा कुरु ।
राजनीतिकथा पूर्वं भाविनी संश्रुता त्वया ॥३३९॥[8]—तथा हि[9]

अविवेकी नृपः स्थानमन्यायपुरपत्तनम् ।
उन्मार्गी नाम मन्त्र्यस्ति सर्वलगरः[10] प्रधानकः ॥३४०॥

राज्यं तस्यानया रीत्या सर्वदापि प्रवर्तते[11] ।
कियत्यपि दिने देव ! यज्जातं तन्निशम्यताम् ॥३४१॥

चौरेण पातितं खात्रं श्रेष्ठिनः कस्यचिद्गृहे[12] ।
भित्तिः पपात सहसा[13] खात्रपातकरोपरि ॥३४२॥

पूत्कर्तुं स गतश्चौरो द्रुतं भूपस्य चान्तिके ।
अन्यायश्च महान् जातः[14] श्रूयतां मद्वचः प्रभो ! ॥३४३॥

गतः श्रेष्ठिगृहे स्वामिन् रात्रौ खात्रस्य पातने ।
भित्तिपातात्कटी भग्ना पूत्करोमि त्वदग्रतः ॥३४४॥

तच्छ्रुत्वा[15] भूपतिः क्रुद्धः क्षणाच्छ्रेष्ठिनमाह्वयत् ।
ईदृग्विधानि कर्माणि करोषि त्वं पुरे मम ॥३४५॥

---

1. $B^1$, $B^2$ and $B^3$ निर्दोषा सा । 2. $B^1$, $B^2$ and $B^3$ कार्यमुत्पन्नमीदृशम् । 3. $B^1$, $B^2$ and $B^3$ शूलिकारोपनीयोयमादिष्टं वधकान् । 4. $B^1$, $B^2$ and $B^3$ °मानोसौ । 5. $B^1$, $B^2$ and $B^3$ °परा प्रजा । 6. $B^1$, $B^2$ and $B^3$ भूपाग्रे स्फुर्यतो [$B^1$ जितो; $B^2$ यंता]वदत् । 7. $B^1$ °चा । 8. $B^1$, $B^2$ and $B^3$ adds, after this verse, the following :—राजाप्यूचे तथापि त्वं कथां कथय मत्पुरः । ब्राह्मणोचे(वक्)तदा राजन् श्रूयतां मे कथा त्वया । 9. $B^2$ and $B^3$ add अन्याय-पुरपत्तने [$B^3$त्तनोपरि] कथा before this verse । 10. $B^3$ सर्वलिङ्गः । 11. $B^3$ अन्यायरीत्या राज्यं ते प्रवर्तयन्ति सर्वदा । 12. $B^1$, $B^2$ and $B^3$ श्रेष्ठिकस्य गृहे चौरैरारब्धं खात्रपातनम् । 13. $B^1$, $B^2$ and $B^3$ सहसा पतिता भित्तिः । 14. $B^1$ and $B^2$ जातं च महदन्यायं(य्यं ?) । 15. $B^1$ and $B^2$ तं श्रुत्वा ।

निरागसोस्य चौरस्य[1] कटी भग्ना त्वया कथम् ।
ईदृशीं भित्तिकां कश्चिन्मन्दिरे कारयत्यहो[2] ॥३४६॥

श्रेष्ठ्यूचे नास्ति मे दोषो दोषश्चितिकरस्य च[3] ।
द्रव्यदाने प्रशक्तोहं न शक्तो भित्तिकर्मणि[4] ॥३४७॥

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

राजोचे त्वद्वचः सत्यं प्रेषयामास सद्भटान्[5] ।
चेजारकाः समानीता नत्वा भूपं पुरः स्थिताः ॥३४८॥

भ्रू(भ्रु)कुटीभीषणो राजावदत्तान्[6] भित्तिकारकान् ।
ईदृशी किं कृता भित्तिश्चौरोपरि पपात या ॥३४९॥

तैरुक्तं नास्ति दोषो नः[7] परं किं कुर्महे प्रभो ! ।
यद्वधूः श्रेष्ठिनोमुष्य[8] सम्मुखाराग्रतः स्थिता ॥३५०॥

एभिः सत्यं वचः प्रोक्तमानीता श्रेष्ठिनो[9] वधूः ।
उन्मत्ता यौवनेन त्वं यत्स्थिता शिल्पिनोग्रतः[10] ॥३५१॥

साप्यूचे नास्ति मे दोषो गच्छन्त्या जिनमन्दिरे ।
नग्नो दिगम्बरो दृष्टो लज्जिताग्रे ततः स्थिता[11] ॥३५२॥

श्रुत्वा भूपोवदद्वाक्यं श्रेष्ठिवध्वोदितं नृतम् ।
नग्ने दृष्टे पुनर्लज्जा कथं स्त्रीणां न जायते ॥३५३॥

आकारितः स दिग्वासा भ्रू(भ्रु)कुटीभीषणेक्षणः ।
नग्नत्वं दर्शयस्यत्र[12] कथं भ्रमसि मत्पुरे ॥३५४॥

दिग्वासा नोत्तरं दत्ते यावत्तिष्ठति मूकवत् ।
तावद्भूपः सकोपोवक् शूलारोपोस्य चोचितः ॥३५५॥

दिग्वाससं पुरः( रस् )कृत्वा[13] यावद्गच्छन्ति ते भटाः ।
प्रेरिता द्रव्यदानेन वणिग्भिस्तावदागतैः ॥३५६॥

पुनरागत्य भूपाग्रे तलारक्षा वदन्ति हि[14] ।
स्वामिन् दीर्घोस्ति दिग्वासाः शूलाल्पा क्रियते कथम्[15] ॥३५७॥

---

1. $B^1$, $B^2$ and $B^3$ निरापराधचौ° । 2. $B^1$, $B^2$ and $B^3$ कोपि कारापयति मन्दिरे । 3. $B^1$, $B^2$ and $B^3$ दोषं(षः) चेजाकरस्य च । 4. $B^1$ and $B^2$ भित्तिकारकः । 5. $B^1$, $B^2$ and $B^3$ प्रेषयन् सुभटान्निजान् । 6. $B^1$, $B^2$ and $B^3$ वदते । 7. $B^1$, $B^2$ and $B^3$ न दोषोस्मासु तैरुक्तं । 8. $B^1$, $B^2$ and $B^3$ श्रेष्ठिनोस्य वधूपुत्री । 9. $B^1$, $B^2$ and $B^3$ तत्सुता । 10. $B^1$, $B^2$ and $B^3$ यौवनोन्मत्तिका जाता स्थिता यच्छि° । 11. $B^1$, $B^2$ and $B^3$ लज्जा तेनास्मत्संस्थिता । 12. $B^1$, $B^2$ and $B^3$ दर्शयंस्त्रीणां । 13. $B^1$ and $B^2$ दिग्वासमग्रतः कृत्वा । 14. $B^1$, $B^2$ and $B^3$ तलारा विज्ञपंति ( ज्ञापयंति ) च । 15. $B^1$ and $B^2$ शूल्या ह्रस्वा करोमि किम् ।

भूपोवक् शूलिकामानो[1] यः कोपि पुरुषो भवेत् ।
समुत्पाट्य स दातव्यः प्रष्टव्योहं पुनर्नहि ॥३५८॥

नमस्कृत्य नरा भूपं निःसृता [2]निजमन्दिरात् ।
पट्टराज्ञ्यास्तदा भ्राता संमुखो मिलितः चणात्[3] ॥३५९॥

तं शूलिकानुमानेन ज्ञात्वा भूपस्य सालकम् ।
लात्वा समानयामासुः शूलाभ्यर्णे वराककम् ॥३६०॥

स वृत्तान्तः श्रुतो राज्ञ्या रोदिति स्म गुरुस्वरम्[4] ।
आगत्य भूपतेः[5] पार्श्वे सा भृशं क्रन्दति स्म च ॥३६१॥

प्रधानास्तु समायातास्तस्या आकर्ण्य रोदनम् ।
ददुः शिक्षां नरेशाय धीयते[6] दुःखतो मनः ॥३६२॥

दण्डं दत्त्वा तलारचे[7] नेष्यामो नृपसालकम् ।
दीनाराणां सहस्रं च दापयित्वा स मोचितः ॥३६३॥

तादृशं तव राज्येहं पश्याम्याश्चर्यमद्भुतम्[8] ।
निरागाः श्रेष्ठिपुत्रो यच्छूलायामधिरोप्यते ॥३६४॥

निर्मन्तुरस्त्यसौ देव ! नाशिकाकर्णकर्तनात् ।
कथयामि द्विजोप्यूचे वृत्तान्तोयं निशम्यताम् ॥३६५॥

भवद्व्यापादितश्चौरः पतितोस्ति पुराद्बहिः ।
गत्वा तन्मुखं हस्तौ विलोक्यौ कौतुकेन भोः[9] ! ॥३६६॥

द्विजवाक्याद्गतो राजा कौतुकी नालसोभवत् ।
दृष्टौ तस्य करे कर्णौ नासिका मुखमध्यतः ॥३६७॥

विस्मयेन ततो राजा ददर्श द्विजसम्मुखम् ।
किमेतदिति चाश्चर्यं कथय त्वं ममाग्रतः ॥३६८॥

नन्दिकायाश्च वृत्तान्तं श्रुत्वा भूपो द्विजोदितम् ।
भगिन्या लघुनन्दायाः श्रेष्ठिपुत्रो विवाहितः ॥३६९॥

---

1. B¹, B² and B³ °माने । 2. B¹, B² and B³ राज° । 3. B¹, B² and B³ मिलितः सम्मुखो( खस् )तदा । 4. B¹, B² and B³ °ति करुणस्वरम् । 5. B¹, B² and B³ भूपमागत्य तत्° । 6. B¹, B² and B³ धार्यते । 7. B¹, B² and B³ तलारे [B² and B³ र] क्षो । 8. B¹, B² and B³ °हं (पि) पश्यामः कौतुकं महत् । 9. B¹, B² and B³ च ।

शुकोवक् शकुनात्सोपि निःसृतो मरणापदः[1] ।
विवाहितान्या भार्यास्य समागात्कुशलाद्गृहे[2] ॥३७०॥

चन्द्रसेनेन भूपेन यथा शुकमुखाच्छ्रुतम् ।
शकुनजातावास्तिक्यं पुनः पृच्छोत्तरं ददौ ॥३७१॥

शुकोवग्यदि सामग्री विवाहाय कृता त्वया ।
नैमित्तिकं समाहूय पृच्छां कुर्वागमे तथा[3] ॥३७२॥

नैमित्तिकवचः सम्यक् मिलितं नैव चान्यथा ।
ब्राह्मणेनोष्भि (त्थि?)तो बालो ह्यजापुत्रो नृपो यथा ॥३७३॥

॥ अत्र अजापुत्रकथा सविस्तरा वा संक्षेपतः कथनीया ॥

अथ पुष्का(ष्पा)वतीकन्याविवाहाय नरेश्वरः ।
प्रस्थितः सुमुहूर्तेन शकुनैः शोभनैस्ततः ॥३७४॥

शुकराजः समीपस्थः शिक्षां दत्ते यथा यथा ।
तथा तथाकरोत्सर्वं चन्द्रसेनो नरेश्वरः ॥३७५॥

ससैन्यः सपरीवारो मित्रैः सह च पण्डितैः[4] ।
क्रमान्मार्गं समुल्लङ्घ्य ग्रामाटव्यां पुरादिकम् ॥३७६॥

काञ्चनपुरसीमायामासन्नो यावदागतः ।
तावत्पृच्छति भूनाथः शिक्षां कीरान्तिके पुनः ॥३७७॥

शुकराज ! क्व तिष्ठामः किं कुर्मश्च[5] समादिश ।
कन्येयं परिणेतव्यास्माभिः पुनरहो कथम् ॥३७८॥

कन्यावाञ्छापरं भूपं शुकोवक् श्रूयतां तथा ।
माता पिता च[6] कन्यायाः परमार्हतभक्तिमान् ॥३७९॥

तत्सुतापि महाजैनी जिनपूजार्थहेतवे ।
समागच्छति चोद्याने पुष्का(ष्पा)वचयनामके ॥३८०॥

प्रासादो महता तत्रोग्रसेनस्य सुतेन हि ।
कारितो रत्नसिंहेन श्रीयुगादिजिनेशितुः[7] ॥३८१॥

---

1. $B^1$, $B^2$ and $B^3$ °पदात् । 2. $B^1$, $B^2$ and $B^3$ कुशलेन गृहा(हं ?)गतः । 3. $B^1$, $B^2$ and $B^3$ तदा । 4. $B^1$, $B^2$ and $B^3$ समित्रः सह पण्डितैः [$B^3$ ण्डितः] । 5. $B^1$, $B^2$ and $B^3$ करोमि । 6. $B^1$, $B^2$ and $B^3$ °न्ति । 7. $B^1$, $B^2$ and $B^3$ युगादिजिनमन्दिरम् ।

पित्रोरस्याः कुमार्याश्च निश्चयोऽप्यस्ति मानसे ।
इदं[1] मम सुतारत्नं जैनो हि[2] परिणेष्यति ॥३८२॥

सा कन्या तत्र पूजार्थे नित्यं याति जिनालये ।
राजन् ! यदि विवाहेच्छा वर्तते तदिदं कुरु ॥३८३॥

संस्थाप्य दूरतः सैन्यं त्वमत्र[3] स्नानमाचर ।
शुचि वस्त्रं परीधाय गृह्ण पूजोपचारकम्[4] ॥३८४॥

मयापि गम्यते पूर्वं तत्र देवकुलेऽधुना ।
एतत्सर्वं त्वया भूप ! करणीयं द्रुतं वचः ॥३८५॥

शुकेन च[5] यथा प्रोक्तं भूपालेन[6] तथा कृतम् ।
राजा स्वल्पपरीवारश्चलितः कीरसंयुतः ॥३८६॥

युगादि [7]भुवने नत्वा राजा गर्भगृहे स्थितः ।
शालायां पञ्जरं बद्ध्वा प्रविष्टो[8] दक्षिणे भुजे ॥३८७॥

जिनमण्ड[illegible][9] [illegible] नरेश्वरः ।
कायोत्सर्गे स्थितो यावत् कुमारी तावदागता ॥३८८॥

सखीपञ्चशतीसार्धं नूपुरारावझंकृतिः ।
वस्त्राभरणभूषाढ्या चैत्यद्वारेण संस्थिता ॥३८९॥

शुकोवक् स्वागतं तुभ्यं सुशीले ! सद्गुणान्विते !
वार्यतां नूपुरारावो भूपो ध्यानाच्चलिष्यति ॥३९०॥

नारीनूपुरझाङ्कारैर्यस्य चित्तं न चञ्चलम् ।
स श्रीमान्न(ने)मियोगीन्द्रः पुनातु भुवनत्रयम् ॥३९१॥[10]

कुमारी तद्वचोलुब्धा[11] समायाता शुकान्तिके ।
भूपरूपं समालोक्य जाता मदनविह्वला ॥३९२॥

भोः कीर ! कथयास्माकं भूपः कोऽसौ क्व चागतः ।
क्व गमिष्यति किं नाम कथं स्वल्पपरिच्छदः ॥३९३॥

कीरो मन्दस्वरेणोचे सैष चन्द्रावतीपतिः ।
प्रयाति जिनयात्रायै[12] राजासौ चन्द्रसेनकः ॥३९४॥

---

1. $B^1$, $B^2$ and $B^3$ इमां । 2. $B^1$, $B^2$ and $B^3$ °वि । 3. $B^1$, $B^2$ and $B^3$ दूरतः स्थाप्यते सैन्यं भवता स्नानमाचर । 4. $B^1$ °पकार° । 5. $B^1$, $B^2$ and $B^3$ यद् । 6. $B^1$, $B^2$ and $B^3$ भूपतेस्तत् । 7. $B^2$ भ° । 8. $B^1$, $B^2$ and $B^3$ प्रवेशे । 9. $B^1$, $B^2$ and $B^3$ °नस्याष्ट° । 10. $B^1$, $B^2$ and $B^3$ omit the whole verse । 11. $B^1$, $B^2$ and $B^3$ °वचे । 12. $B^1$, $B^2$ and $B^3$ °त्रार्थे ।

एवं श्रुत्वा कुमार्यूचे ज्ञातो राजा तवैव हि ।
परं गुणेन केन त्वं तिर्यद्दुःषि(ग्दुःखं) निषेवसे ॥३९५॥

शुकोवक् श्रूयतां बाले ! गुणा भूपशरीरजाः ।
गुरुणा यदि वर्ण्यन्ते न पारः प्राप्यते तदा ॥३९६॥

शुक उवाच—
क्षारो वारिनिधिर्घने मलिनता कर्णे न धर्मे रुचिः
कल्पेप्यस्त्यकुलीनता कठिनतायुक्तश्च चिन्तामणिः ।
वैमुख्याचरणा तु देवसुरभिर्नीचाश्रितस्ते बली
सर्वे दूषणदूषिताः शृणु सखे ! निर्दूषणोयं नृपः ॥३९७॥

एवं निर्दूषणं ज्ञात्वा तिष्ठामि वरसुन्दरि ! ।
अहं पृच्छामि कीरोवग् यदि नो मयि कुप्यसि[1] ॥३९८॥

साप्यूचे न हि[2] कुप्यामि कीरोवक् तद्वचः शृणु ।
प्रौढा प्रौढगुणोपेता कुमार्यद्यापि किं त्वकम् ॥३९९॥

तयोक्तो निजवृत्तान्तः कुमार्या पितृमातृजः ।
वरिष्यति वरो जैनो मिथ्यात्वी मां न च क्वचित् ॥४००॥

यद्येवं शुकराजोवक् यदा राजायमुत्तमः[3] ।
आकृष्टस्तव पुण्येन समायातोत्र भामिनि ! ॥४०१॥

दूरीकृत्वाखिलाः सख्यः[4] कुमार्यूचे शुकाग्रतः ।
अनेन तव भूपेन मोहितं मम मानसम् ॥४०२

स्थापनीयस्त्वया कीर ! भूपोयं[5] दिवसत्रयम् ।
मातृपित्रोः समाख्याय परिणेष्यामि नान्यथा ॥४०३॥

यदेनं मे[6] न दास्यन्ति तदा [7]मन्मरणं ध्रुवम् ।
इति निश्चित्य मद्वाचा स्थातव्यं भूपते ! त्वया[8] ॥४०४॥

एतद्वचनमाकर्ण्य राजा गम्भीरमानसः ।
पूजां कृत्वा जिनेन्द्रस्य निःसृतो गर्भगेहतः ॥४०५॥

---

1. $B^1$ and $B^2$ कुप्यसे मया [ $B^2$ पि ] । 2. $B^1$, $B^2$ and $B^3$ न न [ $B^1$ ननु ] । 3. $B^1$, $B^2$ and $B^3$ °प्येष नृपोत्तमः । 4. $B^3$ दूरीकृत्य सखीः सर्वाः । 5. $B^1$, $B^2$ and $B^3$ °सौ । 6. $B^1$, $B^2$ and $B^3$ यदाप्येनं । 7. $B^1$, $B^2$ and $B^3$ मे मर° । 8. $B^1$, $B^2$ and $B^3$ °पतिस्त्वया ।

तावत्कन्या स्वलज्जातो वस्त्राभ(व?)रणपूर्वकम् ।
सखीभिः सपरीवारा गता गर्भगृहान्तरे ॥४०६॥
राजा शुकं समादाय सहर्ष[1] सैन्यमागतः ।
प्रशंसां शुकराजस्य कुरुते स्म[2] मुहुर्मुहुः ॥४०७॥
राजवर्गीयलोकाग्रे कथयामास[3] भूपतिः ।
शुकराजो मया प्राप्तो नूनं चिन्तामणीसमः ॥४०८॥
कन्या जिनार्चनं कृत्वा स्नेहाकुलितमानसा ।
शून्यचित्ता गृहे प्राप्ता सखीभिः परिवारिता ॥४०९॥
विकृतां विह्वलां कन्यां ज्ञात्वा त्रैलोक्यसुन्दरी ।
पृच्छति स्म[4] सखीवर्गं पुत्री[5] चिन्तातुरा कथम् ॥४१०॥
तद्वृत्तान्तं सखीदिष्टं ज्ञात्वा राज्ञी न्यवेदयत्[6] ।
भूपतेरग्रतः प्रायोभिप्रायं स्वसुताकृते[7] ॥४११॥
भूपेनोक्तं ततो भव्यं जातं मन्ये हृदीप्सितम् ।
[8]करस्खलितघृतपूरं पतितं शर्करोपरि ॥४१२॥
उग्रसेनस्ततो राजा सुतापाणिग्रहोत्सुकः ।
चन्द्रसेननृपस्यान्ते जगाम[9] सपरिच्छदः ॥४१३॥
चन्द्रावतीपतिस्तावद्दृष्ट आस्थानमण्डपे ।
चामरैर्वीज्यमानस्तु छत्रेणालंकृतः स्थितः ॥४१४॥
सरसाः सगुणाः सौम्या वामदक्षिणयोर्बुधाः[10]।
अनेकमन्त्रिसामन्तालंकृतो दृष्ट उन्नतः ॥४१५॥
उग्रसेनः सभामध्ये संनिधौ यावदागतः[11]।
तावच्चन्द्रावतीशोपि प्रोत्थितः संमुखस्ततः ॥४१६॥[12]
स्नेहेन च समालिङ्ग्य नमस्कारपुरःसरम् ।
प्रेम्लै(म्णै)कस्मिन्विष्टरेपि निविष्टं भूपतिद्वयम् । ४१७॥

---

1. B³ °र्षं । 2. B¹, B² and B³ च । 3. B¹, B² and B³ कथयत्येव । 4. B¹, B² and B³ °ते च । 5. P¹ and P³ °र्गं: पुत्रि । 6. B¹, B² and B³ नृपाग्रतः । 7. B¹, B² and B³ कथयामासभिप्रायं सुतायाः यन्मनोगतम् । 8. B¹, B² and B³ करात्स्ख° । 9. B¹, B² and B³ गच्छति । 10. B² and B³ °म्याः पण्डिता वामदक्षिणे । 11. B¹ and B² यावदायाति संनिधौ । 12. B³ omits this verse, but repeats the next verse ।

मार्गदर्शक - आचार्य श्री सुविधिसागर जी महाराज



[1]प्रकृष्टविनयेनापि सुधामधुरया गिरा ।
चन्द्रसेननृपस्याग्र उग्रसेनो व्यजिज्ञपत् ॥४१८॥

धन्योहं मत्पुरं धन्यं धन्या राज्यरमा मम ।
धन्या वेला घटी धन्या यज्जातं तव दर्शनम्[2] ॥४१९॥

पवित्रय पुरं नस्त्वं पवित्रय पुरीजनम् ।
प्रसादं कुरु मे भूप ! पवित्रय गृहं मम[3] ॥४२०॥

विनयावर्जितो भूपश्चन्द्रावत्या[4] नरेश्वरः ।
शुकपञ्जरमादाय चचालाल्पपरिच्छदः ॥४२१॥

महतो विनयाद् भूपो नगरेपि प्रवेशितः ।
मर्दनोद्वर्तनस्था(स्ना)नभोजनाद्यैश्च सत्कृतः ॥४२२॥

ताम्बूलास्वादनं कृत्वा वामशायी चणं ह्यभूत्[5] ।
प्रसुप्य चोत्थितं[6] ज्ञात्वोग्रसेनः समुपागतः ॥४२३॥[7]

विनयादग्रतो भूपोभ्येत्य विज्ञपयत्यदः[8] ।
सुहृदप्यागतो गेहे प्राप्यते भाग्ययोगतः ॥४२४॥

तव पार्श्वे गजाश्वादि स्वर्णादिमणिमौक्तिकम् ।
वर्तते त्वद्गृहे भूरि भवतः किं ददाम्यहम् ॥४२५॥

परमस्मद्गृहे ह्यस्ति कन्यारत्नं मनोरमम् ।
पुष्का(ष्पा)वतीति नाम्ना या मम तां त्वं[9] विवाहय ॥४२६॥

चन्द्रसेननृपस्तावदुग्रसेनाय भाषते ।
त्वया दत्ता मया ग्राह्या[10] दानं किं स्यादतः परम् ॥४२७॥

---

1. $B^1$, $B^2$ and $B^3$ परमे (म)° । 2. $B^1$ and $B^2$ दर्शनं तव । 3. $B^1$, $B^2$ and $B^3$ °यतु मे गृहम् । 4. $B^1$ and $B^2$ °वत्यां । 5. $B^1$, $B^2$ and $B^3$ क्षणेभूद्वामशायकः [$B^3$ त] । 6. $B^1$, $B^2$ and $B^3$ प्रसुप्तादुत्थितं । 7. $B^3$ adds the following after this veres :—

भुक्त्वोपविशतः स्वादु मलमूत्रानधामिनः ।
आयुर्वामकटिस्थस्य मृत्युर्धावति धावति ॥
वामशायी द्विभोजी च षण्मूत्रद्विपुरीषके ।
सकृन्मैथुनसेवैव जीवेद्वर्षशतं नरः ॥

8. $B^1$, $B^2$ and $B^3$ भूत्वा विज्ञापयति भूपतिम् । 9. $B^1$ and $B^2$ मम दत्तं; $B^3$ मया दत्तं । 10. $B^1$, $B^2$ and $B^3$ गृहीता मे ।

शोभने दिवसे प्राप्ते विवाहं च सविस्तरम् ।
कारयामास भूनाथः सुतायास्तद्वरस्य च ॥४२८॥

करमोचनके दत्ता गजाश्वा वस्त्रभूषणे ।
चन्द्रावतीशे कन्याया[1] जातः स्नेहः परस्परम् ॥४२६॥

कियन्त्यहान्यपि स्थित्वा ह्युग्रसेनगृहे नृपः ।
जातौ प्रीतिपरौ तौ द्वावत्यन्तं भूपती तदा ॥४३०॥

मुत्क(कृत्वा)लाप्य ततः स्थानाच्चलितश्चन्द्रभूपतिः[2] ।
पुष्पावत्याः पिता माता शिक्षां दत्तः शुभावहाम् ॥४३१॥

भक्ता श्वशुरश्वश्रूणां सपत्नीनिन्दनं त्यज ।
पतिप्रेमपरा वत्से ! त्वं तिष्ठ[3] सहचारिणी ॥४३२॥

यथा[4]–जंपिज्जइपियं विणयं करिज्ज वज्जिज्ज पुत्रि ! परनिंदं ।
विसणे वि हु मा मुंचसु देहच्छाय व्व नियनाहं ॥४३३॥

मिलित्वा पुत्रिजामात्रोर्दत्त्वा शिक्षामपि प्रियाम् ।
सपरिच्छदोग्रसेनो व्याघुट्य सदनं ययौ ॥४३४॥

चन्द्रसेनस्ततो राजा पुष्पावत्यान्वितः स्त्रिया ।
शुकेन सह तं मार्गं गोष्ठ्या स स्मातिवाहति ॥४३५॥

अविलम्बप्रयाणेन प्राप्ता चन्द्रावती पुरी ।
मन्त्रिभिर्निर्मितोत्साहः प्रविष्टो नृपतिः पुरे ॥४३६॥

अन्तःपुरे गतो राजा सर्वोप्यन्तःपुरीजनः ।
पट्टराज्ञीं विनागत्यानमन्नृपपदद्वयम्[5] ॥४३७॥

सर्वासां च सपत्नीनां पुष्पावत्यमिलत्प्रिया ।
ताभिर्युता वधूस्तत्र गता[6] यत्र शशिप्रभा ॥४३८॥

घनेन[7] विनयेनाथ[8] पुष्पावत्या शशिप्रभा ।
समुत्थाप्य[9] समानीता प्रक्षिप्ता भूपपादयोः ॥४३९॥

---

1. $B^1$, $B^2$ and $B^3$ कन्याचन्द्रवतीशाभ्यां । 2. $B^1$, $B^2$ and $B^3$ °चन्द्रसेनकः । 3. $B^1$, $B^2$ and $B^3$ छायेव । 4. $B^3$ उक्तं च instead of यथा । 5. $B^1$, $B^2$ and $B^3$ °त्य भूपपादयुगं नमन् । 6. $B^2$ °गाग° । 7. $B^1$, $B^2$ and $B^3$ परमे (म)° । 8. $B^1$, $B^2$ and $B^3$ °नापि । 9. $B^1$, $B^2$ and $B^3$ °प्य ।

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज



शुकोवक् पट्टराज्यग्रे फलं प्राप्तं कदाग्रहात् ।
यथा कृतं तथा प्राप्तं न दोषो भूपतेरियम् ॥४४०॥

उपहास्यं विधायेत्थं शुकोभून्मुदितान्तरः ।
राजापि नूतनस्नेहात् क्रीडतेन्तःपुरे स्त्रिया[1] ॥४४१॥

चन्द्रसेनस्य कन्यास्ति नाम्ना मदनमञ्जरी ।
परमं यौवनं[2] प्राप्ता वरयोग्या महागुणा ॥४४२॥

एकदा कन्यका दृष्ट्वा शुकं निर्व्यञ्जनस्थितम् ।
पप्रच्छ हृद्गतां चिन्तां न शृणोति यथा परः ॥४४३॥

शुकराज ! त्वया प्रायो भूमीमण्डलमध्यतः ।
राजानो बहवो दृष्टाः सद्गुणाश्च कृपापराः ॥४४४॥

परं पृच्छामि ते पार्श्वाच्छिक्ष्या देया प्रियङ्करी[3] ।
अहं प्रौढं[4] वयः प्राप्ता कं भूपं वरयाम्यहो[5] ॥४४५॥

शुकोवग् यद्यहं पृष्टस्तदा त्वं मद्वचः कुरु ।
गुणानामेकमावासं वर त्वं भोजभूपतिम् ॥४४६॥

वर्णने भोजभूपस्य देवाचार्योपि न क्षमः ।
तव योग्यो वरः सोस्ति रोचते वाथ तत्कुरु ॥४४७॥ युग्मम्

कन्योचे कीर ! सत्योक्तिः परमस्त्यत्र कारणम् ।
श्रूयते बहुभार्योसौ मां स्मरिष्यति वा न वा ॥४४८॥

कीरोवग्भोजभूपस्य कियत्यः सन्ति वल्लभाः ।
चतुःषष्टिसहस्रस्त्रीभर्ता चक्री निशम्यते ॥४४९॥

गुणैः प्रधानताप्यस्ति रूपेण न हि किंचन ।
भोजस्य पट्टमहिषी सूत्रधारसुता यथा ॥४५०॥

कुमार्यूचे कथं कास्ति[6] सूत्रधारस्य[7] कन्यका ।
कथं विवाहिता राज्ञा[8] सा कथा कथ्यतां शुक ! ॥४५१॥

कीरः प्राह शृणु त्वं भो ! धारायां भोजभूपतिः ।
सुखेन राज्यं कुरुतेमरावत्यां यथा हरिः ॥४५२॥

---

1. $B^1$, $B^2$ and $B^3$ पुरस्थितः । 2. $B^1$ and $B^2$ परमे यौवने । 3. $B^1$, $B^2$ and $B^3$ ते शिक्षा दातव्या (व्यां) हितकारिणीम् । 4. $B^1$, $B^2$ and $B^3$ °ढ° । 5. $B^1$, $B^2$ and $B^3$ °हम् । 6. $B^1$, $B^2$ and $B^3$ कासौ । 7. $B^1$ and $B^2$ °धारसुक° । 8. $B^1$, $B^2$ and $B^3$ भूपे ।

अन्यदास्थानसंस्थस्य भूपस्याग्रे समागतौ ।
चटिका चटकश्चैकः कलहन्तौ परस्परम्[1] ॥४५३॥

मनुष्यभाषया ब्रूते चटको भूपतेः पुरः ।
स्वामिन्नेषास्ति भार्या मे अपत्ये च[2] तवाग्रतः ॥ ४५४ ॥

मया कलहतेप्येषा[3] वराकी प्रतिवासरम् ।
स्फे (स्फो)टयास्मद्विरोधं त्वं[4] कुरु स्वामिन् ! पृथक् पृथक् ॥४५५॥

गृहलक्ष्मीरपत्ये च न्यायमार्गे यदा मम ।
समायाति तदा देयं न चेदस्याः प्रदीयताम् ॥४५६॥

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

भूपोवग् न्याय एवायमपत्यानि पितुः किल ।
चटिकोचे कथं राजन्नीदृशं भाषितं वचः ॥४५७॥

ये च मात्रा धृता गर्भे सोढा यत्प्रसवव्यथा ।
यया च पालिता बालाः सा भूपेनान्यथा कृता ॥४५८॥

राजोचे क्षेत्रदृष्टान्तं क्षेत्रे वपति कर्पु(र्ष?)कः ।
निष्पन्ने सोपि गृह्णाति न हि क्षेत्रस्य किंचन ॥४५९[5]॥

चटिकोचे यदाप्येवं प्रमाणं भूपतेर्वचः ।
टंक्युत्कीर्णाक्षरैः शालायां न्यायोयं विलिख्यताम्[6] ॥४६०॥

चटिकोक्तं कृतं राज्ञा[7] भूपोक्तं च तया कृतम् ।
गता सापत्यदुःखेन तीर्थे कुत्रापि कामिके ॥४६१॥

धारायां भोजभूपाग्रे जातिस्मृतियुता सुता ।
भवेयमुत्तमे वंशे झंपां संचिन्त्य सा ददौ ॥४६२॥

धारायां सूत्रधारस्य सोमदत्तस्य मन्दिरे ।
पञ्चोच्चग्रहसंभूता सुता सत्यवतीत्यभूत्[8] ॥४६३॥

लाल्यमाना प्रयत्नेन ववृधे सा दिने दिने ।
जातिस्मृतिगुणोपेता जाता द्वादशवार्षिकी ॥४६४॥

---

1. B[1], B[2] and B[3] समागतौ । 2. B[1], B[2] and B[3] ते । 3. B[1], B[2] and B[3] एषा कलहतेस्मासु । 4. B[1], B[2] and B[3] विरोधं स्फेटयास्मासु । 5. B[1] omits this verse and the first half of the following one । 6. B[1], B[2] and B[3] °ख्यते । 7. B[1], B[2] and B[3] भूपे । 8. B[1], B[2] and B[3] बतोति सा ।

मार्गदर्शक - आचार्य श्री सुविधिसागर जी महाराज



गृहे यत्कथ्यते कार्यं तद्वचस्तु न[1] लुप्यते ।
पितुरिष्टा मुखे मिष्टा दुष्टा दुष्टजनेपि सा ॥४६५॥

सत्यवत्याह्नि[2] चैकस्मिन् कथितं पितुरग्रतः ।
गृह्यतां बहुमूल्येन सुजात्योश्वोतिसुन्दरः ॥४६६॥

सुतावचनमात्रेण गृहीतो घोटकोद्भुतः ।
विख्यातो नगरीमध्ये सद्गुणात् [3]तत्पराक्रमात् ॥४६७॥

विद्यन्ते यस्य कस्यापि घोटिकाः सदनस्थिताः ।
ताः सगर्भा बभूवुश्च सूत्रधारस्य घोटकात् ॥४६८॥

पूर्णे गर्भे प्रसूतास्ते जात्याश्वाः सुमनोहराः ।
शिवातः सूत्रभृत्पुत्र्या निजाश्वान् पृच्छति स्म शम् ॥४६९॥

तेप्यूचुस्त्वत्प्रसादेन किशोराः सन्ति नीरुजः ।
श्रावयत्यपि लोकेभ्यः कतिचिद्वासरा गताः[4] ॥४७०॥

एकदा तेन धूर्तेन सूत्रधारेण तैः समम् ।
समारब्धो झगटकः[5] समर्प्यन्तां मदश्वकाः ॥४७१॥

अश्वाधिपा वदन्त्येवं किं वयं नाथवर्जिताः ।
किं वा भूपस्त्वमेवास्यस्माभिर्यत्कलहायसे ॥ ४७२ ॥

सूत्रधारस्ततः प्रोचे स्थिरीभाव्यं किमाकुलाः ।
पश्यतस्त्वद्विभोरग्रे[6] गृ(ग्र)हीष्यामि तुरङ्गमान् ॥ ४७३ ॥

कलहो दारुणो जातो लोकेषु न निवर्तते ।
गतास्ते भूपतेरग्रे पूत्कर्तुं घोटकाधिपाः ॥ ४७४ ॥

भूपेनाकर्ण्य वृत्तान्तः(न्तं) समाहूतः स सूत्रवित् ।
सत्यवती[7]सुतायुक्तः समायातो नृपान्तिके ॥ ४७५ ॥

परस्परं समालाप्य ज्ञातवृत्तः स भूपतिः ।
सूत्रधारं पृच्छति स्म[8] विवादोयं क शिक्षितः ॥ ४७६ ॥

---

1. $B^1$, $B^2$ and $B^3$ तद्वचः केन । 2. $B^2$ and $B^3$ द्दिने । 3. $P^1$ and $P^3$ °णास्त°; $B^1$ °णात्स । 4. $B^1$, $B^2$ and $B^3$ °रान् गतान् । 5. $B^3$ कागडं च समारब्धं । 6. $B^1$, $B^2$ and $B^3$ पश्यतां तव भूपेन । 7. $B^1$, $B^2$ and $B^3$ °वत्या । 8. $B^1$, $B^2$ and $B^3$ पृच्छते सूत्रधारस्य ।

सूत्रधारसुता प्रोचे शिक्षितोय तवान्तिके ।
सकोपः प्राह भूपालो मत्पार्श्वाच्छिक्षितः कथम् ॥४७७॥

साप्याहास्थानशालायां[1] टंक्युत्कीर्णाक्षरावली ।
वाच्यतां यच्चटिकाया न्यायमार्गः कृतस्त्वया ॥४७८॥

गजदन्तावलिन्यायादग्रतः स्यान्महद्वचः ।
प्रदापयतु चास्माकं किशोरान् मत्तुरंगजान् ॥४७६॥

सामन्ता मन्त्रिभिः सार्धं ज्ञात्वाभिप्रायमीशितुः ।
स्वं स्वं किशोरकं तस्मै ददुः सूत्रभृते क्षणात् ॥४८०॥

विस्मिता च सभा सर्वा गृहीताश्च किशोरकाः[2] ।
सूत्रधारः समायातः सत्यवत्यान्वितो[3] गृहे[4] ॥४८१॥

दुष्टचित्तेन भूपेनाहूतः सूत्रभृदप्यथो ।
सत्कृत्य बहुधा पूर्वं कथयामास तं प्रति ॥४८२॥

कुरु[4] दुर्गं पुरोमुष्याः कथयामि यथाविधि ।
कपिशीर्षोपरिष्टात्तु कुरु दुर्गं[5] [6]ममाज्ञया ॥४८३॥

नो चेत्तव विरुद्धं स्याज्ज्ञात्वा कुरु यथोचितम् ।
विलक्षः सूत्रधारस्तु श्रुत्वैवं च गतो गृहे ॥४८४॥

सचिन्तं पितरं ज्ञात्वा[7] सत्यवत्यपि पृच्छति ।
यथोक्तं भूपतेर्वाक्यं कथितं तत्सुताग्रतः ॥४८५॥

किमेतद्वचनं तात ! स्थीयतां कुरु भोजनम् ।
हृष्टस्तेनैव[8] वाक्येन कृताचारः स[9] भुक्तवान् ॥४८६॥

सुताशिक्षामुपादाय गतो भूपस्य संनिधौ ।
शिल्पी व्यजिज्ञपद्भूपं श्रूयतां मद्वचः प्रभो ॥४८७॥

कियदन्नं भोजनाय[10] यदि दापयति क्षितीट्[11] ।
तदा निश्चिन्ततामेत्या(त्य)[12] पुर्यां दुर्गं करोम्यहम् ॥४८८॥

---

1. $B^1$, $B^2$ and $B^3$ शाल्पूत्रे स्थान । 2. $B^1$, $B^2$ and $B^3$ गृहीत्वा च किशोरकान् । 3. $B^1$, $B^2$ and $B^3$ °त्या युतो । 4. $B^2$ गृहम् । 5. $B^1$, $B^2$ and $B^3$ °परि दुर्गं कुरु शीघ्रं । 6. $B^3$ ममा° । 7. $B^1$, $B^2$ and $B^3$ चिन्तातुरं पितुर्ज्ञात्वा । 8. $B^1$, $B^2$ and $B^3$ हर्षितस्तेन । 9. $B^1$, $B^2$ and $B^3$ °चारेण । 10. $B^1$, $B^2$ and $B^3$ भोजनाय कियद्दानं । 11. $B^1$, $B^2$ and $B^3$ °ते नृपः । 12. $B^1$, $B^2$ and $B^3$ निश्चिन्तको भूत्वा ।

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज


कोष्ठके भूभुजा दिष्टं देयमन्नं[1] मदाज्ञया ।
पित्राज्ञया कोष्ठकेपि सत्यवत्यागता पुनः[2] ॥४८६॥

मापं करं समादाय यावन्मापति कोष्ठिकः ।
आदिष्टं कन्यया तावन्मापितुं त्वं न जानसे ॥४६०॥

कोष्ठिकोवग्यथा [3]पूर्वैर्मापकैर्माप्यते मया ।
माप्यते तु तथा रीत्या त्वमन्यद्वेत्सि तद्वद ॥४६१॥

कन्योचे कुरु मद्वाक्यं मापे पूर्वं शिखां कुरु ।
पश्चात्पूरय मापं त्वं देह्यन्नं विधिनामुना ॥४६२॥

किमज्ञानासि बाले त्वं कोष्ठकेनापि भाषितम् ।
जातः परस्परं वादो गतं भूपस्य संनिधौ ॥४६३॥

उभयोरपि वृत्तान्तं श्रुत्वा भूपेन भाषितम् ।
कथं बाले ! शिखा पूर्वं भ्रियतेदोस्ति कौतुकम् ॥४६४॥

कपिशीर्षोपरि दुर्गं कुर्वे तत् किं न कौतुकम्[4] ।
वक्रोक्तिवचनै राजा हृष्टदुष्टात्मकोजनि ॥४६५॥

प्रीतिपद्वा(दुदु?)ष्टकन्यायाद्(म्?)भूपोप्येवं जगाद सः ।
पूर्वं मया विवाह्येयं ततो बुद्धेः [5]परीक्षणम् ॥४६६॥

एवं विमृश्य भूपालः[6] सूत्रधारगृहे गतः ।
याचयित्वा सा शुभेह्नि[7] सत्यवती विवाहिता ॥४६७॥

करमोचनके तेन दत्तास्तेस्वाः(श्वाः) सभूषणाः[8] ।
गृहीत्वा तद्गृहात्सर्वं पुनरेवं जजल्प राट्[9] ॥४६८॥

श्रूयतां मद्वचो बाले ! यद्वदामि तवाग्रतः ।
माता पिता तव भ्राता शृणोत्वन्यः परिच्छदः[10] ॥४६६॥

मत्पुत्रो मद्गृहादश्वो ममास्त्रं मद्विभूषणम् ।
यदा संपद्यते तुभ्यमागन्तव्यं तदा गृहे ॥५००॥

---

1. $B^1$, $B^2$ and $B^3$ दीयतेन्नं । 2. $B^1$, $B^2$ and $B^3$ सत्यवत्यागता तत्र गोष्ठागारे पिताज्ञया । 3. $B^1$, $B^2$ and $B^3$ पूर्णं माप° । 4. $B^2$ omits this half probably by oversight । 5. $B^1$, $B^2$ and $B^3$ बुद्धिप° । 6. $B^1$, $B^2$ and $B^3$ भूनाथः । 7. $B^1$ शुभे लग्ने । 8. $B^1$, $B^2$ and $B^3$ दत्तास्त्वान् वस्त्रभूषणान् । 9. $B^1$, $B^2$ and $B^3$ प्रजल्पति । 10. $B^1$, $B^2$ and $B^3$ चान्यः परिजनस्तव ।

मार्गदर्शक

एतद्वचनमाख्याय भूपोप्यागा[1]न्निजे गृहे ।
मातृपित्रादिकान् दृष्ट्वा कन्या दीनान्वदत्यपि ॥५०१॥

चिन्ता कार्या भवद्भिर्भो द्रक्ष्यं मद्बुद्धिकौशलम् ।
कियद्भिर्वासरैते मया पूर्या मनोरथाः[2] ॥५०२॥

इति शान्तवचः प्रोच्य स्थापितः स्वपरिच्छदः ।
कियत्स्वहस्सु भूपोपि ससैन्यो निर्गतः पुरात् ॥५०३॥

सीमालाः सन्ति भूपाला ये केपि च महाबलाः ।
भोजभूपप्रतापेन जाताः सर्वे निरर्थकाः ॥५०४॥

ज्ञात्वा भूपस्य वृत्तान्तं सत्यवत्या [3]विचिन्तितम् ।
सूत्रधाराय विज्ञाप्य सामग्री प्रगुणीकृता ॥५०५॥

नरवेषं च जग्राह कियत्सख्यन्विता तदा ।
वैदेशिकाः स्वर्णकाराः सज्जिताः सार्थहेतवे ॥५०६॥

सुवेषाः सद्गुणाः श्रेष्ठाः सेवकास्तेपि सत्कृताः ।
सालङ्काराः सुशोभाढ्यास्तुरगस्तुरगी य(त ?)था[4] ॥५०७॥

एवं समग्रसामग्रीयुता[5] पुंवेषधारिणी ।
सत्यवती दिनैः कैश्चित् प्राप्ता सैन्येस्य तत्क्षणात् ॥५०८॥

स्थिता प्रदेशेप्येकत्र भूपस्य मिलने गता ।
तत्रापि लब्धसत्कारोपविष्टास्थानमण्डपे[6] ॥५०९॥

प्रधानैः सेवकः पृष्टः कोसौ हि प्रवराकृतिः ।
वैदेशी सेवनायातो नाम्नासौ सत्यसंगरः ॥५१०॥

कुमारेण समं प्रीतिः संजाता तस्य भूपतेः[7] ।
निर्वाहाय ददौ द्रव्यं न ललौ सत्यसंगरः ॥५११॥

पुरग्रामैर्न मे कार्यं न हि द्रव्यैः प्रयोजनम् ।
द्यूतक्रीडार्थमायातो भोजभूप ! तवान्तिके ॥५१२॥

---

1. $B^1$, $B^2$ and $B^3$ भूपस्त्वागा॰ । 2. $B^1$, $B^2$ and $B^3$ ॰रैः स्माभिः( रैरेव ) पूरयामि मनोरथान् । 3. $B^1$ and $B^2$ ॰स्यापि । 4. $B^1$ and $B^3$ ततः । 5. $B^1$, $B^2$ and $B^3$ ॰श्रया युता । 6. $B^1$ and $B^2$ स्थानके वरे । 7. $B^1$ omits thie verse ।

कुमारो भूभुजा[1] सार्धं क्रीडति स्म[2] दिवानिशम् ।
तत्रोत्पन्ने रसे क्वापि स्वभोज्यमपि विस्मृतम्[3] ॥५१३॥

लुब्धं ज्ञात्वा नृपं तत्र[4] कुमारस्तु प्रजल्पति ।
तवाश्वेपि हि ढाल्यन्ते पाशका भूपते ! मया ॥५१४॥

तथास्तु भूभुजाप्युक्तः[5] कुमारेण जितस्ततः ।
प्रेषयामास [6]भूपाश्वान् स्वस्थाने पुनरप्यवक्[7] ॥५१५॥

शरीराभरणं सर्वं स्थाप्यतां[8] देव ! सांप्रतम् ।
तथा कृते च भूपेन कुमारेणापि तज्जितम्[9] ॥५१६॥

स्थाने स्वे तत् प्रेषयित्वा[10] कुमारोवक् पुनस्ततः ।
छत्रचामरकादीनि स्थाप्यन्तामधुना[11] तव ॥५१७॥

राज्ञा तान्यपि मुक्तानि कुमारेण जितानि च ।
स्वस्थाने प्रेषितान्येवं शयनाय समुत्थितः ॥५१८॥

भूपाश्वाद्गुर्विणी जाता कुमारस्य तुरङ्गिका[12] ।
तेन तादृशभूषादि स्वर्णकारैस्तु कारितम्[13] ॥५१९॥

वस्तु तादृशमेवाभूच्छत्रचामरकाद्यपि ।
एवं कृत्वा निजं कार्यं कुमारेणापि चिन्तितम् ॥५२०॥

सर्वं भूपस्य यद्वस्तु दीयते तर्हि सुन्दरम् ।
दत्त्वाह कौतुकेनेदं गृहीतं क्रीडता मया[14] ॥५२१॥

एवं दृष्ट्वा सभा सर्वा हृदये च[15] चमत्कृता ।
सत्यसंगरको नाम सार्थकं कृतवान्निजम्[16] ॥५२२॥

एवं च प्रत्यहं क्रीडन्नेकदा सत्यसंगरः ।
कथयामास भूपस्य [17]क्रीडयतेथ [18]स्वभार्यया ॥५२३॥

---

1. $B^1$, $B^2$ and $B^3$ भूपतेः । 2. $B^1$, $B^2$ and $B^3$ °ते च । 3. $B^1$, $B^2$ and $B^3$ उत्पद्यते रसः कोपि भोजनेपि हि विस्मृतिः[ $B^3$ तम् ] । 4. $B^1$, $B^2$ and $B^3$ ज्ञातं यदा भूपं । 5. $B^1$ °क्तं । 6. $B^1$, $B^2$ and $B^3$ स्वस्थाने प्रेषयस्व° । 7. $B^1$, $B^2$ and $B^3$ पुनर्वदति भूपतिम् । 8. $B^1$, $B^2$ and $B^3$ शरीराद्भूषणाः सर्वे स्थाप्यन्ते । 9. $B^1$ and $B^2$ ते जिताः । 10. $B^1$, $B^2$ and $B^3$ प्रेषयित्वा निजे स्थाने । 11. $B^1$, $B^2$ and $B^3$ स्थाप्यन्तेप्यधुना । 12. $B^1$, $B^2$ and $B^3$ तुरङ्गमा । 13. $B^1$, $B^2$ and $B^3$ तादृशा भूषणाः सर्वे स्वर्णकारैः सुकारिताः । 14. $B^1$, $B^2$ and $B^3$ गृहीतं कौतुकेनेदं क्रीडद्भिर्भूपर(ल?)क्षणम् । 15. $B^1$, $B^2$ and $B^3$ °न । 16. $B^1$, $B^2$ and $B^3$ °नसौ । 17. $B^3$ क्रीड° । 18. $B^1$, $B^2$ and $B^3$ स्वस्व° ।

स्वभार्या दीयते तुभ्यं मयका यदि हार्यते ।
यदि त्वया हार्यते स्त्री देया मम दिनाष्टकम् ॥५२४॥
कां चिद्दासीं प्रदास्यामि चिन्तितं हृदि भूभुजा[1] ।
क्रीडति स्म समं तेन विमृश्यैवं नरेश्वरः[2] ॥५२५॥
जितः स भूभुजा[3] सद्यो जातः[4] कोलाहलः[5] क्षणात् ।
कृत्रिमं च विलक्षत्वं प्राप्तोसौ सत्यसंगरः ॥५२६॥
ऋतुकाले कियत्स्वेषा दिवसेषु गता स्वयम्[6] ।
भूपपार्श्वे सश्रृङ्गारा स्त्रीवेषा दिव्यगन्धभृत्[7] ॥५२७॥
कर्पूरागरुकस्तूरीधूपधूम्रेण वासिता ।
सताम्बूला समायाता दिव्यरूपं दधत्यसौ[8] ॥५२८॥
तथा चातुर्यतस्तिष्ठेद्यथा भूपो न लक्षते[9] ।
प्रहरत्रितयं तस्थौ भूपतेरन्तिके तु सा[10] ॥५२९॥
अपकीर्तिं निजां श्रुत्वापवादाद्भीतमानसः ।
भूपतिः प्रेषयामास पश्चात्तां सदने निजे[11] ॥५३०॥
तयास्ति[12] प्रत्ययार्थं च गृहीता[13] भूपमुद्रिका[14] ।
समायाता निजे स्थाने चतुर्थप्रहरे निशः ॥५३१॥
कार्यसिद्धिः कृता सम्यग् भूपस्योक्तानुसारतः[15]।
धारायामेत्य[16] वृत्तान्तः कथितो मातुरग्रतः ॥५३२॥
मुदिताः स्वजनाः सर्वे पितृभ्रातृमुखास्तदा[17] ।
सुखितागमयत्कालं कियन्त्यपि दिनानि सा[18] ॥५३३॥
भोजभूपः समायातो जित्वा सीमालभूपतीन् ।
राज्यं सम्यक् पालयति[19] कोपि नोपप्लवामिकृत् ॥५३४॥

---

1. $B^1$ and $B^2$ भूपेन चिन्तितं चित्ते दास्यामः कां च दासिकाम् । 2. $B^1$, $B^2$ and $B^3$ एवं विमृश्य भूनाथः क्रीडय(ड)ते तत्समं तदा । 3. $B^1$, $B^2$ and $B^3$ जितो भूपतिना । 4. $B^1$, $B^2$ and $B^3$ °तं । 5. $B^1$, $B^2$ and $B^3$ °लं । 6. $B^1$, $B^2$ and $B^3$ अन्तरेण ऋतुस्नानात् कियत्यपि दिनैर्गता । 7. $B^1$, $B^2$ and $B^3$ सुगन्धद्रव्यलेपिता । 8. $B^1$, $B^2$ and $B^3$ भूत्वा स्त्रीरूपधारिणी । 9. $B^1$, $B^2$ and $B^3$ तथा तिष्ठति चातुर्ये यथा भूपो न लक्षति । 10. $B^1$, $B^2$ and $B^3$ स्थिता च दिवस [ $B^2$ and $B^3$ प्रहर ] त्रीणि लोकोक्तिर्भूपतिश्रुता । 11. $B^1$, $B^2$ and $B^3$ आत्मनो लघुतां ज्ञात्वा प्रेषिता सा निजे गृहे । 12. $B^1$ and $B^2$ विदग्धा । 13. $B^1$ and $B^2$ °त्वा । 14. $B^1$ and $B^2$ °काम् ; $B^3$ कार्यसिद्धिः कृता सम्यक् यथा भूपेन भाषिता । 15. $B^1$ and $B^2$ यथा भूपेन भाषितम् [ $B^2$ ता ] । 16. $B^1$, $B^2$ and $B^3$ धारामागत्य । 17. $B^1$, $B^2$ and $B^3$ पितृपरिजनादयः । 18. $B^1$, $B^2$ and $B^3$ च । 19. $B^1$, $B^2$ and $B^3$ पालयते सम्यक् ।

सत्यवत्याः स सद्गर्भो ववृधे निरुपद्रवः[1] ।
तया च पूर्णैर्दिवसैः[2] सूनुः सूतः शुभे दिने[3] ॥५३५॥

उच्चस्थाने ग्रहाः पञ्च परमोच्चाश्च केचन ।
लग्नपः केन्द्रगोश्वस्थोरिष्टहान्यै च ते ग्रहाः ॥५३६॥

सूत्रधारः प्रमोदेन करोति [4]स्म महोत्सवम् ।
चक्रुर्जातककर्मापि गोत्रवृद्धाः स्त्रियोपि ताः ॥५३७॥

नखशुद्धिस्तु संजाताद्दशमे[5] दिवसे कृता ।
भोजितो बन्धुवर्गोपि नामस्थापनकं व्यधात् ॥५३८॥

देवराजोभिधानेन[6] लाल्यमानो दिने दिने ।
क्रमेण पञ्चवर्षीयो जातो रूपगुणाधिकः ॥५३९॥

तावद्गृहकिशोरास्ते संजातास्च तुरङ्गमाः ।
शोभने दिवसे सत्यवत्येवमकरोत्पुनः[7] ॥५४०॥

स्नापितः पाणिना बालो विलु(लि)प्तः कुङ्कुमद्रवैः ।
अलङ्कृतः सुवस्त्रेण दिव्यभूषणभूषितः ॥५४१॥

छत्रेण चामराभ्यां च कुण्डलाभ्यामलङ्कृतः ।
भोजराज्ञोवतंसेन देवराजो विनिर्मितः ॥५४२॥

सुतो(तं) हये समारोप्य स्वयं स्थित्वा सुखासने ।
वादित्रे वाद्यमानेम्बा गता तत्र चमूयुता[8] ॥५४३॥

आस्थानस्थोपि भूनाथश्चिन्तयामास मानसे ।
[9]चित्रं जनसमूहोयं किमायातीति पश्यति[10] ॥५४४॥

तावत्सूत्रभृता[11]गत्य विज्ञप्तो भोजभूपतिः[12] ।
मत्सुतैषा समायाति यथादिष्टा त्वया पुरा ॥५४५॥

भूपेनोक्तं च यद्येवं तदा प्रत्याययस्व माम् ।
एवं श्रुत्वा ददौ राज्ञे तां [13]नामाङ्कितमुद्रिकाम् ॥५४६॥

---

1. B² °द्रवम् । 2. B² and B³ परिपूर्णदिनैस्तत्र । 3. B¹ omits this whole verse । 4. B¹, B² and B³ महद्गुत्स° । 5. B¹, B² and B³ °ता द° । 6. B¹ and B³ °जाभि° । 7. B¹, B² and B³ सत्यवत्यकरोत्य(दि)दम् । 8. B¹ and B² वादित्रैर्वाद्यमाना सा कियत्सैन्यसमन्विता । 9. B¹, B² and B³ एतज्जन° । 10. B¹, B² and B³ कौतुकम् । 11. B¹, B² and B³ सूत्रवित्तावदा° । 12. B¹, B² and B³ °तिम् । 13. B¹, B² and B³ तस्मै तन्ना° ।

स्वकीयां मुद्रिकां दृष्ट्वा हृष्टो हृदि महीपतिः[1]।
स्वोत्सङ्गे सुतमारोप्य जातो रोमाञ्चकञ्चुकी ॥५४७॥
विसर्जिता सभा सर्वा नीता चान्तःपुरे प्रिया[2]।
मिमिले च तया साकं विस्मयाकुलमानसः[3] ॥५४८॥

बुद्धिप्रपञ्चचतुरां ज्ञात्वा तां स नरेश्वरः।
सकलान्तःपुरीमध्ये पट्टराज्ञीं चकार च ॥५४९॥
*शुकोवक् शृणु कौमारि! गुणैः किं किं न लभ्यते*[4]।
एतदाख्यानकं श्रुत्वा प्रोचे मदनमञ्जरी ॥५५०॥

त्वद्वचो हि मया कीर! कर्तव्यं नात्र[5] संशयः।
नरोन्यो वरणीयो मे[6] सहोदरसमो न हि[7] ॥५५१॥
इति निश्चित्य कौमारी जाता भोजेनुरागिणी।
ज्ञात्वानुरागं तन्माता वदति स्म नृपाग्रतः ॥५५२॥

सुतामनोरथं ज्ञात्वा चन्द्रसेनमहीपतिः[8]।
अमात्यं प्रेषयामास धारायां भोजसंनिधौ ॥५५३॥
दिनैः स्तोकैरमात्योपि प्राप्तो धारापुरीं ततः।
प्रासादमन्दिरश्रेणीं गतोपश्यच्चतुष्पथे[9] ॥५५४॥

कोटीश्वराश्च ये सन्ति दुर्गमध्ये वसन्ति ते[10]।
लक्षेश्वरा बहिःस्थाश्च वसन्ति क्षितिपाज्ञया ॥५५५॥
तेषां गृहापणान्पश्यन् संप्राप्तो भूपमन्दिरे।
आश्चर्यं विविधं[11] तत्र किं किं पश्यति युग्मदृक् ॥५५६॥

शुभ्रान्मनोरमांस्तुङ्गान् स्वर्णकुम्भैरलङ्कृतान्।
ऊर्ध्वदृग् व्यथितग्रीव आवासान् पश्यति स्म सः ॥५५७॥
गजशालागजान् मत्तानपश्य[12]त्पर्वतोपमान्।
हव्य(य)शालाहयान् सूर्यरथाश्वाभानपश्यत[13] ॥५५८॥

1. $B^2$ and $B^3$ हृष्टचित्तस्तु भूपतिः। 2. $B^1$, $B^2$ and $B^3$ गतोर(तश्चा)न्तःपुरे नृपः। 3. $B^1$, $B^2$ and $B^3$ विस्मयाकुलचित्तेन मिलितस्तत्स्त्रि[$B^1$ and $B^2$ स्त्रि]या सह। 4. $B^1$ लभ्यते; $B^2$ and $B^3$ लभ्यते। 5. $B^1$ °व्योयं न; $B^2$ and $B^3$ °व्यो हि न। 6. $B^1$, $B^2$ and $B^3$ °न्यवरणेस्माकं। 7. $B^1$, $B^2$ and $B^3$ °समं विदुः। 8. $B^1$, $B^2$ and $B^3$ चन्द्रसेनेन भूपेन सुताभिप्रायजानतः(ता)। 9. $B^1$, $B^2$ and $B^3$ °मन्दिरार(भ्र)म्यान् गतः पश्यंश्चतु°। 10. $B^1$, $B^2$ and $B^3$ ये केचिद्वसन्ते दुर्गमध्यगाः। 11. $B^1$, $B^2$ and $B^3$ साश्चर्य[$B^3$ र्यं]कौतुकं। 12. $B^1$, $B^2$ and $B^3$ पश्यन्नुत्तमान्प°। 13. $B^1$, $B^2$ and $B^3$ पश्यन् मन्ये सूर्यरथोपमान्।

एवं पश्यन् गतस्तत्र यत्रास्ति द्वारपालकः ।
ज्ञातोदन्तनृपाज्ञातः संप्राप्तो भूपसंनिधौ ॥५५९॥

भोजभूपस्य चास्थानं मनुष्यैर्वर्ण्यते कथम् ।
शतानि पञ्च विदुषां तिष्ठन्ति वामदच(चि)णे ॥५६०॥

चामरैर्वीज्यमानस्य शीर्षे छत्रं विराजते ।
सीमाला ये च[1] राजान उपविष्टाः सभान्तरे ॥५६१॥

भोजराजोपि तन्मध्ये शोभते वासवोपमः[2] ।
नमस्कृत्योपविष्टः स शिवं पृच्छति भूपतिः ॥५६२॥

शिवं चन्द्रावतीशस्य शिवं दारसुतेषु च[3] ।
शिवं तद्गजवाहानां तद्राज्ये वर्तते शिवम् ॥५६३॥

सोप्याह त्वत्प्रसादेन सर्वथा निरुपद्रवम् ।
परं कार्यवशेनाहं प्रेषितोस्मि तवान्तिके ॥५६४॥

चन्द्रसेनगृहे पुत्री नाम्ना मदनमञ्जरी ।
भोजभूपस्य सा दत्ता[4] तल्लग्ने लेख एष ते ॥५६५॥

तं लेखं कर आदाय गुरुर्वाचयति द्रुतम् ।
शृणोति स्म सरोमाञ्चो भूपो हृष्टो मनोन्तरे[5] ॥५६६॥

स्वस्ति श्रीशुक्लदशम्यां वैशाखे गुरुवासरे ।
आगन्तव्यं विवाहार्थं त्वया भोज ! स्वसेनया ॥५६७॥

तत्पत्रं वाचयित्वा च प्रमोदेनातिमेदुरः ।[6]
संतोष्य भूभुजामात्यो दानमानैर्विसर्जितः ॥५६८॥

स्वयं चादाय सामग्रीं[7] विशेषात्सैन्यसज्जितः ।
सोत्सवश्चालितो भोजः सामान्यैः शकुनैरपि ॥५६९॥

कियद्भिस्तु दिनैः प्राप्तश्चन्द्रावत्याः पुरोबहिः[8] ।
स्नेहात्संमुखमायातश्चन्द्रसेनः स भूपतिः ॥५७०॥

---

1. B[1], B[2] and B[3] वेपि । 2. B[1], B[2] and B[3] °मम् । 3. B[1] and B[2] पुत्रदारादिभिः शिवम् । 4. B[1] and B[2] दत्ता सा । 5. B[1], B[2] and B[3] भूपः सहर्षरोमांचं प्लुकितस्तु शृणोदियम् । 6. B[1], B[2] and B[3] प्रमोदामोदमेदुरः । 7. B[1], B[2] and B[3] च कृतसामग्र्या । 8. B[1], B[2] and B[3] °त्यां पुरादबहिः ।

आचार्य श्री सुविधिसागर जी महाराज

राजानो मिलितास्तत्र जाता प्रीतिः परस्परम् ।
काप्यावासे समानीय स्थापितः सपरिच्छदः ॥५७१॥
शुकं निर्व्यञ्जनं ज्ञात्वा कुमार्यागत्य पृच्छति ।
त्वदादेशरतो[1] भोजः शिक्षां देहि ममाधुना[2] ॥५७२॥
कीरांवग्यदि शिक्षा मे करोपि गुणशालिनि ! ।
तदा सर्वसुखप्राप्तिर्भविष्यति न संशयः ॥५७३॥
दत्त्वा शिक्षां कुमार्यास्तु प्रेषिता सा निजे गृहे ।
शुकस्य पञ्जरं तेन नीतं [3]विवाहमण्डपे ॥५७४॥
लग्नस्यावसरे प्राप्ते हयेनारुह्य भूपतिः ।
दानेन प्रीणयन् दीनान् राजद्वारे समागतः ॥५७५॥
कृता विवाहजाचारा नीतश्चतुरिकान्तरे ।
भोजेन सह कौमारी जगृहे[4] फेरकत्रयम् ॥५७६॥
चतुर्थे फेरके[5] प्राप्ते कुमार्यप्यूर्ध्वतः[6] स्थिता ।
पृष्टा च सा कथं भद्रे ! त्वं नो दास्यसि फेरकम् ॥५७७॥
पितृभ्यां कारणं पृष्टं कथयत्येव कन्यका ।
भोजोयं न भवेद्भूपो [7]ह्यधुनैव श्रुतं मया ॥५७८॥
पित्रोक्तं किं जनोक्तेन प्रत्यक्षोयं स भूपतिः ।
कन्यकोचे च यद्येवं भोजवद्दर्शयेत्कलाम् ॥५७९॥
परकायाप्रवेशस्य कलां मे दर्शयिष्यति ।
तदेनं परिणेष्यामि किमन्यैर्बहुभाषितैः ॥५८०॥
सुताया निश्चयं ज्ञात्वा भूपो भोजं[8] व्यजिज्ञपत् ।
स्त्रियाः कदाग्रहः सोयं भञ्जनीयो यथातथा ॥५८१॥
चन्द्रसेनवचः श्रुत्वा भोजभूपो व्यजिज्ञपत् ।
एकं मृतं छगलकं समानय ममान्तिके ॥५८२॥
इमां तस्य गिरं श्रुत्वा शुकः [9]सज्जीबभूव सः ।
निजदेहं संग्रहीष्यामीति चिन्तापरः स च ॥५८३॥

20985

LIBRARY GOVT. COLLEGE MANDSAUR

1. B[1], B[2] and B[3] °देशे वृतो । 2. B[1], B[2] and B[3] दापय मेधुना । 3. B[1], B[2] and B[3] वी° । 4. B[1], B[2] and B[3] संजाता । 5. B[1], B[2] and B[3] चतुर्थावसरे । 6. B[1] and B[3] कुमार्या(र्य)प्यर्धतः । 7. B[1], B[2] and B[3] भोजभूपो न हीत्येषोप्य° । 8. B[1], B[2] and B[3] भोजे । 9. B[1], B[2] and B[3] सज्जो ।

मार्गदर्शक - आचार्य श्री सुविधिसागर जी महाराज

भोजभूपगिरा छागः समानीतस्तदन्तिके ।
मन्त्राज्जीवितछागस्य विवेशाङ्गे स[1] तत्क्षणात् ॥५८४॥

छगलं जीवितं[2] दृष्ट्वा जना यावच्चमत्कृताः ।
तावच्छुको निजे देहे प्रविष्टो मन्त्रसाधनात् ॥५८५॥

वाचालिता जनाः सर्वे सामन्ता मन्त्रिसेवकाः ।
[3]पुरोहितादिप्रमुखा हृष्टास्ते भूपदर्शनात् ॥५८६॥

चन्द्रसेनस्य भूपस्य सुता जाता प्रमोदभाक् ।
ततो भोजनरेन्द्रस्य[4] जातं वीवाहमङ्गलम् ॥५८७॥

सुता सा वाजिभिर्दत्ता[5] गजवाजिरथादिभिः[6] ।
चन्द्रसेनः सभूनाथो दत्ते स्मांशुकभूषणे ॥५८८॥

शुकं मृतं समालोक्य[7] दुःखितश्चन्द्रसेनराट्[8] ।
ज्ञात्वा भोजनरेन्द्रेण स्ववृत्तं न प्रकाशितम् ॥५८९॥ यथा[9]—

अर्थनाशं मनस्तापं गृहे दुश्चरितानि च ।
वञ्चनं चापमानं च मतिमान्न प्रकाशयेत् ॥५९०॥

अथ प्रभाते संजाते राज्ञा भोजेन भाषितम् ।
आज्ञापयति मे राजा गच्छामि स्वपुरे तदा ॥५९१॥

चन्द्रसेनः सुतायै तां शिक्षां दत्त्वा गुणाधिकाम् ।
कियद्भुवं[10] गतः सार्धं भोजो [11]वालितवान् हठात् ॥५९२॥

एकतः शुकसन्तापः सुताविच्छोहितः पुनः ।
कष्टेन गृहमानीतो मन्त्रिभिश्चन्द्रसेनकः ॥५९३॥

भोजभूपः स्त्रिया साकं शास्त्रचर्चाविधानतः[12] ।
मार्गं बहुतरं नैव लङ्घ्यमानं न वेत्ति सः[13] ॥५९४॥

कतिचिद्दिवसैः प्राप्तो धाराया[14] वनभूमिषु ।
प्रारब्धोऽस्त्युत्सवो[15]लोकैर्महता विस्तरेण च ॥५९५॥

1. $B^1$ and $B^2$ मन्त्रात्स्व(ड)जीवछागस्य देहे विशति । 2. $B^1$, $B^2$ and $B^3$ छागं जीवितवान् । 3. $B^1$, $B^2$ and $B^3$ धी° । 4. $B^1$, $B^2$ and $B^3$ °नरेन्द्रेण । 5. $B^1$, $B^2$ and $B^3$ या मातृभि° । 6. $B^1$, $B^2$ and $B^3$ °दिकान् । 7. $B^1$, $B^2$ and $B^3$ पञ्जरात् शुकमा° । 8. $B^1$, $B^2$ and $B^3$ °सेनकः । 9. $B^3$ उक्तं च instead of यथा । 10. $B^1$, $B^2$ and $B^3$ कियद्भूमौ । 11. $B^1$ वलि° । 12. $B^1$, $B^2$ and $B^3$ °चर्चादिभिः पथम् । 13. $B^1$, $B^2$ and $B^3$ च्युटयमानं न जानाति तथा मार्गश्रमादिकम् । 14. $B^1$ and $B^2$ °यां । 15. $B^1$ and $B^2$ प्रारब्धमुत्सवम् ।

गता प्राप्ता च राज्यश्रीश्चान्यः पाणिग्रहोत्सवः ।
इति हर्षपरो लोकः प्रवेशयति[1] भूपतिम् ॥५९६॥

भोजभूपः समायातः प्रमोदान्निजमन्दिरे ।
अन्तःपुर्यादयः सर्वे समायाता नृपान्तिके ॥५९७॥

पूर्वोक्ताभिः समस्याभिरुपलक्ष्य नृपोत्तमम्[2] ।
योजिताञ्जलयः सर्वे प्रणेमुः पदपङ्कजम् ॥५९८॥

मन्ये चिन्तामणिः प्राप्तोथवा कल्पतरुः किमु ।
नृपस्य दर्शनं जज्ञेन्तःपुरीणां[3] प्रमोददम् ॥५९९॥ यथा—[4]

पेम्माउ राण[5] णवजुव्वणाण ञ्चाण मेलए जाए[6] ।
जं संभु इयं सुक्खं[7] तं भयवं केवली मुणइ ॥६००॥

ततुं स्वां गृहीत्वास्य धूर्तस्य पार्श्वात्
ततश्चन्द्रसेनस्य पुत्रीयमूढा ।
अवन्तीं[8] गतो राज्यधानीं स जीया[9]-
द्वरां भुज्यमानश्चिरं भोजभूपः ॥६०१॥

*इति [10]भोजचरित्रे परकायाप्रवेशविद्याभ्यसनो देवराजजन्मवर्णनो नाम चतुर्थः प्रस्तावः ॥४॥*

---

1. B¹, B² and B³ परा लोकाः प्रवेशयन्ति । 2. B¹ नृपोत्तमः । 3. B¹, B² and B³ तासामन्तःपुर्या° । 4. B³ उक्तं च instead of यथा । 5. B¹, B² and B³ पेमा उराण । 6. B³ जाही । 7. B¹, B² and B³ जं संकप्पई सुखं । 8. B¹, B² and B³ °न्त्यां । 9. B¹, B² and B³ °नीं(न्यां) सामग्र्यां । 10. B¹ adds पाठकवल्लभकृते; B² adds धर्मघोषगच्छे वादीन्द्रश्रीधर्मसूरिसन्ताने श्रीमहीतिलकसूरिशिष्यपाठकराजवल्लभकृते ।

[ अथ पञ्चमः प्रस्तावः ]

ईदृग्विधा च राज्यश्रीर्भुज्यमानो निरन्तरम् ।
दीनेभ्योदापयद्दानं श(स) त्रागाराण्यमण्डयत्[1] ॥१॥

अन्तःपुरस्थितो भूपः कियद्भिर्दिवसैस्ततः[2] ।
राज्यश्रियं पालयन् सन् गमयामास[3] वासरान् ॥२॥

राज्ञी सगर्भा संजाता नाम्ना मदनमञ्जरी ।
यत्नतः पाल्यमानास्तु पूर्यन्ते दोहदाः पुनः ॥३॥

परिपूर्णैर्दिनैर्जातः शुभग्रहनिरीक्षितः ।
वच्छराजोङ्गजो नाम्ना[4] वद्र्धेसौ दिने दिने ॥४॥

देवराजोष्टवर्षीयो[5] वच्छोभूत्पञ्चवार्षिकः ।
अतीव वल्लभौ राज्ञः[6] विद्यावध्ययनाय तौ ॥५॥

दिनैः स्तोकतरैर्जातौ सर्वशास्त्रपरायणौ ।
तत्तच्छास्त्रकलाभ्यासौ बाल्यादप्यनयोर्बभौ ॥६॥

देवराजोपि संजातः क्रमाद् द्वादशवार्षिकः ।
वच्छराजः पुनर्जज्ञे नववार्षीयकः क्रमात् ॥७॥

उभयोः प्रीतिरत्यन्तं नखमांसाधिकास्ति च[7] ।
अथवा नेत्रवत्तेषां प्रीतिः श्लाघ्या जनेपि हि ॥८॥ यथा[8]—

सह जग्गि रासा[9] सह सोयराण सह हर[10] ससोयवंताण ।
नयणा णवधन्नाणय अजम्म[11] अकित्तिमं पिम्मं ॥९॥

भोजभूपस्य तौ पुत्रौ प्राणेभ्योप्यतिवल्लभौ[12] ।
गुणेनात्मप्रभावेण वल्लभः को न जायते ॥१०॥

---

1. B¹, B² and B³ °ण्यनेकदा: । 2. B¹, B² and B³ कियत्यपि दिनै° । 3. B¹, B² and B³ पुनरेव हि राज्यश्री(र्ज्यं च) पालयामास । 4. B¹, B² and B³ °राजेति नामेन । 5. B¹, B² and B³ °वार्षीको । 6. B¹, B² and B³ भूपे । 7. B¹, B² and B³ °कापि हि । 8. B³ उक्तं च instead of यथा । 9. B¹, B² and B³ जग्ग [ B³ ग ]राण । 10. B¹ and B² हुरि । 11. B¹ and B³ आजम्म; B² आजन्म । 12. B¹, B² and B³ ते पुत्राः प्राणादपि हि वल्लभाः । B¹, B² and B³ continue the plural forms instead of the dual ones even in the foilowing verses and we neglect these variations ।

चन्द्रसेनेन भूपेन प्रहिता अन्यदा नराः ।
उत्सुका मिल[1]नायेयुर्भोजस्य प्रान्तिके क्षणात्[2] ॥११॥

भूपोद्याप्यस्ति संसुप्तः कथितं मध्यवर्तिभिः ।
उत्सु[3]कान् पुरुषान् ज्ञात्वामात्यैरेवं विचिन्तितम् ॥१२॥ यथा[4]—

बालको नृपतिश्चैव गुरुः सिंहोथवा रिपुः ।
एते सुप्ताः स्थिताः सन्तो न प्रबोध्याः कथंचिदपि ॥१३॥

तत् किं कुर्मोधुनामात्या यावदेवं विचिन्तयन् ।
तावत्कुमारौ भूपस्य क्रीडन्तौ समुपागतौ[5] ॥१४॥

अमात्यवचनैस्तौ द्वौ गतौ यत्रास्ति भूपतिः ।
प्रबुद्धस्तद्वचः श्रुत्वा कुर्वंश्चित्ते घर्ना रुषम्[6] ॥१५॥

केन दुष्टात्मना जागरूकोहं निर्मितः क्षणात् ।
यावत्पश्यति कृष्टासिस्तावद्दृष्टौ कुमारकौ[7] ॥१६॥

अव( च ? )ध्याविति भूपोदात्पुत्रयो[8]र्देशपट्टकम् ।
यावत्क्षेत्रे मदाज्ञास्ति कार्या तावत्स्थितिर्न हि ॥१७॥

यदीन्द्रस्याप्सरोमध्ये भानुमत्यस्ति नामतः ।
तामानीय समेतव्यं नान्यथा दृष्टिगोचरे ॥१८॥

पितुः शिक्षावतो वाचं[9] शीर्षे ह्यारोप्य तत्क्षणात् ।
पाणिना खड्गमादाय निर्गतौ विकसन्मुखौ ॥१९॥

गत्वा मात्रन्तिके नत्वा तौ व्यजिज्ञपतामिति[10] ।
ताताज्ञायाः प्रमाणार्थमावाभ्यां गम्यते पुनः ॥२०॥

गच्छतः पथि सोमालौ भि(खि)द्येते नोष्णशीततः ।
क्षुत्तृपापीड्यमानौ तौ कातरत्वं न गच्छतः ॥२१॥

बाल्येपि वर्तमानौ तौ महासाहसशालिनौ ।
मार्गमुल्लङ्घ्य संप्राप्तौ समुद्रतटके पुरे ॥२२॥

---

1. B[1] and B[2] °न्मिल° । 2. B[1], B[2] and B[3] प्रातके क्षणे । 3. B[1] and B[3] उच्छ°; B[2] उच्छ्र° । 4. B[3] उक्तं च instead of यथा । 5. B[1], B[2] and B[3] क्रीडयन्तौ समागतौ । 6. B[1], B[2] and B[3] कुर्वन्भान्मति ! भान्मति ! 7. B[1], B[2] and B[3] स्नेहोभूद्रोषवारणः । 8. B[1], B[2] and B[3] तथापि नृपतिः कोपात्सुतयोः । 9. B[1], B[2] and B[3] आशिषावत्ति ( आशीर्वच्चपि ? ) तुर्वाचां । 10. B[1], B[2] and B[3] गतौ तौ मातृपादान्ते नमस्कृत्य व्यजिज्ञपन ।

ततस्तद्भाग्यसंयोगात्सार्थवाहो धनञ्जयः ।
पूरयन्नस्ति बोहित्थं[1] दृष्ट्वा तावपि सज्जितौ ॥२३॥

धनञ्जयेन तौ पृष्टौ युवाभ्यां कुत्र गम्यते ।
कुतः स्थानात्समायातौ भवन्तौ कारणं किमु ॥२४॥
तावाहतुश्च सार्थेश ! आवां वैदेशिकौ नरौ ।
साहाय्यात्तव पश्यावो द्वीपान्तरगतां[2] श्रियम्[3] ॥२५॥
सार्थेड्वदति भो[4] भद्रौ ! युवामद्यापि बालकौ ।
जलान्तर्भ्रमणं दुःखं संदेहस्तु पदे पदे ॥२६॥
अर्भकावूचतुश्चिन्ता न कार्या सार्थवाह भोः !
वेलायामागमिष्याव आवां कार्ये तवैव हि ॥२७॥

हसित्वा सेवका ऊचुः श्रुत्वा तद्वचनश्रियम् ।
सार्थेश ! कुरु सार्थायौ[6] दिनमप्यतिवाह्यते ॥२८॥
वाहने तौ[7] समारूढौ सार्थाधीशस्य चाज्ञया ।
पाथोधौ पूरितः पोतः पवनाद्याति चोत्सुकः ॥२९॥

कियद्भिस्तु दिनैर्गच्छन् वाहनस्तु महोदधौ ।
स्तम्भितो वाहकैः पुम्भिः कुवाताद्भीतमानसैः[8] ॥३०॥
लग्ना नाङ्गारमुद्धर्तुं सुवाते सति ते पुनः[9] ।
एकोथ सहसा यातो द्वितीयो निस्सरेन्नहि ॥३१॥

खिन्नाः खेदपरा जाताः कथंचन न निस्सरेत् ।
मन्यन्ते बहुलं भोगं स्वगोत्रजमरुत्ततेः[10] ॥३२॥[11]
श्रेष्ठ्यूचे देवराज ! त्वं पूर्वोक्तं वचनं स्मर ।
त्वद्वाक्ये मम[12] संदेहो न मे(च)[13] भावी कदाचन ॥३३॥

---

1. $B^1$, $B^2$ and $B^3$ प्रोहण[$B^1$ णः] पूर्यमाणस्तु । 2. $B^1$, $B^2$ and $B^3$ द्वीपद्वीपान्तरः° । 3. $B^3$ °यः । 4. $B^1$, $B^2$ and $B^3$ सार्थेशो वदते । 5. $B^1$ and $B^2$ भ्रमणं(णे) जलमार्गेण । 6. $B^1$, $B^2$ and $B^3$ सार्थे तान् । 7. $B^1$, $B^2$ and $B^3$ °नेन । 8. $B^1$, $B^2$ and $B^3$ कुवाताद्वातभीतितः । 9. $B^1$, $B^2$ and $B^3$ पुनः सुवातकं ज्ञात्वा लग्ना नारंगमुद्धृतम् [$B^1$ धृतम्; $B^2$ द्धृतम्] । 10. $B^1$, $B^2$ and $B^3$ भोगभागादि मान्यन्ते देवानां स्वस्वगोत्रजाम् [ $B^1$ जम् ] । 11. $B^3$ adds the following after this verse : उक्तं च—

आर्ता देवान्नमस्यन्ति तपस्कुर्वन्ति रोगिणः ।
निर्धना विनयं यान्ति वृद्धा नारी पतिव्रता ॥

12. $B^1$, $B^2$ and $B^3$ अतः परं च । 13. $B^1$ नाहम° ।

यदि शक्तिस्तवास्तीति ह्युपकारं तदा कुरु ।
संनद्धः स पुमान् सद्यः परोपकरणक्षमः ॥३४॥

दत्त्वा शिक्षां निजभ्रातुः स्वबाहुबलपूरितः[1] ।
नाङ्गरशृङ्खलालग्नो ददौ झम्पां महोदधौ ॥३५॥

लग्नः सन् शृङ्खलादेशे[2] गतो दूरे कियत्यपि ।
तावत्प्रासादशृङ्गाग्रे विलग्नादर्शि[3] शृङ्खला ॥३६॥

आश्चर्यं देवराजस्य जलधौ चैत्यसंस्थितम् ।
दृष्ट्वापूर्वमिदं स्थानं पश्चान्मोक्षामि[4] शृङ्खलाम् ॥३७॥

विमृश्येदं गतश्चैत्ये यावद्गर्भगृहान्तरे ।
श्रीयुगादिजिनस्तावद्दृष्टः पद्मासनस्थितः ॥३८॥

एकचित्तेन तीर्थेशं यावदाद्यं स्तवीति सः ।
एका स्त्री तावदायाता वृद्धा काचिन्मनोहरा ॥३९॥

तां दृष्ट्वा देवराजोवग् मातः ! कथय कारणम् ।
अगाधजलधावेतत्केन चैत्यं विनिर्मितम्[5] ॥४०॥

एतच्छ्रुत्वावदद् वृद्धा सर्वां[6] मूलादिमां कथाम् ।
हे वत्सैकाग्रचित्तेन श्रोतव्यं[7] मद्वचस्त्वया ॥४१॥

श्रीयुगादिजिनेन्द्रस्य प्रव्रज्याव[8]सरे तदा ।
भरताद्या बभूवुस्ते[9] शतमेकं तनूद्भवाः ॥४२॥

ज्ञात्वा युगादिदेवेन सर्वेषां च पृथक् पृथक् ।
सर्वे जनपदा दत्ता[10] विभज्य स्वयमेव हि ॥४३॥

अयोध्यां भरते तक्षशिलां बाहुबलिन्यपि ।
नामानुसारतोन्येषां देशानपि ददौ मुदा[11] ॥४४॥

दत्त्वा संवत्सरं यावद्दानं श्रीनाभिनन्दनः ।
दीक्षामादाय विच्छर्दात्[12] कृत्वा कर्मक्षयं ततः ॥४५॥

---

1. $B^1$, $B^2$ and $B^3$ बुद्ध्वा सार्वशबाहुभिः । 2. $B^1$, $B^2$ and $B^3$ शृङ्खलालग्नमानस्तु । 3. $B^1$ and $B^2$ दृष्ट° । 4. $B^1$ and $B^2$ °न्मुञ्चामि । 5. $B^1$, $B^2$ and $B^3$ चैत्यो विनिर्मितः । 6. $B^1$, $B^2$ and $B^3$ एवं श्रुत्वा ततः प्रोचे वृद्धा । 7. $B^1$, $B^2$ and $B^3$ श्रूयतां । 8. $B^1$, $B^2$ and $B^3$ दीक्षायाव° । 9. $B^1$, $B^2$ and $B^3$ भरथ- बाहुबलीमुख्याः । 10. $B^1$, $B^2$ and $B^3$ दत्तानि सर्वदेशानि । 11. $B^1$, $B^2$ and $B^3$ अन्येषां यथा दत्तं तत्तन्नामदेशतः । 12. $B^1$ $B^2$ and $B^3$ विस्तारे ।

अवाप्य पञ्चमं ज्ञानं[1] पुण्डरीकं धरोपरि ।
संपूर्णं पूर्वलक्षं च प्रपाल्य चरणं वरम्[2] ॥४६॥

निर्वाणावसरेप्यत्र प्राप्तः श्रीपुरपत्तने ।

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

सहस्रचतुरशीत्या मुनिभिः परिवारितः ॥४७॥

लक्षत्रितयसाध्वीभिः क्षामनां प्रविधाय च ।
गत्वा च सद्गिरेः शृङ्गे सहस्रदशसाधुयुक् ॥४८॥

चतुर्दशेन भक्तेन बद्धपद्मासनस्थितः ।
ययौ मोक्षपुरीं तत्र शुभध्यानपरायणः[3] ॥४९॥

षट्पञ्चाशद्दिक्कुमार्यश्चतुःषष्टिः सुराधिपाः[4] ।
चक्रुर्निर्वाणकल्याणं चतुर्देवनिकायकाः[5] ॥५०॥

कियद्दिनैः समागत्य भरतेनाथ चक्रिणा[6] ।
कारितः श्रीपुरस्थाने प्रासादोयं महापृथुः[7] ॥५१॥

विश्रामस्थानकं ज्ञात्वा श्रीयुगादिजिनेशितुः[8] ।
प्रतिमां स्थापयित्वात्र गतो ह्यष्टापदे गिरौ ॥५२॥

गव्यूतित्रयमानोच्चं प्रासादं हि[9] हिरण्मयम् ।
चतुर्द्वारं चतुश्शालं चतुर्विंशतिना(का)न्वितम्[10]॥५३॥

कारयामास सश्रीकं प्रासादं सुमनोहरम् ।
श्रीमत्सिंहनिषिद्याह्वं संपत्कोत्पत्तिकारकम्[11] ॥५४॥

कारयित्वा ह्यसौ चक्री श्रीमद्भरथनामकः[12] ।
गत्वायोद्ध्यापुरे राज्यं षट्खण्डानामपालयत्[13] ॥५५॥

चतुर्दश च रत्नानि भाण्डागारेस्य जज्ञिरे ।
निधानानि नवैतानि करे जातानि तत्क्षणम्[14] ॥५६॥

---

1. $B^1$, $B^2$ and $B^3$ पञ्चमं ज्ञानमा[$B^1$ सं]पन्नं । 2. $B^1$, $B^2$ and $B^3$ °लक्षैकं चारित्रं निर्मलं ततः । 3. $B^1$, $B^2$ and $B^3$ वृता मोक्षवधूस्त [$B^1$ and $B^2$ त]त्र शुभध्यानवशाग्मृतः । 4. $B^1$, $B^2$ and $B^3$ देवेन्द्राणां चतुःषष्टिः छप्पन्नदिक्कुमारिकाः । 5. $B^3$ °कायिनि । 6. $B^1$, $B^2$ and $B^3$ भरथच[ $B^1$ and $B^2$ इच ]क्रवर्तिना । 7. $B^1$, $B^2$ and $B^3$ सविस्तरम् । 8. $B^1$ and $B^2$ जिनेश्वरीम् । 9. $B^1$, $B^2$ and $B^3$ सं । 10. $P^1$ and $P^2$ °तिकं भुजम् । 11. $B^1$, $B^2$ and $B^3$ सिंह[$B^2$ संघ; $B^3$ सिष]निषद्याप्रासादं सश्रीकं सुमनोहरम् । 12. $B^1$, $B^2$ and $B^3$ नरेन्द्रेण भरथचक्रवर्तिना । 13. $B^1$, $B^2$ and $B^3$ गत्वा गृहे निजं राज्यं षट्खण्डस्य [प्र]भुज्यते । 14. $B^1$ and $B^2$ मञ्जूषाकुक्षरिस्त(त्त)टे ।

अथ निधिः[1] –

नेसप्पे[1]१ पंडुआए[3]२ पिंगलए[4]३ सव्वरयण४ मह[5]पउमे ५

कालेय[6]६ महाकाले७ माणवगमहानिहीऽ८ संखे ९[7] ।

रत्नानि[8] सेणावइप्रमुखानि[9] ॥

अन्तःपुरीचतुःषष्टिसहस्राणि गृहान्तरे ।

ज्ञेयाः पिण्डविलासिन्यः सपादलक्षमानकाः ॥५७॥

लक्षाश्चतुरशीतिश्च रथसद्गजवाजिनाम्[10] ।

कोट्यः षण्णवतिर्जाता ग्रामपत्तिव्रजस्यच[11] ॥५८॥

[12]द्वासप्ततिः[13] सहस्राणि वेलाकूलतटस्य[14] च ।

अष्टादश च कोट्यः स्युर्लाससंबद्धवाजिनाम्[15] ॥५९॥

एवं राज्यश्रियं प्राप्य श्रीमद्भरथचक्रिराट्[16] ।

निविष्टोस्त्यन्यदा स्थाने ह्येकदा स्नानहेतवे[17] ॥६०॥

आनखं चाशिखं रूपं दृष्ट्वा दर्पणमध्यगम् ।

फाल्गुने पत्रहीनं च यथा वृक्षशरीरकम्[18] ॥६१॥

तं(तद्)दृष्ट्वा चक्रवर्ती तु जातो वैराग्यरङ्गभाक्[19] ।

हृदये चिन्तयामास धिग्रूपं यौवनं च धिक् ॥६२॥[20]

---

1. $B^1$ निधयः; $B^3$ नवनिधाननां नाम कहे छे । 2. $B^1$, $B^2$ and $B^3$ निसप्पे । 3. $B^1$ पंडुय; $B^2$ °यए; $B^3$ पिण्डयए । 4. $B^3$ पिङ्गल । 5. $B^3$ महा° । 6. $B^1$ काले । 7. $B^1$, $B^2$ and $B^3$ माणवगे8 महानिहि9 संखे 10 । 8. $P^1$ omits this word; $B^3$ अथ चउदरत्ननाम । 9. $B^1$, $B^2$ and $B^3$ सेणाव[$B^1$ वा]इ १ माहावई[$B^3$ वाई ]२ पुरोहि[$B^3$ हित्य]३ गय४ तुरि[$B^3$र]य ५ वढिय [$B^1$ वड्ढि; $B^2$ वढि] ६ इच्छीय ७ चक्कं८ छत्तं९ चम्मं १०मणि ११ कागणि १२ खड्ग [$B^2$ ग; $B^1$ गि]१३ दंडोय१४ [ $B^1$ and $B^2$ do not number the items ] । 10. $B^1$, $B^2$ and $B^3$ गजानां च रथानां च चतुराशीतिलक्षत: । 11. $B^1$, $B^2$ and $B^3$ ग्रामाणां च पदानां च [ $B^1$ and $B^2$ पदातीनां ] कोटीनां षण्णवत्यपि । 12. $B^1$, $B^2$ and $B^3$ द्वि । 13. $B^1$, $B^2$ and $B^3$ °ति° । 14. $B^1$, $B^2$ and $B^3$ तटानि । 15. $B^1$, $B^2$ and $B^3$ अष्टादशस्तु(तु) कोटीनां ह्लासबद्धतुरंगमान् । 16. $B^1$, $B^2$ and $B^3$ एवंविधा च राज्यश्रीभो(भुं)क्ता भरथचक्रिणा । 17. $B^1$, $B^2$ and $B^3$ एकदा स्नानहेत्वर्थं प्रविष्टः स्नानमण्डपे । 18. $B^1$, $B^2$ and $B^3$ वृक्षस्तथा तनुः । 19. $B^1$, $B^2$ and $B^3$ रञ्जितः । 20. $B^1$, $B^2$ and $B^3$ add the following after this verse:–यथा[$B^3$ उक्तं च]—संझरागजलबुब्बु उवमे [In $B^2$ the verse stops here] जीविएय जलबिंदुचंचके । जुव्वणेयण च[$B^3$ चेईवे ]गसन्निभे पावजीव । किमयं ( किमिदं ) न बुद्धयसि । $B^3$ adds one more verse : तिच्छयरागणहारी बलदेवो तहय केसवो रामा । संहरिया हयविहुणा का गणणा पउलोगस्स ॥

[1]चला लक्ष्मीश्च[2]ला: प्राणा[3]श्चलं रूपं च[4] यौवनम् ।
चञ्चलेतीव[5]संसारे धर्म एकोस्ति[6] निश्चलः ॥६३॥

चक्रिणा घातिकर्माणि घातितानि पुरा भवे ।
जिताश्चारित्रखड्गेनाप्यन्तरङ्गाश्च वैरिणः ॥६४॥

भावनायाः प्रमाणेन शुक्लध्यानस्य योगतः ।
संजातं केवलज्ञानं चारित्रेण तपो[7] विना ॥६५॥

स्फुरद्दुन्दुभिनादेन विबुधैः पञ्चवर्णजाः[8] ।
पुष्फ(ष्प)वृष्टी रत्नवृष्टीश्चक्रे केवलिसत्कृतिः[9] ॥६६॥

दशेन्द्रा देवलोकस्य[10] चन्द्रसूर्येन्द्रयुग्मकम् ।
द्वात्रिंशद्व्यन्तरेन्द्राश्च विंशतिर्भुवनेश्वराः ॥६७॥

इन्द्रा एते चतुःषष्टिः शचीभिः परिवारिताः ।
दिक्कुमार्यश्च सम्प्राप्ता गन्धर्वाः किन्नरादयः ॥६८॥

गीतनृत्यादिवादित्रैः कृतकैवल्यकोत्सवः[11] ।
भरतेशो जगादैवं [12]सौधर्मेन्द्रस्य चाग्रतः ॥६९॥

चैत्यं विश्रामसंस्थाने श्रीयुगादिजिनेन्द्रजम् ।
विद्यते श्रीपुरस्थाने तस्य चिन्ता तवैव हि ॥७०॥

तथास्त्विति वचः प्रोक्त्वा हरिः[13] सौधर्ममाययौ ।
तस्माद्दिनादद्य यावत् शुश्रूषा क्रियते मया[14] ॥७१॥

पञ्चाशत्कोटि[15]कोटीक[16]सागरेषु गतेष्वहो[17] ।
द्वितीयस्तीर्थकृज्जज्ञे नाम्ना श्रीअजितो जिनः ॥७२॥

तस्मिन्नवसरे जातश्चक्री सगरनामकः ।
चतुःषष्टिसहस्रान्तःपुर्यस्तस्य च जज्ञिरे[18] ॥७३॥

1. $P^3$ adds यतः–संसारगजल° before this verse; $B^1$ and $B^2$ add पुनः– । 2. $B^3$ लक्ष्मी च° । 3. $B^2$ stops the verse with प्राणाः । 4. $B^1$ ते रूप°, $B^3$ जीवित° । 5. $B^1$ and $B^3$ चलाचलेषु[$B^3$ ष] । 6. $B^1$ and $B^3$ हि । 7. $B^1$, $B^2$ and $B^3$ चारित्र-मुतपः° । 8. $B^1$ and $B^2$ °जम् ; $B^3$ °ज । 9. $B^1$, $B^2$ and $B^3$ केवली महिमा कृता । 10. $B^1$, $B^2$ and $B^3$ देवलोकादृद्य प्राप्ताः । 11. $B^1$, $B^2$ and $B^3$ °वादित्रकृतकेवलिकोच्छवः । 12. $B^2$ सु° । 13. $B^1$, $B^2$ and $B^3$ यथास्तु वचनं तेन द[$B^1$ कृ]त्वा । 14. $B^1$, $B^2$ and $B^3$ शुश्रूषाक्रियतेस्माभिस्तद्दिनादद्य यावतः । 15. $B^3$ °शल्लक्ष° । 16. $B^1$, $B^2$ and $B^3$ °कोटिना । 17. $B^1$, $B^2$ and $B^3$ °ष्वपि । 18. $B^1$, $B^2$ and $B^3$ अन्तःपुरीभिरावृत्तश्चतुःषष्टिसहस्रशः ।

सर्वा अपत्यहीनास्ताः स्त्रीणां दुःखमिदं महत् ।
संतानेन च या हीनास्ता हीनाः सर्ववस्तुभिः[1] ॥७४॥ यथा[2]–

दिनं दिनकरं विना वितरणं विना वैभवं
महत्त्वमुचितं विना सुवचनं विना गौरवम् ।
सरः सरसिजं विना धनमरं विना मन्दिरं
कुलं तनुरुहं विना श्रयति नैव सश्रीकताम् ॥७५॥ पुनः–

दिगम्बरं[3] गतव्रीडं जटिलं धूलिधूसरम् ।
पुण्यहीना न पश्यन्ति गङ्गाधरमिवात्मजम् ॥७६॥ उक्तं च–

तं मन्दिरं मसाणं जत्थ न दीसंति धूलिधवलाइं ।
निवडंतरडंताइं तिदुन्निणो डिंभडिंभाइं[4] ॥७७॥

एवं विचिन्त्य बहुधा दुःखपूरितमानसः ।
उद्यान[5]वनभूमीषु गतः सगरभूपतिः ॥७८॥यथा–

जने रतिस्तु रक्तानां विरक्तानां वने रतिः ।
अनवस्थितचित्तानां न जने न वने रतिः ॥७९॥

दृष्टस्तु मुनिरुद्दाम[6]केवलज्ञानभास्करः ।
अयोध्यायां समायातो भव्यसत्त्वान् विबोधयन् ॥८०॥

नमस्कृतो मुनिस्तेन सगराख्येन चक्रिणा[7] ।
देशनान्ते च[8] विज्ञप्तः स एव[9] मुनिपुङ्गवः ॥८१॥

स्वामिन् ! सन्तानहीनस्य निष्फलं[10] जीवितं धनम् ।
भगवन् ! मम किं[11] सूनुर्भविष्यति न वाथवा[12] ॥८२॥

मुनिरप्याह भो भद्र ! पृच्छस्यादरतो यदि[13] ।
सुताः षष्टिसहस्राणि भविष्यन्ति तवालये[14] ॥८३॥

सगरोप्याह हे स्वामिन् ! सुतस्यैकस्य संशयः ।
कुतः[15] षष्टिसहस्राणि कौतुकं वर्तते मम ॥८४॥

---

1. B¹, B² and B³ संताने यो नरो हीनः स हीनः सर्ववस्तुना । 2. B³ उक्तं च–instead of यथा । 3. B¹ and B² °र° । 4. B² and B³ पडंति रुडंति घुडंति याइं दोभिन्निडिं भरूआइं [B³ जच्छं डीभं नोदोतीष्नम्] । 5. B³ °ने । 6. B¹, B² and B³ मुनिसंहर्षी । 7. B¹, B² and B³ सगरचक्रवर्तिना । 8. B¹, B² and B³ स । 9. B¹ °दत्तचक्रिणा । 10. B¹, B² and B³ °हीनोयं विफलं । 11. B¹ and B² कच्य[B²थ]तां भगवन् । 12. B¹ and B²स्त्यथवा न हि । 13. B¹, B² and B³ यदि पृष्टोस्मि सादरात् । 14. B¹, B² and B³ तव गृहे । 15. B¹, B² and B³ प्रोक्ता ।

मुनिराह न संदेहो ज्ञेयं[1] तथ्यमिदं वचः ।
समुदायवशादेव भविष्यन्ति सुतास्तव ॥८५॥
आम्रवृक्षफलं चैकं तुभ्यं यद्यद्य निशयहो[2] ।
प्रत्यक्षीभूय दत्ते ह्यागत्य शासनदेवता ॥८६॥
स्तोकं स्तोकतरं तच्च दातव्यं प्रविभज्य भोः[3] ।
समस्तानामपि स्त्रीणां[4] सन्ततिस्ते भविष्यति ॥८७॥
एवं श्रुत्वा नमस्कृत्य मुनीन्द्रपदपङ्कजम् ।
प्रमोदमे[5]दुरो भूत्वा चक्रवर्ती गृहे गतः ॥८८॥
निशान्ते तदपि[6] प्राप्तं फलमाम्रस्य चक्रिणा[7] ।
स्त्रीरत्नस्य करे दत्तं प्रोक्त्वा व्यतिकरं च तत् ॥८९॥
दध्यौ च पट्टमहिषी किमन्यासां घनैः[8] सुतैः ।
एकोपि यदि मे भावी राज्यधुर्यस्तदा[9] वरम् ॥९०॥ यथा–
किं जातैर्बहुभिः पुत्रैः शोकसन्तापकारकैः ।
वरमेकः कुलालम्बी यत्र विश्रम्यते[10] कुलम् ॥९१[11]॥ पुनः–
किं तेन जात[12] ! जातेन मातुर्यौवनहारिणा ।
स जातो येन जातेन वंशो याति समुन्नतिम् ॥९२॥ उक्तं च–
एकेनापि सुपुत्रेण सिंही[13] स्वपति निर्भयम् ।
स एव दशभिः पुत्रैर्भारं वहति गर्दभी ॥९३॥
एवं विचिन्त्य सहसा[14] भक्षयामास तत्फलम् ।
उत्पद्यन्ते च तद्गर्भे जीवाः षष्टिसहस्रकाः ॥९४॥
राज्ञ्या गर्भस्थजीवेषु वर्धमानेष्वहर्निशम् ।
जलोदरमिवोत्पन्नं जठरं जातवद्गुरु ॥९५॥
पूर्णेष्वहस्सु सुषुवे[15] मत्कोटकसमान् सुतान् ।
निर्वाते स्थापितास्तेपि घृतप्लुतरुतान्तरे[16] ॥९६॥

---

1. B¹, B² and B³ यथा । 2. B¹, B² and B³ अद्य रात्रौ यदा तुभ्यं फलैकं चाम्रवृक्षजम् । 3. B¹, B² and B³ तैर्विभज्य च । 4. B¹, B² and B³ स्त्रीणां षष्टिसहस्राणां । 5. B¹, B² and B³ °दाम्मे° । 6. B¹, B² and B³ तत्तथा । 7. B¹ and B² फलं तच्चक्रवर्तिना । 8. B¹, B² and B³ किमन्यैर्बहुभिः । 9. B¹, B² and B³ धौरेव तद् । 10. B¹, °विश्रमते; B² विश्रामते । 11. B² omits this verse as well as the next । 12. B¹ and B² जातु । 13. P¹ and P³ stop with सिंही । 14. B¹, B² and B³ मनसा । 15. B¹, B² and B³ पूर्णे दिनेष प्रसवे । 16. B¹, B² and B³ रुतेन च ।

वर्धापनं पुरे तत्र कारितं चक्रवर्तिना ।
प्रदत्तं नाम सर्वेषां वृद्धिं प्राप्ताः क्रमेण ते[1] ॥९७॥

पाठिताः समये सर्वे [2]शास्त्रशस्त्रादिकाः कलाः[3] ।
यौवनेन च संयुक्ता[4] रूपश्रीनिधयोभवन् ॥९८॥ यथा–

खादयतु यदपि तदपि हि[5] मलिनं वासश्च परिदधात्वङ्ग[6] ।
प्रकटीकृत[7]लावण्यं तदपि रमणीयम् ॥९९॥

एकदाष्टापदे यातो यात्रायै सगरो नृपः[8] ।
पुत्रदारादिसंघेन चातुर्वर्ण्येन संयुतः ॥१००॥

नमस्कृत्य जिनान् सर्वांश्चतुर्विंशतिसंख्यकान्[9] ।
बिम्बद्वयं च पूर्वस्यां दक्षिणस्यां चतुष्टयम् ॥१०१॥

बिम्बाष्टकं पश्चिमायां दशकं च तथोत्तरे ।
एवं संपूज्य संस्तूय वर्णयंश्च[10] यथाविधि ॥१०२॥

संघभक्तिं च संघार्चां कृत्वाचारान् यथाविधि ।
समायातो निजे स्थाने सगरः संघसंयुतः[11] ॥१०३॥

कुमारा हर्षपूरेण गिरेरुत्तीर्य भूस्थिताः ।
कीर्तनं पूर्वजानां च दृष्ट्वोर्ध्वभुवि संस्थितम् ॥१०४॥

भरतेन कृते तीर्थे[12] परिखा न कृता कथम् ।
पञ्चमारकजा[13] लोकास्तीर्थध्वंसविधायिनः ॥१०५॥

भविष्यन्ति ततोस्माभिः क्रियते परिखोद्यमः ।
यथागम्यं भवेत्तीर्थं विलम्बो न विधीयते[14] ॥१०६॥

[15]अधर्मेषु विलम्बः स्यात् विलम्बो बन्धुविग्रहे ।
विलम्बः परदारासु धर्मे नैव विलम्बयेत् ॥१०७॥

---

1. $B^1$, $B^2$ and $B^3$ च । 2. $B^1$ शस्त्रशा° । 3. $B^1$, $B^2$ and $B^3$ °कां कलाम् । 4. $B^1$, $B^2$ and $B^3$ °नेनापि सम्प्राप्ता । 5. $B^2$ and $B^3$ हु । 6. $B^1$, $B^2$ and $B^3$ वसनं परिदधा [$B^3$ ध]त्यथवा । 7. $B^1$, $B^2$ and $B^3$ आपूरित° । 8. $B^1$, $B^2$ and $B^3$ सगरो राजा यात्राया (यै)ष्टापदे गतः । 9. $B^1$, $B^2$ and $B^3$ °दादशाकमान् । 10. $B^1$, $B^2$ and $B^3$ एतान् संस्तूय संपूज्य वर्णयानो । 11. $B^1$, $B^2$ and $B^3$ °पु[ $B^3$ पौ ]रः । 12. $B^1$, $B^2$ and $B^3$ कृतं यत्नं । 13. $B^1$, $B^2$ and $B^3$ पञ्चमः( म )कालजा । 14. $B^1$, $B^2$ and $B^3$ °यताम् । 15. $B^1$ and $B^2$ add यथा; $B^3$ adds उक्तं च ।

सर्वे ते खनने[1] लग्ना यावद्भवनराड्गृहाः ।
स्थितास्तदा यदा तेन भवनेन्द्रेण वारिताः ॥१०८॥

पुनस्ते चिन्तयामासुः कुमाराः प्रौढपौरुषाः ।
जलपूर्णा यदा ह्येषा परिखा स्यात्तदा वरम् ॥१०९॥

दण्डरत्नं समादाय चक्रिणः परिखां व्यधुः[2] ।
पूरमाकाशगङ्गायाश्चिक्षिपुश्च तदन्तरे ॥११०॥

गृहाणि भुवनेशानां जलेनोपप्लुतान्यथ ।
क्रोधेनागत्य तत्स्थानाद् भुवनेन्द्रोथ सत्वरः ॥१११॥

गृहीत्वैकः कुमारस्तु[3] बोलितः[4] परिखाजले ।
एकायुषः प्रमाणेन सर्वे मग्नाश्च ते जले[5] ॥११२॥

श्रुतं [6]सागरभूपेन सुतानां मृत्युकारणम् ।
दुःसहं दारुणं दुःखं वृद्धेष्वपि विशेषितम्[7] ॥११३॥ यथा–

बालस्स माइमरणं[8] भज्जामरणं च जुव्वणारंभे ।
वुड्ढस्स पुत्तमरणं तिन्नि विगुरुयाइं दुखाइं ॥११४॥ पुनः[9]–

हा हियय[10] वज्जघडिओ अह वा घडिओ[11] सि सारखंडेहिं ।
पुत्तह [12]विओगसमये जं न हुओ खंडखंडेहिं ॥११५॥ उक्तं च[13]–

गोभद्रः सगरस्तथा दशरथः श्रीमान्नृपः श्रेणिको
नागाह्वो रथिकः प्रसन्ननृपतिर्धात्रीधवः[14] कोणिकः ।
ज्ञानाढ्यो हरिभद्रसूरिमुनिपः सूरिश्च शय्यंभवः
पुत्रप्रेमणि मोहिता भुवनके गाम्भीर्यभाजोपि हि ॥११६॥

तदा महोदधेस्तीरे कारितं चक्रिणा सरः ।
योजनशतविस्तीर्णं सागराभिधमुत्कटम्[15] ॥११७॥
सगरः सागरीं कीर्तिं गङ्गाकीर्तिं भगीरथः ।
रामस्याभिनवा कीर्तिरेका भार्या न रक्षिता ॥११८॥[16]

---

1. $B^1$, $B^2$ and $B^3$ खनितुं । 2. $B^1$, $B^2$ and $B^3$ चक्रवर्तिसमीपतः । 3. $B^1$, $B^2$ and $B^3$ कुमारैकं गृहीत्वा च । 4. $B^1$ बोधि° । 5. $B^1$, $B^2$ and $B^3$ सर्वे मग्ना जलेन ते । 6. $B^1$, $B^2$ and $B^3$ स° । 7. $B^1$, $B^2$ and $B^3$ वृद्धत्वेपि विशेषतः । 8. $P^1$ and $P^3$ stop the verse with माइमरणं । 9. $P^3$ omits पुनः । 10. $B^1$ and $B^2$ °इ । 11. $B^3$ °यं° । 12. $B^1$, $B^2$ and $B^3$ वियो° । 13. $B^3$ omits उक्तं च । 14. $B^2$ °पतिः । 15. $B^1$, $B^2$ and $B^3$ योजनानां शतानां च विस्तारं च सागराभिधम् । 16. $B^1$, and $B^2$ omit this verse।

कियत्यपि गते काले जलधेर्मध्यमागतम्[1] ।
तचैत्यं वत्स[2] ! जानीहि पृच्छायास्तेद उत्तरम् ॥११९॥

एतदाख्यानकं तत्र चैत्यस्योत्पत्तिमूलजम्[3] ।
तयाप्सरोवृद्धयोक्तं देवराजस्य चाग्रतः[4] ॥१२०॥

सद्गुणं सस्वरं कान्तं सलावण्यं मनोहरम् ।
चैत्यमध्यस्थितं बालं दृष्ट्वा जाता दयापरा ॥१२१॥

साप्यवोचत्कुमाराग्रे शृणु रूपश्रियो निधे[5] ! ।
त्यज देवकुलं तिष्ठ प्रच्छन्नो मद्गृहान्तरे ॥१२२॥

कुमारोवकिमम्बे ! त्वं भाषसे भीतिकृद्वचः[6] ।
देवो वा दानवः कोस्ति यस्य भीतिर्निगद्यते[7] ॥१२३॥

देवेन्द्रस्याप्सरा अस्ति नाम्ना भानुमतीति सा ।
मत्सुता प्रेक्षणे नित्यं नरे द्विष्टा[8] समेष्यति ॥१२४॥

रूपाधिकं नरं दृष्ट्वा विशेषान्मारयत्यसौ ।
एवं मत्वा सुता[9] मे त्वं तिष्ठैकं कोणके क्षणम् ॥१२५॥

देवराजो वचः श्रुत्वा हृष्टोत्यन्तं स्वमानसे ।
एषा भानुमती नूनं भूपेनाभाषिता पुरा ॥१२६॥

पूजोपकरणं कृत्वा पूजायै स्वकरे विभोः[10] ।
तामायान्तीं[11] स विज्ञाय कपाटान्तरके स्थितः ॥१२७॥

तावन्नूपुरझंकारैर्भानुमत्यप्युपागता ।
संप्रदायेन संयुक्ता स्त्रीणां वृन्देन चावृता ॥१२८॥

प्रविष्टा गर्भगेहे[12] सा ददर्शार्हन्तमर्च्चितम् ।
नूनं नरेण केनापि पूजितोयं[13] दुरात्मना ॥१२९॥

---

1. B¹, B² and B³ °तः । 2. B¹, B² and B³ चैत्योयं वच्छ ! । 3. B¹, B² and B³ मूलतः । 4. B¹, B² and B³ कथितं देवराजाये अप्सरोवृद्धया तया । 5. B¹, B² and B³ निधिः । 6. B¹ and B³ भीतिकं वचः; B² °सप्रीतिकं वचः । 7. B¹, B² and B³ दानवो वापि विभीतिः कस्य कथ्यते । 8. B¹, B² and B³ दुष्टा । 9. B¹, B² and B³ सुतो । 10. B¹, B² and B³ दृष्ट्वा गृहीत्वा जिनमर्चितः । 11. B¹, B² and B³ आगच्छन्तीं । 12. B¹, B² and B³ गर्भगेहे प्रविष्टा । 13. B¹, B² and B³ °तो ।

एवं निरूप्य सा बाला यावत्पश्यति सम्मुखम् ।
कुमारो रूपवांस्तावद्दृष्टः कन्यकया तया ॥१३०॥

घृतवैश्वानरन्यायाज्ज्वलिता कोपवह्निना ।
दृष्टमात्रः कुमारोयं भस्मसाच्छापतः[1] कृतः ॥१३१॥

गीतनृत्यादिकं कृत्यं कृत्वा प्राप्ता दिवौकसि ।
तमैचदागता वृद्धा कुमारं भस्मसात्कृतम् ॥१३२॥

पश्चात्तापपरा वृद्धा महादुःखप्रपूरिता ।
विलापं कुर्वती वक्त्रे[2] चिन्तयामास मानसे ॥१३३॥

पुत्रादभीष्टो मे बालः केनोपायेन जीव्यते ।
निश्चित्यैवं गता वृद्धा सौधर्मेन्द्रस्य संनिधौ ॥१३४॥

मार्गदर्शक
नृलोकजानि पुष्पादि फलान्यादाय तत्क्षणम् ।
ढौकितानीन्द्रभूपाग्रे सुगन्धात्सोपि हृष्टहृत्[3] ॥१३५॥

जातीभिश्चम्पकाद्यैश्च बकुलैः स्वर्णकेतकैः ।
शतपत्रैश्च मरुकैर्दमनाद्यैः सुगन्धिभिः ॥१३६॥

इत्यादिभिः शुभैः पुष्पैः प्रीणितो देवताधिपः ।
संतुष्टः प्राह वृद्धायै वरं वृणु यथेप्सितम् ॥१३७॥

ईदृग्विधां गिरं श्रुत्वा वृद्धा जाता प्रमोदभाक् ।
देवराजस्य वृत्तान्तं हर्यग्रे मूलतोवदत् ॥१३८॥

गुणरूपनिधिर्बालः समायातो जिनालये ।
भानुमत्या नरद्वेषाच्छापतो[4] भस्मसात्कृतः ॥१३९॥

यदि तुष्टोसि हे[5] देव ! तदा जीवापयाङ्गजम् ।
पश्चात्तापोस्ति मे तस्य तेन [6]विज्ञपयाम्यहम् ॥१४०॥

कृपापरो वदेदिन्द्रस्तदेदं लाहि मेमृतम् ।
सिञ्चनीयं त्वया भस्म जीविष्यति स बालकः[7] ॥१४१॥

---

1. B¹, B² and B³ °मात्रेण कौमारः शापेन भस्मसात्° । 2. B¹, B² and B³ °वंच परित्यज्य । 3. B¹, B² and B³ प्र[B² and B³ रा(त्रा)]मोदाद्धृष्टमानसः । 4. B¹, B² and B³ °पेन । 5. B¹, B² and B³ मे । 6. B¹, B² and B³ विज्ञा° । 7. B¹, B² and B³ °जीवयिष्यति बालकम् ।

मदग्रे परमानीय प्रेषणीयस्त्वया गृहे ।
[1]तथास्तु कथयन्त्येषा गृहीत्वामृतमद्भुतम् ॥१४२॥

समायाता निजे स्थाने सिक्तस्तद्भस्मपुञ्जकः[2] ।
जीवितस्तत्क्षणाद्बालो मन्ये सुप्तः समुत्थितः ॥१४३॥

कुमारः कथयामास मातर्जागरितः कथम् ।
श्रुत्वा वृद्धावदत्तस्मै भानुमत्या यथा कृतम् ॥१४४॥

सोप्याह मातरेवं चेत्तदाहं जीवितः कथम् ।
वृत्तान्तो[3] मूलतः सर्वः[4] कुमाराग्रे निवेदितः[5] ॥१४५॥

कार्यार्थी च कुमारोवक् सौधर्मेन्द्रं प्रदर्शय ।
जनोक्ति[6]र्बहु दृष्टं स्यात्सुन्दरं जीविताद्बहोः ॥१४६॥

वृद्धाप्यूचे तदा भव्यं ब्राह्मास्ती[7]न्द्रस्य चेदृशी ।
इत्युक्त्वा द्वावपि प्राप्तौ सौधर्मेन्द्रस्य संनिधौ ॥१४७॥

कुमारेण सभा दृष्टा पूर्णा सामानिकैर्हरेः[8] ।
न ज्ञायते तदा कश्चिदिन्द्रः कोन्योथवापरः ॥१४८॥

आसन्नः स गतो यावद्रूपतो मोहितो[9] हरिः ।
पुनः पुनः समालिङ्ग्य स्वोत्सङ्गे स धृतः क्षणात् ॥१४९॥

पृच्छतीन्द्रः क वत्स[10] ! त्वं किं वा कोसि किमागतः ।
वृत्तान्तं मूलतो वत्स ! श्रोतुमिच्छामि ते गिरा ॥१५०॥

कुमारेण निजं वृत्तं कथितं च हरेस्तदा[11] ।
शापादग्ध इति श्रुत्वा भानुमत्यां चुकोप सः ॥१५१॥

सापि तत्र सभां याता हरिणाकारिता द्रुतम्[12] ।
देवि त्वं गर्वितासीद्बालो[13]कोपद्रवकारिणी ॥१५२॥

एष बालो गुणाधारो रूपलावण्यमन्दिरम् ।
दह्यमाने त्वया दुष्टे ! नागता किं दयापि ते[14] ॥१५३॥

---

1. $B^1$, $B^2$ and $B^3$ यथा° । 2. $B^1$, $B^2$ and $B^3$ सिञ्चितं भस्मपुञ्जकम् । 3. $B^1$, $B^2$ and $B^3$ °न्तं । 4. $B^1$, $B^2$ and $B^3$ °र्वं । 5. $B^1$, $B^2$ and $B^3$ °तम् । 6. $B^1$ °बत°; $B^3$ जन्मोक्ते° । 7. $B^1$, $B^2$ and $B^3$ चे° । 8. $B^1$, $B^2$ and $B^3$ पूरितेन्द्रसमान [$B^2$ and $B^3$ नि]कैः । 9. $B^1$, $B^2$ and $B^3$ °रूपे मोहितवान् । 10. $B^1$, $B^2$ and $B^3$ वत्स । 11. $B^1$, $B^2$ and $B^3$ °तं हरिणा सह । 12. $B^1$ °तादद्भुतम्; $B^3$ °तादद्भुता । 13. $B^1$, $B^2$ and $B^3$ देवत्वे गर्विता नूनं लो° । 14. $B^1$, $B^2$ and $B^3$ दह्यमानस्तु पापिष्ठे दयापि [ $B^2$ and $B^3$ omit this last word] तव नागता ।

मार्गदर्शक - आचार्य श्री सुविधिसागर जी महाराज



एतदागोभवद्दण्डाच्छापं लाहि त्वमप्यहो ।
मदाज्ञावशतो दुष्टे नृलोके[1] मानुषी भव ॥१५४॥

अथावसरमासाद्य कुमारः कोविदाग्रणीः ।
समुत्थाय नमस्कृत्य चेन्द्रमेवं व्यजिज्ञपत् ॥१५५॥

यदाज्ञा प्राप्यते स्वामिन् ! तदा व्यावृत्य गम्यते ।
इति तस्य गिरं श्रुत्वा हरिर्वचनमब्रवीत् ॥१५६॥
किं कुर्वे[2] वत्स[3] ! स्वर्गेत्र मनुष्यावस्थितिर्न हि ।
त्वत्समानं नरं नो चेत् पार्श्वाद्दूरीकरोति कः ॥१५७॥
परं याचस्व मत्पार्श्वाद्यत्किंचिद्रोचते तव ।
निर्लोभत्वं समादाय कुमारो वाक्यमब्रवीत् ॥१५८॥ यतः[4]–

सर्पाः पिबन्ति पवनं[5] न च दुर्बलास्ते
शुष्कैस्तृणै[6]र्वनगजा बलिनो भवन्ति ।
कन्दैः फलैर्मुनिवरा गमयन्ति कालं
संतोष एव पुरुषस्य परं निधानम् ॥१५९॥
संतोषात्प्राणिनां लक्ष्मीः स्वल्पापि हि सुखप्रदा ।
असंतुष्टस्य पुंसोपि सौख्यं कोटीश्वरस्य नो ॥१६०॥
तव प्रसादतः स्वामिन् राज्यमृ[7]द्धिश्च पुष्कला ।
लोभादपि हि या प्रीतिः सा प्रीतिर्न प्रशस्यते ॥१६१॥[8]

वचसानेन देवेन्द्रो न सामान्यः पुमानसौ ।
तथापि वत्स[9] ! देवानां दर्शनं न हि निष्फलम् ॥१६२॥
तत्तथास्तु कुमारोवग्यदा दिशसि[10] वाञ्छितम् ।
तदा भानुमतीमेतामन्यां वृद्धां च मेर्पय[11] ॥१६३॥

---

1. B[1], B[2] and B[3] मदाज्ञा गच्छ रे दुष्टे[ B[3] ष्टा ]मनुजे । 2. B[1], B[2] and B[3] कुर्मो । 3. B[1], B[2] and B[3] वच्छ । 4. B[1] and B[3] उक्तं च instead of यतः; B[2] omits this word and has no substitute । 5. B[2] ends the verse with पवनं । 6. P[1] and P[3] end it with °स्तृणैर्वा कन्दैः । 7. B[1] and B[2] °रि°; B[3] ऋ० । 8. B[3] adds the following after this verse:—

दंत कुमि कुरंग धण जवधन तव रावंत ।
जबहीकं तानि रयणी तव तोन्नुं बिस्वंत ॥
ससनेही मानुं नदी सच्चिकालवहंत ।
गरथसनेहीतुबजल वेगाही विहडंत ॥

9. B[1] and B[3] वच्छ । 10. B[1], B[2] and B[3] °वगदि दास्यसि । 11. B[1], B[2] and B[3] समर्पय ।

इन्द्रदत्ते गृहीत्वा ते मिलित्वा निर्गतस्ततः ।
चैत्ये पुनः समागत्य नमस्कृत्वादिमं[1] जिनम् ॥१६४॥

प्रक्षिप्य पञ्जरे ते द्वे चैत्येशा[2]रुह्य तत्क्षणात् ।
सिद्धे कार्ये विवेकी ना विलम्बं न करोत्यहो[3] ॥१६५॥

शृंगस्थां शृंखलां मुक्त्वा बद्ध्वा पञ्जरकैस्ततः ।
उद्धृतो नंगरः सोपि संलग्नो याति यावता ॥१६६॥

कियत्यपि गते दूरे शृङ्खलायाः करश्च्युतः ।
पतितः सहसास्यैव चैत्यस्योपरितः स्खलन् ॥१६७॥

देवराजः क्षणं स्थित्वा चिन्तयामास मानसे ।
करगोचरमायातं दैवात्कार्यं वृथाभवत्[4] ॥१६८॥ यतः[5]–

किं करोति नरः प्राज्ञः[6] शूरो वा यदि[7] पण्डितः ।
दैवं यस्य छलान्वेषी(षि) करोति विफलां क्रियाम् ॥१६९॥

[8]वत्सराजो मम भ्राता मिलिष्यति कथं मम ।
मातुमत्याश्च वृद्धाया वियोगोप्यतिदारुणः ॥१७०॥

एवं मत्वा समुत्तीर्य प्रविष्टो जिनमन्दिरे ।
ज्ञात्वा मरणजं कष्टमिदं वचनमब्रवीत् ॥१७१॥

श्रीयुगादिजिनाधीशाधिष्ठातः ! शृणु मद्वचः ।
मिलिष्यति यदा बन्धुरन्नपानं तदा मुखे ॥१७२॥

स्थितो जिनालये तत्र निराहारः कियद्दिनैः[9] ।
गोमुखोस्ति ह्यधिष्ठाता देवी चक्रेश्वरी ततः ॥१७३॥

चक्रेश्वरीपुरः सोपि[10] यक्षाग्रे च वचो[11] जगौ ।
लङ्घनं चात्र चैत्येहं कुर्वेहं च म्रिये यदा ॥१७४॥

अपकीर्तिस्तदा बाढं भविष्यति महीतटे ।
तदाग्रहात्तथा कार्यं यथा कीर्तिर्जिनेशितुः[12] ॥१७५॥

---

1. $B^1$, $B^2$ and $B^3$ °श्रमं । 2. $B^1$, $B^2$ and $B^3$ °त्याह° । 3. $B^1$, $B^2$ and $B^3$ °त्यपि । 4. $B^2$ and $B^3$ दैवैः कार्यं वृथाकृतम्; B omits this verse । 5. $B^1$, $B^2$ यथा; $B^3$ उक्तं च instead of यतः । 6. $P^1$ and $P^3$ end this verse with प्राज्ञः । 7. $B^1$ and $B^2$ अ(प्य) थ । 8. $B^2$ and $B^3$ वच्छ° । 9. $B^3$ °नै । 10. $B^1$, $B^2$ and $B^3$ तेन चक्रेश्वरी देवी । 11. $B^2$ and $B^3$ °ग्रे वचनं । 12. $B^1$, $B^2$ and $B^3$ °नेश्वरी ।

मार्गदर्शक - आचार्य श्री सुविधिसागर जी महाराज



यक्षोवक् शृणु हे देवि[1] ! पूर्वं सत्त्वं परीक्ष्यते[2] ।
पश्चादस्य करिष्यामि[3] संयोगं बन्धुना समम् ॥१७६॥

एवमस्य[4] परीक्षार्थं सिंहशार्दूलरक्षसाम् ।
रूपं कृत्वा स यक्षेन्द्रो रात्रौ भीतिमदर्शयत् ॥१७७॥

परं कुमारः कस्यापि भयं न कुरुते हृदि ।
प्रत्यक्षः सत्यतो यक्षोभूत्स विंशतिवासरैः ॥१७८॥

कण्ठे कन्थां करे दण्डं पद्भ्यां विपुलपादुके ।
खटिकां च करे कृत्वा योगिवेषः[5] समागतः ॥१७९॥

यक्षो वदति वत्स[6] ! त्वं मत्पार्श्वाद्वृणु वाञ्छितम् ।
कन्थां गृहाण मत्सत्कां चिन्तितार्थप्रदायिनीम् ॥१८०॥

पादुकाभ्यां पदस्थाभ्यां यत्रेच्छा तत्र गम्यते ।
खटिकया च लिख्यन्ते गजवाजिरथादिकाः ॥१८१॥

एतद्दण्डप्रभावेन स्पृष्टाः सजीभवन्ति ते ।
चतुरङ्गचमूयुक् त्वं[7] पश्चाद्गच्छ यथेप्सितम् ॥१८२॥

एवं दत्त्वा कुमाराय शिक्षां तद्वस्तु [8]चाद्भुतम् ।
कुण्डे झम्पां ददौ यक्षः क्षणेनादृश्यतां गतः ॥१८३॥

देवराजकुमारस्तु यावत्पश्यति विस्मितः ।
तावच्चक्रेश्वरी देवी[9] चलत्कुण्डलभास्वरा[10] ॥१८४॥

कुमारं कथयामास कथं वत्स[11] ! विलम्ब्यते ।
युगादीशप्रसादेन पूर्यन्तां त्वन्मनोरथाः[12] ॥१८५॥

देव्यास्तद्वचनं श्रुत्वा पादुके परिधाय च ।
कन्थादण्डौ समादाय खटिका सज्जिता करे ॥१८६॥

बन्धुर्मे यत्र वत्सोस्ति भानुमत्यप्सरा अपि[13] ।
पादुकेहं तत्र मोच्यो विलम्बो नात्र युज्यते ॥१८७॥

---

1. $B^1$, $B^2$ and $B^3$ शृणु भद्रे त्वं । 2. $B^1$, $B^2$ and $B^3$ सत्त्वपरीक्षणम् । 3. $B^1$, $B^2$
and $B^3$ कृत्वा पश्चात्करिष्येहं । 4. $B^1$, $B^2$ and $B^3$ तदा तस्य । 5. $B^1$, $B^2$ and $B^3$ °वेषे ।
6. $B^1$ and $B^3$ वत्स । 7. $B^1$, $B^2$ and $B^3$ °युक्तः । 8. $B^1$, $B^2$ and $B^3$ °स्तु म° । 9. $B^1$,
$B^2$ and $B^3$ °री प्राप्ता । 10. $B^3$ °भासुरा । 11. $B^2$ and $B^3$ वत्स । 12. $B^1$, $B^2$ and $B^3$
पूर्यन्ते ते मनो° । 13. $B^1$, $B^2$ and $B^3$ यत्र मे बन्धुवत्सोस्ति यत्र भानुमत्यप्सराः ।

मार्गदर्शक - आचार्य श्री सुविधिसागर जी महाराज


एतद्वचनमात्रेण समायातस्तदान्तरे ।
वत्सराजः[1] सदुःखात्मा यत्रास्ते भानुमत्यपि ॥१८८॥

सहसा पुरतोतिष्ठद्देवराजो हि बान्धवः ।
विस्मितः पादपद्मानि नमस्कृत्य व्यजिज्ञपत् ॥१८९॥

बान्धव ! त्वं स्थितः कुत्रैतावन्ति च दिनान्यपि[2] ।
कथं क्षीणाङ्गकोत्यन्तं वेषोयं कथमीदृशः ॥१९०॥

वृद्धायाः [3]पद्मानस्य भानुमत्यास्तथैव च ।
वत्सराजवचसोपि प्रत्युत्तरमभाषत ॥१९१॥

वत्स ! दत्ता मया झम्पा सर्वेषां पश्यतस्तदा ।
कथितः[4] सर्ववृत्तान्तो[5] यावदागां हि ते पुरः[6] ॥१९२॥

सर्वेषां लङ्घनं ज्ञात्वा ह्येकविंशतिमे दिने[7] ।
देवराजः स्वकन्थायाः[8] प्रत्ययार्थं करोत्यदः ॥१९३॥

कण्ठादुत्तार्य मुक्त्वाग्रे कन्थापार्श्वाद्ययाच[9] सः ।
स्नानपूर्वं सुदेवार्चो[10] पश्चाद्भोज्यं यथेप्सितम् ॥१९४॥

संप्राप्तं भोजनं तेषां प्रमोदात्पारणं कृतम् ।
चित्ते द्वावपि संतुष्टौ तौ व्यचिन्तयतामिति ॥१९५॥

देवराजोवदद्वत्स ![11] यज्जातं वाञ्छितं फलम् ।
सप्रसादो युगादीशः सांनिध्यं गोमुखस्य च ॥१९६॥

किमर्थं स्थीयते ह्यत्र[12] कार्यभ्रंशो हि मूर्खता ।
पितुराज्ञा कृतास्माभिर्गत्वा वाञ्छापि पूर्यते ॥१९७॥

बन्धुनैवं समालोच्य[13] प्रयाणे कृतनिश्चयः ।
रात्रौ विलम्ब्य तत्रैव प्रातस्तौ द्वौ समुत्थितौ ॥१९८॥

---

1. $B^1$, $B^2$ and $B^3$ वत्स° । 2. $B^1$, $B^2$ and $B^3$ दिनानि च । 3. $B^1$, $B^2$ and $B^3$ पाद° । 4. $B^1$, $B^2$ and $B^3$ °तं । 5. $B^1$, $B^2$ and $B^3$ °न्तं । 6. $P^1$, has यावद्भोज्यं यथेप्सितम् of verse 294 below instead of यावदागां हि ते पुरः and consequently omits the two verses following the present one । 7. $B^1$ and $B^2$ °तिमं दिनम्; $B^3$ °तिमन्दिरे । 8. $B^1$, $B^2$ and $B^3$ °था । 9. $B^1$, $B^2$ and $B^3$ °पार्श्वं यथा च । 10. $B^1$, $B^2$ and $B^3$ °र्चां । 11. $B^1$, $B^2$ and $B^3$ वत्स । 12. $B^1$ and $B^2$ स्थीयतामत्र । 13. $B^1$, $B^2$ and $B^3$ एतद्बन्धुभिरालोच्य ।

देवराजेन कन्थासा पादुके पादयोर्धृते ।
खटिकां दण्डमादाय चेदं वचनमब्रवीत् ॥१६६॥

वत्स ! वामाञ्चलं लाहि कन्थाया मातुदक्षिणम्[1] ।
पृष्ठ्या(ष्ठा)श्चलं भानुमत्या ग्रहीतव्यं करे दृढम् ॥२००॥

हे पादुके ! नयास्माकं समुद्रतटके पुरे ।
एतद्वचनमात्रेण संप्राप्ता वाञ्छिते पुरे ॥२०१॥

स्थिता एकप्रदेशे ते रम्यासु वनभूमिषु ।
प्रमोदाद्दिवसान् कांश्चित् स्थिताः कौतूहलेन ते[2] ॥२०२॥

चिन्तितान् देवराजोपि स्फुटान् खटिकया तदा ।
रूपकान् लिखयामास गजवाजिपदातिकान् ॥२०३॥

येन येन यथा दण्डः स्पृशत्येष तथा तथा ।
सजीवो जायते सोपि सुधादण्डप्रभावतः ॥२०४॥

एवं गजाश्व[3]सामन्ता बहवस्तत्परिच्छदाः ।
देवराजो नृपः ख्यातः स्वसैन्यपरिवारितः ॥२०५॥

सुखासनस्था सा वृद्धा भानुमत्यपि सा तथा[4] ।
वस्त्राभरणभूषाढ्या दासदासीभिरावृता ॥ २०६॥

ससैन्यश्चलितस्तावद्वन्धुप्रीतिमनोहरः ।
ग्रामाकर[5]पुरोद्यानं क्रमादुल्लंघयन् पथि ॥२०७॥

धाराया वनभूमीषु स्थितं सैन्यं महर्द्धिषु ।
वादित्रै र्वाद्यमानैस्तु[6] देवराजः स्थितस्ततः ॥२०८॥

दृष्ट्वा सैन्यश्रियं तस्य लोका विस्मयितान्तराः[7] ।
ज्ञापयन्ति स्म भूपस्य[8] स्वामिन् ! किं कोप्यभून्नृपः[9] ॥२०९॥

भोजराजोवदत्तेभ्यो ज्ञायते नैव[10] किंचन ।
कर्त्मेमं निश्चयं प्रेष्यं[11] प्रेषयित्वा स्वपूरुषम् ॥२१०॥

---

1. P¹ and P² मा नुद लणम् । 2. B¹ तु । 3. B¹ एवंविधाश्व° । 4. B¹, B² and B³ तत्तथा । 5. B¹, B² and B³ ग्रामागार° । 6. B¹, B² and B³ °मानस्तु । 7. B¹, B² and B³ विस्मयमानसाः । 8. B¹, B² and B³ विज्ञापयन्ति भूपाग्रे । 9. B¹, B² and B³ कोत्र भूपतिः । 10. B¹, B² and B³ न हि । 11. B¹, B² and B³ निश्चयोयं करिष्यामि ।

एवं कृते सति नृपे समायातो नृपान्तिके ।
प्रहितो देवराजेन भट्ट एको व्यजिज्ञपत् ॥२११॥

पुत्रौ[1] भोजनरेन्द्रस्य देवराजोभिधानतः ।
वच्छराजो द्वितीयोस्ति[2] विज्ञापयति मन्मुखात् ॥२१२॥

देशपट्टे त्वया देव ! पूर्वं निष्कासितौ सुतौ ।
भानुमत्यन्वितावेतौ चतुरङ्गचमूवृतौ ॥२१३॥

श्रुतं वाक्यं हि भूपेन कर्णयोरमृतोपमम् ।
सर्वाङ्गं शीतलं जातं यद्दग्धं विरहाग्निना ॥२१४॥

वर्द्धापनं पुरे चक्रे[3] प्रमोदान्मन्त्रिपुङ्गवैः ।
कुमारोक्तमथो[4] सर्वं दास्यप्यन्तःपुरे जगौ ॥२१५॥

सुतसंतापदग्धानां राज्ञीनां च मनोरथाः ।
पुनरागमवार्ताभिस्तयोः[5] पल्लविता द्रुतम् ॥२१६॥

भोजभूपः स[6] तत्कालमुत्थितः सपरिच्छदः ।
चतुरङ्गचमूयुक्तः समस्तान्तःपुरीवृतः ॥२१७॥

उत्सवं[7] कारयामास नगरे नगरान्तिकात्[8] ।
तोरणैर्हट्टशोभाभिश्छादितं[9] गगनाङ्गणम् ॥२१८॥

एवं कृत्वा समायातो भूप उद्यानभूमिषु ।
सबन्धुर्देवराजोपि पितुः संमुखमागतः ॥२१९॥

तस्य पादौ समाश्रित्य[10] परमाद्विनयान्नतौ[11] ।
उत्थाया(प्या)लिङ्गयामास[12] वाहनस्थो धराधिपः ॥२२०॥

पुत्रश्रियं नृपो वीक्ष्य[13] भानुमत्यप्सरोवराम् ।
स्वप्नानुसारतो बाला भुक्तापि ह्युपलक्षिता ॥२२१॥

वराचिंदत्तलग्नेन भानुमती विवाहिता ।
विवाहात्पुत्रसंयोगाज्जातो हर्षवशो[14] नृपः ॥२२२॥

---

1. $B^1$, $B^2$ and $B^3$ पुत्रो । 2. $B^2$ and $B^3$ वस्तु । 3. $B^1$, $B^2$ and $B^3$ जातं । 4. $B^1$, $B^2$ and $B^3$ °रोदन्तकं । 5. $B^1$, $B^2$ and $B^3$ °भिः सिक्ताः । 6. $B^1$, $B^2$ and $B^3$ °भूपस्तु । 7. $B^1$, $B^2$ and $B^3$ उच्छवं । 8. $B^1$ नागरैर्जनैः । 9. $B^1$, $B^2$ and $B^3$ °श्छाद्यते । 10. $B^1$, $B^2$ and $B^3$ नमस्कृत्य । 11. $B^1$, $B^2$ and $B^3$ परमे(म)विनयेन तौ । 12. $B^1$, $B^2$ and $B^3$ आलिङ्गितौ( तः ? ) समुत्थाय । 13. $B^1$; $B^2$ and $B^3$ दृष्ट्वा पुत्रश्रियं भूपो । 14. $B^1$, $B^2$ and $B^3$ °गाढहर्षाद्धर्षवशो ।

सत्यवत्याः[1] समायाता सार्थे[2] मदनमञ्जरी ।
पुत्रदर्शनसोत्कण्ठा[3] पश्यन्ती तौ चतुर्दिशम् ॥२२३॥
देवराजवत्स[4]राजौ दृष्ट्वा तां चातिहर्षितौ ।
पतितौ पदयोस्तस्या[5] न्यस्य भूमौ स्वमस्तकम् ॥२२४॥[6]
सकुटुम्बस्तदा भूपः पृच्छति स्म निजं सुतम् ।

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

कथं राज्यरमा प्राप्तानीता भानुमती कथम् ॥२२५॥
देवराजकुमारोवग् नत्वा भूपपदाम्बुजम् ।
कथयिष्ये यदा[7] यूयं श्रोष्यथोद्युक्तमानसाः ॥२२६॥
देशपट्टे गतौ यावद्विवाहं भूपतेः पुरः ।
वृत्तान्तो मूलतः सर्वः कथितः स्वजनाग्रतः ॥२२७॥
राजा राज्ञी समुत्थाय द्वावपि प्रस्तुताञ्जली ।
तौ व्यजिज्ञपतां नत्वा वृद्धायाश्चरणाम्बुजम्[8] ॥२२८॥
अस्मत्कुलमुद्धरितं राज्यं [9]चोद्धरितं त्वया ।
जीवापितः सुतोयं मे ह्युपकारः कृतो मम ॥२२९॥
एवं चमत्कृता[10] वृद्धा दानमानेन तोषिता ।
सत्यवत्या निजे स्थाने स्थापिता पुत्रवत्सला[11] ॥२३०॥
पुत्रागमनजोत्साहं[12] विवाहं भोजभूपतिः ।
प्राप्य हर्षप्रपूर्णः सन् प्रवेशमसृजत्पुरे[13] ॥२३१॥
वादित्रैर्वाद्यमानैस्तु भट्टाजयजयारवैः ।
स्त्रीणां माङ्गल्यगीताद्यैः समायातो नृपो गृहे ॥२३२॥
निष्कण्टकतरं राज्यं पालयन् भोजभूपतिः[14] ।
देवराजकुमाराय युवराजपदं ददात् ॥२३३॥

---

1. $B^1$, $B^2$ and $B^3$ °त्या । 2. $B^1$ °र्थं । 3. $B^1$, $B^2$ and $B^3$ पुत्रस्य दर्शनोत्कण्ठा । 4. $B^1$, $B^2$ and $B^3$ °वच्छ । 5. $B^1$, $B^2$ and $B^3$ °स्तास्ता । 6. $B^3$ adds the following after this verse :—

सहर्षा स्ता(सा) सरोमाञ्चा सुतप्रेमविमोहिता ।
उच्छा(त्था)योत्सङ्गमानीतः स्नापितो हर्षदश्रुभिः ॥

7. $B^1$ तदा । 8. $B^1$, $B^2$ and $B^3$ पादपद्मं च वृद्धाया नमस्कृत्य व्यजिज्ञपत् । 9. $B^1$, $B^2$ and $B^3$ °ज्यम्° । 10. $B^1$, $B^2$ and $B^3$ च मत्कृता । 11. $B^1$, $B^2$ and $B^3$ °वच्छ[$B^1$ त्स]लात् । 12. $B^1$, $B^2$ and $B^3$ °नमुत्साहं । 13. $B^1$, $B^2$ and $B^3$ उभयोरुत्साहसम्पन्नः प्रवेशमकरोत्पुरे । 14. $B^1$, $B^2$ and $B^3$ पाल्यमानस्तु भूपतिः ।

किंयन्त्यपि दिनानीशः स्थितोन्तःपुरमध्यगः[1] ।
भानुमत्यप्सरोरूपव्यामोहितमनास्ततः ॥२३४॥

एकस्मिन् दिवसे राजा विज्ञप्तो राजपूरुषैः[2] ।
उद्वासयितुमारब्धो देशः सीमालराजभिः[3] ॥२३५॥

एतच्छ्रुत्वा स भूपालः कोपादरुणलोचनः ।
प्रयाणं दापयामास चतुरङ्गचमूवृतः ॥२३६॥

एकत्र च[4] सरस्तीरे स्थितः सैन्ययुतो नृपः ।
भोजनावसरे प्राप्ते राज्ञा भानुमती स्मृता ॥२३७॥

विरहात्तापसंतापान्न रतिं लभते क्वचित् ।
प्राणैः प्रयाणमारब्धं भानुमत्या अदर्शने ॥२३८॥

न पर्यङ्के न भूपीठे न जने न वनान्तरे ।
समाधिर्न हि कुत्रापि विना तां प्राणवल्लभाम् ॥२३९॥

सर्वेपि वररुच्याद्या मिलिता मन्त्रिपुङ्गवाः ।
कुर्वन्ति स्म किलालोचं[5] विलक्षास्ते परस्परम् ॥२४०॥

यदि व्याघुटति [6]क्ष्मापस्तदा ते वैरिभूभुजः ।
देशं विध्वंसयिष्यन्ति कः स्याद्धारयितुं क्षमः ॥२४१॥

मन्त्रिणः कथयामासुः सर्वे वररुचेः पुरः
विलम्बः कार्यते भूपात्तच्चित्तस्यैव दर्शनात्[7] ॥२४२॥

दध्यो वररुचिः सत्यमेवैभिर्मे प्ररूपितम् ।
भानुमत्या हि रूपं चेत् करोम्यत्यद्भुतं ह्यहम् ॥२४३॥

स्मृत्वा सरस्वतीं देवीं कृत्वा सुन्दरवर्णकम्[8] ।
चित्रे भानुमतीरूपं निर्मिमीते स्म सुन्दरम् ॥२४४॥

निष्पन्नं तद्यथायोग्यं स्थाने स्थाने[9] तथाविधम् ।
प्रोचे वररुचिर्वाक्यं भारत्यै प्रीतिपूरितः ॥२४५॥

1. $B^1$, $B^2$ and $B^3$ स्थितोर(तश्चा)न्तःपुरान्तरे । 2. $B^1$ °पौरुषैः । 3. $B^1$, $B^2$ and $B^3$ °भूभुजैः । 4. $B^1$, $B^2$ and $B^3$ वने[ $B^1$ and $B^2$ नै ]कस्मिन । 5. $B^1$, $B^2$ and $B^3$ आलोच्यं कुर्वते सर्वे । 6. $B^1$, $B^2$ and $B^3$ भूप° । 7. $B^1$, $B^2$ and $B^3$ क्रियतेस्माभिः किंचिच्चित्रा-( त्र ? )मदर्शनात् । 8. $B^1$, $B^2$ and $B^3$ °वर्णकसुन्दरम् । 9. $B^1$, $B^2$ and $B^3$ °योग्यं स्थानं तं पि ।

रूपं मे सृजतः क्वापि विस्मृतं स्यात्प्रमादतः[1] ।
तत्र मातस्त्वया सम्यक्करणीयं तथाविधम् ॥२४६॥

एतद्वचनमात्रेण यावच्चिन्तयति[2] द्विजः ।
कुञ्चिकाग्रान्मषीबिन्दुः पतितो गुह्यदेशगः[3] ॥२४७॥

तं प्रमार्ज्य ततश्चित्ते चिन्तयामास पण्डितः[3] ।
पुनः पपात तत्रैव मषीबिन्दुस्तथैव सः[4] ॥२४८॥

एवं वारत्रयं यावत् पतति स्म[5] पुनः पुनः ।
तथैव स्थापितः सोपि जातं रूपं यथोचितम् ॥२४९॥

तद्रूपं दर्शितं राज्ञो वररुच्यादिमन्त्रिभिः ।
हर्षाच्चित्रं करे लात्वाङ्गोपाङ्गानि व्यलोकयत्[6] ॥२५०॥

ललाटं च मुखं नासाकपोलं लोचनद्वयम् ।
कर्णाद्यवयवान् वीक्ष्य[7] न कुत्राप्यन्तरं भवेत्[8] ॥२५१॥

एवं निरीक्षमाणः संस्तिलं[9] गुह्येपि दृष्टवान् ।
विस्मितश्चिन्तयामास विकल्पानेवमीश्वरः[10] ॥२५२॥

विश्वासाद्वञ्च्यते लोके ह्यविश्वासी न वञ्च्यते ।
अन्तःपुरे व्यभिचारो वररुच्युद्भवोस्ति हि ॥२५३॥

प्रियाविरहजं दुःखं विस्मृतं तस्य कोपतः ।
वधकं नरमाहूय तस्याग्रेप्येवमब्रवीत् ॥२५४॥

[11]एते वररुचेर्नेत्रे निष्कास्य मम दर्शय ।
करणीयं हि मद्वाक्यं प्रष्टव्योहं पुनर्नहि ॥२५५॥

वधकैर्विप्रतार्यैष भद्रचित्तः[12] पुरोहितः ।
नीतोरण्ये महाघोरे[13] यावद्घाताय सज्जितः ॥२५६॥

---

1. B¹, B² and B³ विस्मृतं यत्र कुत्रापि रूपनिर्मापयस्यमाम्(पणं मया ?) । 2. B¹, B² and B³ °ते । 3. B¹, B² and B³ गुह्यवेश्मसु । 4. B¹ च; B² and B² तम् । 5. B¹, B² and B³ °ते च । 6. B¹, B² and B³ विलोकयन् । 7. B¹, B² and B³ °द्यवयवैः सर्वैः । 8. B² न हि कुत्राप्यन्तरम् । 9. B¹, B² and B³ °णस्तु तिलं । 10. B¹, B² and B³ °नेकभूपतिः । 11. B¹, B² and B³ एतद्वर । 12. B¹, B² and B³ °त्तं° । 13. B¹, B² and B³ नीतोटव्यां(व्यां) महाघोराम् ।

मार्गदर्शक - आचार्य श्री सुविधिसागर जी महाराज



विप्रोवग् वधकं ज्ञात्वा दुष्टचित्तो भवान् कथम् ।
सोप्याह द्विज ! किं कुर्वे[1] वयमादेशवर्तिनः ॥२५७॥
भूपोक्तिमन्यथा कर्तुं वयं नैव क्षमाः क्वचित् ।
शिक्षां देहि तदस्माकं सर्वथायति सुन्दराम् ॥२५८॥
द्विजोपि वधकं प्रोचे राज्ञोक्तं कुरु मे द्रुतम् ।
अन्यथा सकुटुम्बं त्वां भूपोयं घातयिष्यति[2] ॥२५९॥
एतद्वचनमाकर्ण्य वधकोवग् दयापरः ।
नाम न श्रूयते यत्र तत्र गच्छ द्विजोत्तम[3] ! ॥२६०॥
स्वरक्षार्थं वररुचिः स गतोन्यत्र कुत्रचित् ।
प्राप्तो मृगाक्षिणी लात्वा वधकोपि[4] नृपान्तिके ॥२६१॥
दूरस्थे चक्षुषी तेन दर्शिते भोजभूपतेः ।
तद्दर्शनात्स[5] संतुष्टः क्रोधो नैवास्त्यतः परम् ॥२६२॥
द्वितीये दिवसे[6] प्राप्ते देवराजो नृपात्मजः ।
गतः स्वल्पपरीवारो ह्यश्वान् वाहयितुं बहिः ॥२६३॥
प्रहितो भूभुजैकेन तुरङ्गोयं ममाद्भुतः ।
कुमारस्तं समारूढो भवितव्यप्रयो[7]गतः ॥२६४॥
उद्याने वाहितः पूर्वं पश्चान्मुक्तोतिवेगतः ।
कियतीं च भुवं गत्वा पं(ख)चितः[8] स तुरङ्गमः ॥२६५॥
तदा[9] चतुर्गुणीभूय[10] भूमिं वेगादलङ्घयत् ।
योजनानि[11] कियन्त्येषोरण्ये नीतोतिभीषणे ॥२६६॥
खेदखिन्नकुमारेणादर्श्येको दूरतस्तरुः ।
नीत्वा तस्याप्यधोभागे समुत्प्लुत्यावलम्बितः ॥२६७॥
मुक्ताश्वोपि पदे यस्मिंस्तस्मिन्नेव स[12] संस्थितः ।
उत्तीर्य[13] स कुमारोश्वादुपविष्टस्तरोस्तले ॥२६८॥

---

1. $B^1$, $B^2$ and $B^3$ तेप्यूचुर्द्विज ! किं कुर्मो । 2. $B^1$, $B^2$ and $B^3$ भूपो घातं करिष्यति । 3. $B^1$, $B^2$ and $B^3$ °मः । 4. $B^1$, $B^2$ and $B^3$ मृगचक्षुः समादाय वधकाप्ता(कोगान्) । 5. $B^1$, $B^2$ and $B^3$ तेन दृष्टेन । 6. $B^1$, $B^2$ and $B^3$ दिवसे द्वितीये । 7. $B^1$, $B^2$ and $B^3$ °वियो° । 8. $B^1$ षचि; $B^3$ पिचि° । 9. $B^1$, $B^2$ and $B^3$ °तथा । 10. $B^1$, $B^2$ and $B^3$ °णो भूत्वा । 11. $B^1$, $B^2$ and $B^3$ °नानां । 12. $B^1$, $B^2$ and $B^3$ °स्तत्र तेनैव । 13. $B^1$, $B^2$ and $B^3$ उत्तीर्णः ।

विश्रान्तः शीतलच्छायवृक्षस्याधः कुमारकः ।
तुरगः सुकुमारत्वात् प्राणमुक्तो बभूव च[1] ॥२६९॥

कुमारश्चिन्तयामास[2] किं जातमसमञ्जसम् ।
क राज्यं राजलीला मे क पित्रोरपि संगमः ॥२७०॥

वृक्षास्तु सरलास्तुङ्गा अत्राटव्यां च सन्त्यमी ।
सूर्यस्याभ्युदयश्चास्तं कचिन्न ज्ञायते मया ॥२७१॥

अत्रान्योप्यस्ति संतापः सिंहव्याघ्रसमाकुले[3] ।
डाकिनीशाकिनीभूतप्रेतराक्षसपूरिते[4] ॥२७२॥

ईदृग्विधे वने घोरे क्षुत्तृषाद्यैः स पीडितः ।
सरः शीतलवाःपूर्णं ददर्श कापि च भ्रमन् ॥२७३॥

वस्त्रपूतं जलं पीत्वा स्थितश्छायातरोस्तले ।
पुनर्बभ्राम च वने कस्यापि मिलनेच्छया ॥२७४॥

भ्रममाणे कुमारेस्मिन् सूर्योप्यस्ताचलं ययौ ।
दुष्टजीवभयभ्रान्तः समारूढः कचिद्द्रुमे ॥२७५॥

संवाह्य यावदात्मानं कुमारः स्थानमाश्रितः ।
व्याघ्रात् त्रस्तस्तरौ तत्र समारूढोथ वानरः ॥२७६॥

भयभीतः कुमारस्तु खड्गमादाय संस्थितः ।
नरवाण्या कपिः प्राह भयं मा कुरु मा कुरु ॥२७७॥

पश्याधोमुष्य वृक्षस्यास्ते सिंहो[5] दारुणेक्षणः ।
त्वया सह मम प्रीतिर्दुष्टोयं मात्र भक्षयेत् ॥२७८॥

वानरस्य गिरं श्रुत्वा विश्वस्तो राजनन्दनः ।
वृक्षाधोभागगस्तावद् दृष्टः सिंहोथ[6] दारुणः ॥२७९॥

भूम्यां पुच्छं समुत्फाल्य नीत्वा शीर्षोपरि क्षणात् ।
प्रसार्यास्यं ततो गुञ्जन् वृक्षसम्मुखमुच्छलन् ॥२८०॥

मृगेन्द्रभयभीतौ तौ वानरक्ष्माप[7]नन्दनौ ।
वृक्षस्थौ सुहृदौ जातौ जल्पतश्च परस्परम् ॥२८१॥

---

1. B[1], B[2] and B[3] सुकुमारत्वे श्रान्तः प्राणान् विमोचितः [B[3] मुमोचितम् (मुमोच सः)] । 2. B[1] and B[2] °न्तयंश्चित्ते । 3. B[1] and B[2] °कुलः । 4. B[1], B[2] and B[3] °तः । 5. B[1], B[2] and B[3] पश्य वृक्ष अधोभागे सिंहोसौ । 6. B[1] °ति । 7. B[1], B[2] and B[3] °नृप° ।

असौ दुष्टस्वभावोस्ति[1] बुभुक्षापीडितो हरिः[2] ।
आवाभ्यां न प्रमादो हि[3] करणीयः कथंचन ॥२८२॥

वार्तां प्रकुर्वतोरेवं गता रात्रिः कियत्यपि ।
वानरः कथयामास श्रूयतां राजनन्दन ! ॥२८३॥

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

निद्रा व्याप्नोति ते बाढं नेत्रयो रजनीक्षणे[4] ।
शेहि त्वं तन्ममोत्सङ्गे[5] पूर्वप्राहरिकोस्म्यहम् ॥२८४॥

धृत्वाङ्के मस्तकं सुप्तो विश्वस्तो राजनन्दनः ।
कपिं प्राहरिकं ज्ञात्वा सिंहो वदति तं प्रति ॥२८५॥

आवां वनेचरौ द्वौ स्त आवामेकत्र वासिनौ ।
आत्मवर्गे कुरु प्रीतिं परवर्गे कुतः सुखम् ॥२८६॥

नृवनेचरयोः[6] प्रीतिः पूर्वं शास्त्रेस्ति[7] निन्दिता ।
तदिमं देहि मे मर्त्यं चिराद्राज्यं वने कुरु ॥२८७॥

सिंहस्य वचनं श्रुत्वा कपिर्वचनमब्रवीत् ।
स्ववर्ग[8]परवर्गाभ्यां किं स्यात्सारास्ति वाग्नृणाम्[9] ॥२८८॥

ददाम्येनं कथं तुभ्यं दत्ता वाचा मया यतः[10] ।
एवं मत्वा मृगेन्द्र ! त्वं मुञ्चैनं गच्छ चान्यतः ॥२८९॥

मृगेन्द्रः[11] पुनरप्यूचे क्षुधार्तोयं दिनत्रयात् ।
कृपा नोत्पद्यते तुभ्यं दृष्ट्वा मां दीनमानसम् ॥२९०॥

कपिरूचे कृपा भद्र ! दुष्टे जीवे कृता वृथा ।
जीवितं प्रापितो दुष्टः सुन्दरं कुरुते न हि[12] ॥२९१॥

एवं विवादवशतो[13] गतं यामद्वयं निशः ।
प्रबुद्धः स [14]कुमारोपि कपिनैवमवाच्यहो[15] ॥२९२॥

---

1. $B^1$, $B^2$ and $B^3$ °भावेन । 2. $B^1$, $B^2$ and $B^3$ °तोपि सन् । 3. $B^1$, $B^2$ and $B^3$ प्रमादो न हि अ(वा)स्माभिः । 4. $B^1$, $B^2$ and $B^3$ कपिरूचे कुमाराग्रे निद्रा व्याप्यते तव । 5. $B^1$, $B^2$ and $B^3$ °त्संगे । 6. $B^1$, $B^2$ and $B^3$ नरे वने[$B^3$ न]चरे । 7. $B^1$ च । 8. $B^1$, $B^2$ and $B^3$° र्गे । 9. $B^1$, $B^2$ and $B^3$ वाचा सारं च देहिनाम् । 10. $B^1$, $B^2$ and $B^3$ दत्ता वाचा मया यस्य [$B^3$ यस्य] ददाम्येनं त्वया(यि ?) कथम् । 11. $B^1$, $B^2$ and $B^3$ मृगारिः । 12. $B^1$, $B^2$ and $B^3$ जीवापिता (तो?) [ $B^3$ ते ] हि दुष्टात्मा सुन्दरं न हि किंचन । 13. $B^1$, $B^2$ and $B^3$ एवं वादविवादेन । 14. $B^1$, $B^2$ and $B^3$ °इस्तकु° । 15. $B^1$, $B^2$ and $B^3$ वानरेण वचं जगौ ।

सुप्यते मयका मित्र ! जागरूकस्त्वमप्यहो[1] ।
न कापि वर्तते शङ्का त्वयि[2] माहरिके सति ॥२६३॥

कपिः पुनरपि प्राह[3] प्रपञ्ची हरिरस्त्यसौ ।
विप्रतारयति क्रूरो[4] दातव्यो न तथा[5]प्यहम् ॥२६४॥

एवं श्रुत्वा कुमारोवक् प्रपञ्ची किं करिष्यति ।
कालिन्द्यां रमते हंसो न श्यामाङ्गस्तथाप्यसौ[6] ॥२६५॥

प्राहाथ वानरो वत्स ! मा कुर्यास्त्वं रुपं मयि ।
सुष्ठु वा दुष्टकार्यं वा मानवाज्जायते ध्रुवम् ॥२६६॥

इति गाढतरां शिक्षां दत्त्वा राजसुताय सः ।
अविश्वासी वानरोपि संनद्धः शयनाय सः ॥२६७॥

कुमारस्य स उत्सङ्गे[7] सुप्तो निर्भरमानसः ।
ज्ञात्वा सिंहस्ततोवादीत् कुमारं मृष्टया गिरा ॥२६८॥

दुष्टात्मा वानरो धूर्तो[8] मद्भीतस्त्वय्ययं हितः ।
गतेन्यत्र मयि त्वां हि भक्षयिष्यति नान्यथा ॥२६९॥

एवं यावत्सनिद्रोयं[9] भूमौ पातय मत्पुरः ।
भक्षयित्वान्यतो यामि श्रेयसा[10] त्वं गृहे व्रज ॥३००॥

कुमारोवग्घिता शिक्षा वैरिणोपि हि गृह्यते ।
मृगेन्द्र ! सत्यमेवोक्तं का मैत्री स्याद्वनेचरे[11] ॥३०१॥

न मे युक्तमिदं कार्यं[12] कुमारेणापि चिन्तितम् ।
भवितव्यतया बुद्धिः परं [13]भवति तादृशी ॥३०२॥

कुमारोप्येवमावेद्य यावत्तं भुव्यपातयत् ।
कपिस्तावत्समालम्ब्य तथैवारूढवांस्तरौ ॥३०३॥

---

1. $B^1$, $B^2$ and $B^3$ भवता मित्र! जागरूकोप्यहं पुना । 2. $B^1$, $B^2$ and $B^3$ न हि शंका प्रकर्तव्या मयि । 3. $B^1$, $B^2$ and $B^3$ कपिरूचे कुमाराय । 4. $B^1$, $B^2$ and $B^3$ °यते दुष्टो । 5. $B^1$, $B^2$ and $B^3$ त्वया । 6. $B^1$, $B^2$ and $B^3$ न हि श्यामतनुः कथम् । 7. $B^1$, $B^2$ and $B^3$ कुमारोत्संगमाश्रित्य । 8. $B^1$, $B^2$ and $B^3$ वानरो धूर्तदुष्टात्मा । 9. $B^1$, $B^2$ and $B^3$ एवं ज्ञात्वा सनिद्रोयं । 10. $B^1$, $B^2$ and $B^3$ कुशलै[स्] । 11. $B^2$ and $B^3$ °चरैः । 12. $B^2$ and $B^3$ नात्मनः सदृशं कार्यं; $B^1$ omits the previous verse and this foot । 13. $B^1$, $B^2$ and $B^3$ °तव्यानुमानेन बुद्धिर्भ° ।

विलक्षश्चिन्तयामास कुमारो यावदात्मनि ।
कपी रोषारुणः प्रोचे यथा ज्ञातं तथा[1] कृतम् ॥३०४॥

यद्यहं घातयामि त्वां[2] वाचा मे यात्यहो[3] तदा ।
एवं कर्णे लगित्वायं[4] ददौ दारुणचीत्कृतिम् ॥३०५॥

ततः कुमारः[5] संजातो मूको ग्रथिलचेष्टितः ।
सैन्यकोलाहलाचावत्कपिसिंहादयो ययुः[6] ॥३०६॥

ततः पदानुसारेण पृष्ठौ सैन्यं समागतम् ।
वनभूम्यन्तरे भ्राम्यद्वृक्षवृक्षान्तरेष्वपि ॥३०७॥

केनापि[7] वृक्षमारूढः कुमारोप्युप[8]लक्षितः ।
समायाता चमूस्तत्र[9] दृष्टः शाखामृगोपमः ॥३०८॥

कुमारं पृच्छति क्षेमं विसेमिरा[10] प्रजल्पति ।
भूमावेहि पुनः प्रोक्तो[11] विसेमिरेति भाषति ॥३०९॥

सामन्ता मन्त्रिणो वक्त्रं स्वं स्वं पश्यन्त्यमी मिथः[12] ।
बालोटव्यामिहैकाकी[13] जातः प्रेताद्यधिष्ठितः ॥३१०॥

पश्चात्तापपराः सर्वे किं कृतं विधिनाधुना ।
निर्माय विश्वालङ्कारं कलङ्कः किं कृतोधुना[14] ॥३११॥

एवं विचिन्तयन्तस्ते[15] समारोप्य सुखासने ।
कुमारं तं पुरस्कृत्यानयामासुर्नृ[16]पान्तिके ॥३१२॥

भूपोप्यालापयामास वीक्ष्य चेष्टां सुतस्य ताम्[17] ।
आस्ते ते कुशलं वत्स ! विसेमिरोत्तरं ददौ ॥३१३॥

---

1. $B^1$, $B^2$ and $B^3$ यद्वेद्मि[ $B^1$ and $B^2$ द्विद्मस् ]तादृशं । 2. $B^1$, $B^2$ and $B^3$ यदि त्वां घातयिष्यामि । 3. $B^1$, $B^2$ and $B^3$ गम्यते । 4. $B^1$, $B^2$ and $B^3$ च । 5. $B^1$, $B^2$ and $B^3$ कुमारस्तेन । 6. $B^1$, $B^2$ and $B^3$ °हलान्नष्टाः कपिसिंहादयोपराः । 7. $B^1$, $B^2$ and $B^3$ कुमारो । 8. $B^1$, $B^2$ and $B^3$ दूरात्केनोप° । 9. $B^1$, $B^2$ and $B^3$ द्रुतं तत्र । 10. $B^1$ and $B^2$ substitute ससेमिरा and $B^3$ विसमेरा here as well as in the following verses । 11. $B^1$, $B^2$ and $B^3$ समागच्छात्र भूम्यां भो [ $B^2$ and $B^3$ सो ] । 12. $B^1$, $B^2$ and $B^3$ सामन्तमन्त्रिवर्गस्ते( र्गस्स )मुखं पश्यन् परस्परम् । 13. $B^1$, $B^2$ and $B^3$ °व्यामथैकाकी । 14. $B^1$, $B^2$ and $B^3$ कलङ्कं किं कृतं त्वया । 15. $B^1$, $B^2$ and $B^3$ संचिन्त्यमानास्ते । 16. $B^1$, $B^2$ and $B^3$ °स्य समानीतो(ता?) नृ । 17. $B^1$, $B^2$ and $B^3$ चेष्टां सुतस्य संवीक्ष्य भूपेनालापितस्ततः ।

कुमारवचनं श्रुत्वा भोजभूपः सुदुःखितः ।
सुतरत्नस्य दोषोयं विधिना विहितः[1] कथम् ॥३१४॥

किं जातं कस्य दोषोयं प्रतीकारोस्ति कीदृशः ।
चित्ते[2] दोलायमानस्तु धारायां प्राप्त ईशिता ॥३१५॥

कुमारचेष्टितं वीक्ष्य सत्यवत्यस्ति दुःखिता ।
कथयामास भूपाग्रे पश्य दैवेन[3] यत्कृतम् ॥३१६॥

उपायो हि कुमारस्य करणीयो यथाविधि[4] ।
येन नीरोगतामेति तव पुण्यप्रभावतः ॥३१७॥

भूपेनानेकविद्यानां दर्शितो मन्त्रवादिनाम् ।
प्रतीकारः कृतस्तैश्च गुणो नाभूत्कथंचन ॥३१८॥

राज्ञ्यूचे श्रूयतां स्वामिन्! भवेद्वररुचिर्यदा[5] ।
तदैवैतं कुमारं हि कुरुते रोगवर्जितम्[6] ॥३१९॥

भूपोवग्देवि ! किं कुर्मः कुकर्मास्ति मया[7] कृतम् ।
पश्चात्तापो ममात्यन्तं[8] कराच्चिन्तामणिर्गतः ॥३२०॥

राज्ञ्यप्युवाच वधकः समाकर्ण्य प्रपृच्छ्यताम् ।
भाग्याच्चेदस्ति जीवन् स[9] सुन्दरं किमतः परम् ॥३२१॥

आकार्य वधकः पृष्टो[10] भूपेन कृतनिर्भयः[11] ।
सोवक् कोपो न मे कार्यः सत्यवादे[12] कथंचन ॥३२२॥

जीवन्मुक्तोस्ति कारुण्यात्[13] प्रच्छन्नं भ्रमति क्वचित् ।
भयानि सन्त्यनेकानि भयं न मरणात्परम् ॥३२३॥

एवं श्रुत्वा नृपो हृष्टो जीवन्नस्ति स चेद्गुरुः[14] ।
तदा यथा तथा कृत्वानेष्यामि स्वान्तिके लघु[15] ॥३२४॥

---

1. $B^1$, $B^2$ and $B^3$ विहितो विधिना । 2. $B^1$, $B^2$ and $B^3$ चित्तं । 3. $B^3$ दैवेन । 4. $B^1$ and $B^2$ °धीस्तथाविधः । 5. $B^2$ and $B^3$ यदा । 6 $B^1$, $B^2$ and $B^3$ तदाप्येष कुमारस्य नीरुजं कुरुते क्षणात् । 7. $B^1$, $B^2$ and $B^3$ °र्मं सहसा । 8. $B^1$, $B^2$ and $B^3$ पश्चात्तापेधुना किं मे । 9. $B^1$, $B^2$ and $B^3$ जीवति [$B^1$ and $B^2$ ब्यतें] भाग्ययोगेन । 10. $B^1$, $B^2$ and $B^2$ °का: पृष्टा । 11. $B^1$, $B^2$ and $B^3$ °या: । 12. $B^1$, $B^2$ and $B^3$ कोपो देव ! न चास्माभिः करणीयः । 13. $B^1$, $B^2$ and $B^3$ कृपया जीवितो मुक्तः । 14. $B^1$, $B^2$ and $B^3$ जीव्यमानोस्ति चेद् [$B^3$ सद्] गुरुः । 15. $B^1$, $B^2$ and $B^3$ कृत्वा मा(ना ?)नयामि निजान्तिके ।

इति निश्चित्य मनसा ह्युपायश्चिन्तितो महान्[1] ।
ग्रामे ग्रामे निजा मर्त्याः प्रेषिताः लोपहेतवे ॥२२५॥

कथयन्ति प्रतिग्रामं[2] ग्राह्योयं नृपबर्करः[3] ।
स्थूलं कृशं वा यः कर्ता स राज्ञो मारणोचितः ॥२२६॥

ग्रामीणास्तद्वचः श्रुत्वा सर्वे जाता भयाकुलाः ।
शुश्रूषितोयं स्थूलः स्यादन्यथा च[4] भवेत्कृशः ॥२२७॥

नन्दकग्रामवास्तव्या मिलितास्ते महत्तराः ।
गता वररुचेः पार्श्वे विज्ञप्तिः[5] पामरैः कृता[6] ॥२२८॥

ज्ञात्वोदन्तं द्विजः प्राह[7] श्रूयतां मद्वचोधुना[8] ।
शुश्रूष्य बोत्कटः सायं प्रातर्दर्श्यो वृकाग्रतः[9] ॥२२९॥

तदुक्तं तत्र कुर्वाणैर्गते[10] काले कियत्यपि ।
पामरैर्बोत्किटा नीता धरायां भूभृदाज्ञया[11] ॥२३०॥

भूपादेशाद्गृहीतास्ते बोत्कटास्तोलिता अपि ।
स्थूलः केषां कृशः केषां सदृशा नोत्तरन्ति ते ॥२३१॥

तोलितः सम उत्तीर्णो नन्दकग्रामसंगतः ।
पृष्टास्तेपि द्विजं ज्ञात्वा प्रेषितास्तत्र मानवाः[12] ॥२३२॥

द्विजोप्यन्यत्र स गतो न लब्धो नृप[13]पूरुषैः ।
विज्ञप्तो नृप[14] आगत्य स्वरूपं कथितं समम्[15] ॥२३३॥

प्रहिताः पुरुषा राज्ञा[16] ग्रामे ग्रामे निजाः पुनः[17] ।
ग्रामीणान् कथयामासुः[18] साक्षेपवचनैर्द्रुतम् ॥२३४॥

युष्मद्ग्रामेषु[19] ये कूपाः प्रेष्या धारान्तरे तु ते[20] ।
विवाहो भोजभूपस्यासन्नोयं समुपागतः ॥२३५॥

---

1. $B^1$, $B^2$ and $B^3$ हृदि । 2. $B^1$, $B^2$ and $B^3$ °मे । 3. $B^1$ and $B^2$ बोत्कटम् (टः) । 4. $B^1$, $B^2$ and $B^3$ °षितो भवेत्स्थूलो न शुश्रूषा । 5. $B^1$, $B^2$ and $B^3$ °प्तः । 6. $B^1$, $B^2$ and $B^3$ °रैर्जनैः । 7. $B^1$, $B^2$ and $B^3$ प्रोचे । 8. $B^1$, $B^2$ and $B^3$ भवान् । 9. $B^1$, $B^2$ and $B^3$ बिरीघ्रतः । 10. $B^1$, $B^2$ and $B^3$ तस्यादेशे तथा कुर्वन् गतः । 11. $B^1$, $B^2$ and $B^3$ °टाः सर्वे धारां नीता नृपाज्ञया । 12. $B^1$, $B^2$ and $B^3$ राजादेशे गता भटाः । 13. $B^1$, $B^2$ and $B^3$ राजपो° । 14. $B^1$, $B^2$ and $B^3$ भूप । 15. $B^1$, $B^2$ and $B^3$ °पः कथितोखिलः । 16. $B^1$, $B^2$ and $B^3$ पुनः प्रहितवान् भूपो । 17. $B^1$, $B^2$ and $B^3$ नरान्निजान् । 18. $B^1$, $B^2$ and $B^3$ कथयन्तो[$B^3$न्ति]ह ग्रामीणान् । 19. $B^1$, $B^2$ and $B^3$ ग्रामग्रामेषु । 20. $B^1$, $B^2$ and $B^3$ ध्रुवम् ।

ग्रामीणास्ताड्यमानास्ते कूपान्प्रेषितु[1]मक्षमाः ।
क्रियते किं प्रोच्यते किं देशः सर्वोऽप्युपद्रुतः ॥२३६॥

सणवाडा[2]भिधे ग्रामे जनास्तत्र निवासिनः ।
सर्वे वररुचेः पार्श्वे समागत्य व्यजिज्ञपन् ॥२३७॥

तेषां वार्तां समाकर्ण्य द्विजः प्रत्युत्तरं ददौ ।
यूयं गत्वान्तिके राज्ञः[3] कथयन्त्वेव मद्वचः ॥२३८॥

अस्माकं कूपका ग्राम्या नागच्छन्ति पुरे प्रभोः[4] ।
एकः कूपो नागरिकस्तदर्थं प्रेष्यतां[5] वरम् ॥२३९॥

द्वावेकत्र यथा बद्ध्वा प्रेष्येते भूपतेः पुरः[6] ।
हसित्वा भूपतिः प्राह वचो वररुचेरिदम् ॥२४०॥

प्रहिताः पुरुषास्तत्र प्राप्तो नैव गतः क्वचित् ।
पुनः प्रेषितवान् भूपः प्रतिग्रामं निजान्नरान्[7] ॥२४१॥

वालुकारज्जवो लोकैः प्रेष्या राज्ञो गृहाद्गृहात् ।
बन्धनाय तुरङ्गाणां विलोक्यन्ते महादृढाः[8] ॥२४२॥

वचोसमञ्जसं श्रुत्वा ग्रामीणास्ते विलक्षकाः ।
न मुच्यन्ते राजपुंभिर्लञ्चादानादपि क्वचित् ॥२४३॥

देवग्रामनिवासिन्यः सकला मिलिताः प्रजाः ।
कृताञ्जलिभिरूचेथ ताभिर्वररुचिः पुनः[9] ॥२४४॥

ज्ञातवृत्तो वररुचिस्तेषां प्रत्युत्तरं ददौ ।
गत्वा च भोजपार्श्वे तैर्विज्ञप्तं[10] पामरैर्जनैः ॥२४५॥

देव किंचिन्न जानीमो ग्राम्याः प्रेतसमा वयम्[11] ।
एका रज्जुर्दर्शनीया[12] वलिष्यामस्तदग्रतः ॥२४६॥

हसित्वा भूपतिः प्राह ग्राम्याणां नेदृशी मतिः ।
बुद्धिर्वररुचेरेषा शीघ्रं गच्छन्तु भो भटाः ! ॥२४७॥

---

1. B¹, B² and B³ कूपचालन° । 2. B¹ and B² °ड°; B³ शिणवाडि(ड्य)° । 3. B¹, B² and B³ गत्वा नृपपार्श्वे । 4. B¹, B² and B³ प्रभो । 5. B² कूपैकं नागरीकं चेत् प्रेष्यते देव तद् । 6. B¹, B² and B³ प्रेषयामस्तथा कुरु । 7. B¹, B² and B³ प्रतिग्रामे भटानपि । 8. B¹, B² and B³ सिद्ध[B¹ द; B² द्]र्वो क्रियतां दृढम् । 9. B¹, B² and B³ गता वररुचिर्यत्र विज्ञप्तस्तैः कृताञ्जलि । 10. B¹, B² and B³ भोजभूपाग्ते विज्ञप्तः । 11. B¹, B² and B³ देव न ज्ञायतेस्माभिर्ग्रामीणाः प्रेतसादृशाः । 12. B¹, B² and B³ आर्चं दर्शय सिन्दुर्या° ।

मार्गदर्शक - आचार्य श्री सुविधिसागर जी महाराज



राजादेशाद्गतास्तेपि[1] स गतोन्यत्र कुत्रचित् ।
ग्रामे ग्रामे शोधितोपि न प्राप्तः स तु कुत्रचित् ॥३४८॥

पुनः प्रहितवान् भूपः प्रतिग्रामं[2] निजान्नरान् ।
कथयामास तल्लोकान् श्रूयतामेकचित्ततः ॥३४९॥

ग्रामे ग्रामेपि ये सन्ति[3] राजमान्या नरा इह ।
यथाविधि नृपादेशस्तथागन्तव्यमत्र तैः ॥३५०॥

ग्राम्या भीताः समाचख्युर्भूपादेशविधिः कथम् ।
ऊचुस्तेप्येकचित्तैस्तु स विधिः श्रूयतामहो ॥३५१॥

न पादचारैर्नारूढैश्छायायां नातपेपि न ।
भवद्भिरत्रागन्तव्यमादेशो राज्ञ ईदृशः ॥३५२॥

ईदृग्विधं नृपादेशं श्रुत्वा लोको व्यचिन्तयत् ।
द्रविणग्रहणोपाय[4] आरब्धोयं महीभुजा ॥३५३॥

गोदावरी[5]निवासिन्य एकत्र मिलिताः प्रजाः ।
गता वररुचेः पार्श्वे विज्ञप्तस्ताभिरद्भुतम्[6] ॥३५४॥

द्विजोवग्मेषमारुह्य शीर्षे कार्या च चालिनी[7] ।
मच्छिक्षां प्रविधायैतां यान्तु शीघ्रं नृपान्तिके ॥३५५॥

गताश्चैतं विधिं कृत्वा दृष्ट्वा भूपेन दूरतः ।
हसित्वा ताः स पप्रच्छ[8] ज्ञातो वररुचिर्मया[9] ॥३५६॥

नरान्प्रेषितवांस्तत्र न प्राप्तो धीनिधिः[10] क्वचित् ।
खेदखिन्नस्ततो भूपो निराशः सन् द्विजे[11] स्थितः ॥३५७॥

दध्यौ वररुचिश्चैवं गमनावसरोस्ति मे ।
कृत्वा रूपपरावर्तमुपकारं करोम्यहम् ॥३५८॥

सुखासने समारुह्य वधूवेषधरो द्विजः ।
गतो धारापुरीमध्ये पटहो यत्र वाद्यते[12] ॥३५९॥

---

1. $B^1$, $B^2$ and $B^3$ तास्तत्र । 2. $B^1$, $B^2$ and $B^3$ °मे । 3. $B^1$, $B^2$ and $B^3$ ग्रामे ग्रामेषु ये केचिद् । 4. $B^1$, $B^2$ and $B^3$ द्रव्यग्रहणकोपाय° । 5. $B^1$, $B^2$ and $B^3$ °वर्या । 6. $B^1$, $B^2$ and $B^3$ विज्ञप्तस्तैः कृताञ्जलि । 7. $B^1$, $B^2$ and $B^3$ कुर्याच्च[$B^3$ कृत्वा च] चालिनीम् । 8. $B^1$ and $B^2$ पृच्छते तासां । 9. $B^1$ and $B^2$ °चिस्ततः; $B^3$ omits this verse completely । 10. $B^3$ नगरे । 11. $B^1$, $B^2$ and $B^3$ °शस्तद्विजे । 12. $B^1$ and $B^2$ विद्यते ।

दिव्यवस्त्रभृता[1] बाला दिव्याभरणभूषिता ।
सुखासनात्समुत्तीर्य पटहं स्पृष्टवत्यहो[2] ॥३६०॥

ये नराः पटहारक्षा विस्मस्तैर्नरेश्वरः ।
कयापि श्रेष्ठिवध्वाद्यागत्य त्वत्पटहो धृतः ॥३६१॥

तद्वचःश्रुतिमात्रेण प्रेषिताश्च निजा नराः[3] ।
तथैव वाहनारूढा समानीता नृपान्तिके ॥३६२॥

यवन्यन्तरतः[4] क्षिप्ता स्त्रीजनान्तश्च [5]संस्थिता ।
भूपस्तु सपरीवार उपविष्टोग्रतो[6] बहिः ॥३६३॥

देवराजकुमारोपि यवन्यासन्नतः[7] स्थितः ।
